THE UṆĀDISŪTRAS IN VARIOUS RECENSIONS



T. R. CHINTAMANI, M.A

MADRAS UNIVERSITY SANSKRIT SERIES No. 7.

THE UṆĀDISŪTRAS IN VARIOUS RECENSIONS

PART II

THE UṆĀDISŪTRAS

WITH THE PRAKRIYĀSARVASVA

OF

NĀRĀYAṆA

EDITED BY

T. R. CHINTAMANI, M.A.

SENIOR LECTURER IN SANSKRIT, UNIVERSITY OF MADRAS



UNIVERSITY OF MADRAS

1933

PRICE RS. 2-8-0.] [FOREIGN 4 S,

PRINTED AT THE

HINDI PRACHAR PRESS, TRIPLICANE, MADRAS.

मद्रपुरीयविश्वविद्यालयसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः ७.

उणादिसूत्राणि

नारायणभट्टविरचितप्रक्रियासर्वस्वाख्यवृत्तियुतानि

द्वितीयो भागः

ति. रा. चिन्तामणिना

संपादितानि

मद्रपुरीयविश्वविद्यालयः

१९३३

FOREWORD

It is with very great pleasure that I introduce to the world of scholars this second part of No. 7 in the Madras University Sanskrit Series, containing the Vṛtti on the Uṇādisūtras by Nārāyaṇa Bhaṭṭa. The Uṇādisūtra-vṛtti forms the ninteenth section (Khaṇḍa) in his work called Prakriyāsarvasva, which is a commentary on the sūtras of Pāṇini. This work has not yet been printed. Manuscripts are available in plenty, especially in South India. Brahmaśrī Pandit K. Sambasiva Sastri has begun the printing of this important work, and has issued one part containing Khaṇḍas 1—4 as No. 106 in the Trivandrum Sanskrit Series.

The great merit of the works of Nārāyaṇa Bhaṭṭa is the thoroughness with which he deals with the subject. He does not stop with explaining a point; he brings in all the relevant points from the related works and allied subjects, and presents a comprehensive and comparative study of the subject. Thus, his commentary on the sūtras of Pāṇini forms a basis, not only for under-standing the meaning of the sūtras but also for recon-structing the history of the various systems of Sanskrit grammar.

It would have been possible for the Sanskrit Depart-ment to procure more copies. But the four manuscripts used have been found sufficient for the editor to present a correct text. Since a presentation of the contents in a correct form is more important than to give lengthy manuscript variants, it was thought advisable not to burden the edition with any more scriptorial and other pieces of information culled from a large number of manuscripts.

University of Madras.
22nd August, 1933.

C. KUNHAN RAJA.
Reader in Sanskrit.

TABLE OF CONTENTS

PREFACE

This edition of the Uṇādikhaṇḍa, a portion of the Prakriyāsarvasva is based on the following mss :—

A. This is a palm leaf ms. of the Prakriyāsarvasva, in Malayāḷam characters, belonging to the Adyar Library. (No. 40·c·3) The Ms. is fairly correct.

G. This is a paper ms. of the work, in Devanāgarī characters, deposited in the Government Oriental Mss. Library, Madras. (R. 3091.) The ms. is full of scriptorial errors.

GD. This is another paper ms. of the work in Devanāgarī characters, deposited in the Government Oriental Mss.Library, Madras. (Des. No. 15397.) This copy too is full of errors.

P. This copy of the work in palm leaf, in Malayāḷam characters belongs to Pandit P. Nilakantha Sarma, Principal, Pattambi Sanskrit College.

My Professor, Mahāmahopādhyāya Vidyāvācaspati Darśanakalānidhi S. Kuppuswami Sastrigal, Professor of Sanskrit and Comparative Philology in the Presidency College, Madras, with his usual kindness, encouraged me in this publication with his valuable advice and timely suggestions. My teacher Brahmaśrī S. K. Padmanabha Sastrigal of the Presidency College, Madras, was kind enough to read through the proofs and rectify several errors. Dr. C. Kunhan Raja and Brahmaśrī S. K. Ramanatha Sastrigal, my colleagues in office, have rendered me valuable help in this publication. It was through Dr. C. Kunhan Raja that I was able to secure the

ms. of the work from Pandit P. Nilakantha Sarma. Pandit S. K. Ramanatha Sastri read through the proofs in addition and I take this opportunity to express my deep obligations to them for the help they have rendered.

I am highly indebted to the Curator, Government Oriental Mss. Library, Madras, and the Director, Adyar Library for ungrudgingly allowing me the use of their libraries, by lending me the mss. whenever they were required. I thank Pandit P. Nilakantha Sarma for placing his ms. at my disposal till the completion of the printing of the work. I thank the Hindi Prachar Press for having printed the work neatly and to my satisfaction.

LIMBDI GARDENS.
MADRAS.
1—8—1933.

T. R. CHINTAMANI.

INTRODUCTION

The portion of the Prakriyāsarvasva now issued forms the commentary on the Uṇādi portion of Pāṇinīyan Vyākaraṇa. The Prakriyāsarvasva is made up of 20 sections, each being known as a Khaṇḍa. The twenty Khaṇḍas into which the work is divided is indicated in the following verses :—

इह संज्ञा[1] परिभाषा[2] सन्धिः[3] कृत्[4] तद्धिताः[5] समासाश्च[6] ।
स्त्रीप्रत्ययाः[7] सुबर्थाः[8] सुपां[9] विधिश्चात्मनेपद[10]विभागः ॥
तिङपि[11] च लार्थ[12] विशेषाः सनन्त[13]यङ्[14]यङ्लुकश्च[15] सुब्धातुः[16] ।
न्याय्यो[17] धातुरुणादिः[18][19] छान्दसमिति[20] सन्तु विंशतिः खण्डाः ॥

In the Uṇādi Khaṇḍa we find the author commenting upon practically the same text of the sūtras on which his predecessors Ujjvaladatta, Śvetavanavāsin and others have commented.

Particulars regarding Nārāyaṇa Bhaṭṭa, the author of the Prakriyāsarvasva have been set forth by the late lamented Mahāmahopādhyāya Dr. T. Ganapati Sastrin in his introduction to the Nārāyaṇīya[1] and they are repeated by Brahmaśrī T. Sambasiva Sastrin in his Introduction to the Prakriyāsarvasva,[2] Part I. They need not therefore be repeated here. Suffice it to say that he lived in the latter half of the 16th century. He completed the Prakriyāsarvasva in 1586 A. D. at the instance of king Devanārāyaṇa.

With regard to the text of the Uṇādi Sūtras on which he has commented, a few remarks are necessary.

---

1. T. S. S. No. 18.
2. T. S. S. No. 106,

etymology, are given at the end under the name Varṇā-nīti. It has been remarked in the preface to the Vṛtti of Śvetavana that these sūtras are older than Nārā-yaṇa, for they have been explained and elucidated by Śvetavana himself.

Details regarding the text of Nārāyaṇa and a comparison of this text with that of others will be set forth in the General Introduction in Part VII.

॥ श्रीः ॥

नारायणभट्टविरचिते प्रक्रियासर्वस्वे

॥ उणादिखण्डः ॥

प्रथमः पादः

॥ १ ॥ कृपावाजिमिस्वदिसाध्यशूभ्य उण् ॥ १—१ ॥

धात्वर्थमाश्रित्य भवन्त्युणादिका उणाद्यधीना निगमेऽपि च स्वराः ।
अतः कृदन्तर्गतमप्युणादिकं धातोः परं छान्दसतोऽपरं ब्रुवे ॥ १ ॥

क्वचित्सुयोजा धात्वर्थाः क्वाप्ययोज्या उणादिषु ।
क्वचित्कथंचिद्योज्याः स्युर्वक्ष्यन्ते तत्र तत्र ते ॥ २ ॥

अर्थं विनापि धातूक्तिर्व्युत्पत्त्यावश्यकात् कृता ।
कृत्तद्धितादिसिद्धाश्च स्वसिद्धाश्च पुनः क्वचित् ॥ ३ ॥

उच्यन्तेऽत्र हि पूर्वेषां मतभेदाविलुप्तये ।
व्युत्पत्तेश्च बहुत्वेन शब्दासन्देहसिद्धये ॥ ४ ॥

एभ्यः संज्ञायामुण् स्यात् । कृत्त्वात् कर्तरि । णित्त्वाद्वृद्धिः । करोतीति कारुः शिल्पी । "कार्यं कारुः" इति कर्तृमात्रेऽप्याह भट्टिः । "न लोक" इति षष्ठ्यभावः ॥ "आतो युक्" । देहरक्षकनिर्हारकृत्त्वात् देहं पातीति पायुः गुदम् ॥ वाति वायुः ॥ रोगान् जयति जायुः औषधम् ॥ मिनोति प्रक्षिपति अङ्गे पीडां मायुः पित्तम् । गोपूर्वादपि; गां खादित्वा प्रक्षिपति गोमायुः क्रोष्टा ॥ स्वदते स्वादुः ॥ साधयति सर्वं साधुः ॥ द्रागश्नुते प्राप्यं आशुः ॥

---

१. G omits -शू-
२. G भवत्यु-
३. A वरं.
४. GD omits इति.
५. G -रसकनीहार-
६. GD शुभम्.

॥ २ ॥ छन्दसीणः ॥ १—२ ॥

उण् स्यात् । गच्छन्तीति **आयवः** मर्त्याः ॥

इतः परं "ताभ्यामन्यत्रोणादयः" इति कर्मकरणाधिकरणभावेषु कर्तरि च उणादयः[1] यथार्हं स्युः । क्वचित् भीमादित्वादपादानेऽपि ॥

॥ ३ ॥ दृसनिजनिचरिचटिरहिभ्यो ञुण् ॥ १—३ ॥

ञित्वात् स्वरभेदः । द्व्यनुबन्धसामर्थ्यात् "जनिवध्योश्च" इति निषिद्धस्यापि जनेः वृद्धिः स्यात् । दीर्यते **दारुः** अर्धर्चादिः ॥ सन्यते संभज्यते मृगादिभिः **सानुः** ॥ जायते **जानु** ॥ चरति यशसा व्याप्नोति **चारुः** ॥ "चट प्रियवाक्ये" **चाटुः** ॥ अघोऽङ्गं त्यजति **राहुः** ॥ स्नश्च भोजः । स्नाति मज्जत्यङ्गे स्नायुरस्थिसङ्घातः ।

अस्माद्धातोरियं संज्ञा साद्ध्येति मुनिशासने ।
किंकुर्मोऽर्थान्वयः कश्चित् लब्धश्चेत्कृतिनो वयम् ॥ १ ॥
सदसद्वापि यत्किञ्चिदुक्त्वा व्युत्पाद्यमित्यदः ।
टीकासर्वस्वकारादिवचनं शरणं हि नः ॥ २ ॥

॥ ४ ॥ किञ्जरयोः श्रिणः ॥ १—४ ॥

किंपूर्वस्य शॄधातोः, जरापूर्वस्य इणश्च ञुण् । कुत्सितं शृणाति **किंशारुः** धान्यशूकं शरश्च ॥ प्रसवे जीर्णतामेति **जरायुः** ॥ "जराजटावनरसेष्विणः" इति भोजः । जटायुः । अयं सान्तोऽप्यस्ति ।

---

१. A,G and P omit **उणादयः**.
२. G **भौमा-**
३. G omits **-रहि-**
४. G omits **व्याप्नोति**.
५. GD adds **भावे**.
६. G **अथो-**
७. G **-व्युत्पा-**
८. G omits **ञुण्**.
९. G **शृणोति**.

[1]सान्तोऽप्ययमुदन्तेन विप्रिये[2] राममात्मना ।
जटायुः पङ्क्तिकण्ठेन सीता नीतेति वर्णयन्[3] ॥

वनायुः देशः ॥ रसायुः अली ॥

॥ ५ ॥ त्रो रश्च लः ॥ १—५ ॥

तॄधातोः ञुण् । वृद्धौ रस्य लश्च । प्लवते अस्मिन्नास्यजलं **तालुः** ॥ अन्येभ्योऽपीष्टम् । अर्तेः आलुः गलैकदेशः ॥ शॄधातोः शालुः हिंस्रः ॥ मृङ् । मालुः पत्रलता इत्यादि ॥

॥ ६ ॥ कृके वचः कश्च ॥ १—६ ॥

अन्त्यस्य कः । कृकं शिरोग्रीवम्, तेन वक्ति रौति **कृकवाकुः** कुक्कुटः ॥

॥ ७ ॥ भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः ॥ १—७ ॥

भरुः भर्ता ॥ म्रियन्तेऽत्र तृषा **मरुः** ॥ **शयुः** अजगरः ॥ [4]जले अर्पितः प्लवते **तरुः** ॥ भक्ष्यते **चरुः** ॥ मुष्टिर्गूढत्वात् व्याजेन गच्छति[6] **त्सरुः** खड्गादिमुष्टिः ॥ तनोति कर्माणि **तनुः** देहः; विस्तारस्य विपरीतलक्षणया कृशश्च ॥ **धनुः** चापम् ॥ **मयुः** किन्नरः ॥ [7]मस्जेः न्यङ्क्वादित्वात् जस्य कुः, सस्य जश्त्वम्, दः । [8]मज्जति **मद्गुः** जलवायसः[9] ॥ वटिचटिचञ्चिभ्यश्च भोजः । वटति वेष्टतेऽल्पेवस्त्रं[10] वटुः ॥ चटुः चाटुवत् ॥ चञ्चति चलति[11] चञ्चुः ॥

॥ ८ ॥ अणश्च ॥ १—८ ॥

उः स्यात् । [12]अण्यते शब्दमात्रेणोच्यते न क्रियोपयोगीति **अणुः** अल्पः ॥

---

१. GD and P omit this verse.
२. G विप्रियो.
३. G अवर्जयत्.
४. G omits जले अर्पितः.
५. A -कूट-
६. G, GD and P add इव.
७. G मस्जेन्त्य-
८. G omits मज्जति.
९. G पायसः.
१०. G, GD and P -स्यल्प-
११. G omits चलति.
१२. G अन्यते.

॥ ९ ॥ धान्ये नित् ॥ १—९ ॥

अणेः धान्येऽर्थे[1] उः नित्स्यात् । स्वरभेदः । अणुः व्रीहिभेदः ॥

॥ १० ॥ शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च ॥ १—१० ॥

उः नित्स्यात् । शरुः हिंस्रः ॥ पीडयत्यसुरान् स्वरुः वज्रम् ॥ स्नेहुः मित्रम् ॥ नीचभूषणत्वात् तद्धारणेन त्रपते त्रपु सीसम् ॥ [2]देहं प्रेरयन्तीति असवः ॥ वसन्त्यनेन वसुः ॥ हन्त्यत्र हनुः कपोलः ॥ क्लेदयति क्लेदुः चन्द्रः ॥ संबध्नाति बन्धुः ॥ जानाति मनुः ऋषिः । चिन्त्यते मनुः मन्त्रः[3] ॥ कैटि-[4]बिद्यन्धिभ्यश्च भोजः । कटत्यावृणोति रसान्तरं कटुः ॥ अवयवतया भवति बिन्दुः ॥ अन्धयत्यगाधत्वात् अन्धुः कूपः ॥

॥ ११ ॥ स्यन्देः संप्रसारणं धश्च ॥ १—११ ॥

स्यन्देरुर्नित्स्यात्[5] । यस्य इत्वं अन्त्यस्य धत्वं च । स्यन्दन्ते सर्वा[6] आपोऽत्र सिन्धुः ॥

॥ १२ ॥ उन्देरिच्चादेः ॥ १—१२ ॥

क्लेदयति इन्दुः ॥

॥ १३ ॥ इषेः किच्च ॥ १—१३ ॥

उँः कित्स्यात् । कित्वादगुणः । ईच्छन्[8] इषुः ॥

---

१. G -र्थे.

२. G omits this sentence and has instead असुः.

३. G omits मन्त्रः.

४. G काटाबिन्ध-

५. G -रुन्दी-

६. G सर्वानूपो-

७. G omits this sentence.

८. G यच्छन्
P गच्छन्

॥ १४ ॥ स्कन्देः सलोपश्च ॥ १—१४ ॥

शोषयन्त्यत्र कन्दुः पाकस्थानम् ॥

॥ १५ ॥ सृजेरसुम् च ॥ १—१५ ॥

अस्मादुः स्यात् । असुमागमो धातोः सलोपश्च । ऋ अस् ज् यण् । सस्य जश्त्वं चुत्वम् । सृज्यते रज्जुः ॥

॥ १६ ॥ कृतेराद्यन्तविपर्ययश्च ॥ १—१६ ॥

लघूपधगुणः । तर्कुः स्त्रीणां कनकभाण्डम् ॥

॥ १७ ॥ नावञ्चेः ॥ १—१७ ॥

उः स्यात् । "न्यङ्क्वादीनां च" इति कुः । न्यङ्कुः मृगः ॥

॥ १८ ॥ फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च ॥ १—१८ ॥

एभ्य उः स्यात् । फलेर्गुगागमः । पाटिनम्योः पटिनाकी सर्वदिशौ । मनिजन्योः धतावन्तादेशौ । [illegible] फल्गु ॥ "पट गतौ" पाटयति बोधयति पटुः खण्डयति परान् वा ॥ उन्नमति नाकुः वल्मीकः ॥ मन्यते काङ्क्ष्यते मधु ॥ तत्तद्विकारात्मना जायत इति जतु ॥

॥ १९ ॥ वलेर्गुक् च ॥ १—१९ ॥

वलते सम्यग्याति वल्गुः ॥

॥ २० ॥ [4]शः कित्सन्वच्च ॥ १—२० ॥

---

१. G adds असुमागमो धातोः.

२. G सर्वे-

३. G omits this sūtra and commentary.

४. G omits this sūtra and commentary up to सन्वत्त्वा-

शाधातोः उः कित् सन्वच्च स्यात्। सन्वत्वात् द्वित्वम्। अभ्यासस्येत्वम्। कित्वादाल्लोपः। तनूकृतत्वात् शिशुः॥

॥ २१ ॥ यो द्वे च ॥ १—२१ ॥

यातेः उः कित्स्यात्, द्वित्वं च। ययुः अश्वमेधाश्वः॥

॥ २२ ॥ कुर्भ्रश्च ॥ १—२२ ॥

भृञः कुप्रत्ययः द्वित्वं च। यण्। बभ्रुः वर्णभेदः॥ हन्कृञ्पॄभ्यः कुः द्वित्वं च भोजोक्तम्[1]। जघ्नुः इन्द्रः॥ चक्रुः विष्णुः[2]॥ उरदत्वम्[3]। "उदोष्ठ्यपूर्वस्य" इति धातोरुत्वम्। पूर्णत्वात् पपुरुः[4] समुद्रः॥ त्रायतेऽम्भसि तत्रुः नौः॥

॥ २३ ॥ पॄभिदिव्यधिगृधिधृषिदृशिभ्यः ॥ १—२३ ॥

कुः स्यात्। "उदोष्ठ्यपूर्वस्य" इत्युत्वम्। पालयति पुरुः[5] नृपः। पूरयति पुरु[6] बहु॥ भिदुः वज्रम्॥ व्यधेः "ग्रहिज्या" इत्यादिना इत्वम्। विध्यति करैः विरहिणं विधुः चन्द्रः; दैत्यान् विद्धयतीति विष्णुश्च॥ गृधुः कामः॥ धृषुः धृष्टः॥ दृशुः सूर्यः॥ विदिहृषिकाभ्यश्च भोजः। वेत्ति गजोऽङ्कुशाघाताभिप्रायानत्वेति विदुः गजकुम्भमध्यम्॥ हृषुः हृष्टः॥ आल्लोपः। कायते पञ्चभूतेषु मुख्यतया शब्दयते कुः भूमिः॥

॥ २४ ॥ कृग्रोरुच्च ॥ १—२४ ॥

आभ्यां कुश्च उच्चैः[7]। क्षिपति शत्रून् कुरुः॥ गृणाति[8] वदति गुरुः।

---

१. A and G omit भोजोक्तम्.
२. A and G इन्द्रः.
३. G उदरत्वं.
A उरत्वं.
४. G बबुरुः.
५. G पूरुः.
६. G पूरु.
७. G उश्च.
८. G गृह्णाति.

गिरत्यन्तर्भावयति घनांशानिति गुरु पाषाणादि ॥ "पचेरिच्चोपधायाः" इति भोजः । पिचुः कार्पासः ॥

॥ २५ ॥ अपदुस्सुषु स्थः ॥ १—२५ ॥

सुषामादित्वात् षः । असम्यक् तिष्ठति **अपष्ठुः** आचारभ्रष्टः ॥ एवं **दुष्ठु** अशोभनम् ॥ **सुष्ठु** शोभनम् ॥

॥ २६ ॥ रपेरिच्चोपधायाः ॥ १—२६ ॥

रपेः नानार्थत्वात् हिनस्ति **रिपुः**; दुर्वादान् वदति वा ॥

॥ २७ ॥ अर्जिदृशिकम्यमिपं[1]सिबाधामृजिपशिं[2]तुग्बुं[3]ग्दीर्घहकाराश्च ॥ १—२७ ॥

एभ्यः कुं[4]ः क्रमादृज्यादयश्च । अर्जिदृशोः ऋजिपशी[5] सर्वादेशौ । "अर्ज प्रतियत्ने" [illegible] आहितोऽत्र **ऋजुः** ॥ पश्यति दृष्टमेव वेत्ति[6] **पशुः** ॥ कम्[7]यमोस्तुग्बुकौ । **कन्तुः** कन्दर्पः ॥ "अम गतौ" **अम्बु** ॥ पंसेः दीर्घः । पंसयति नाशयति[8] दृष्ट्यादिकं **पांसुः** ॥ बाधेः हः । **बाहुः** ॥ भोजेन[9] कमेश्च[10] बुगुक्तः । कमनीयत्वात् कम्बुः ॥

॥ २८ ॥ प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ॥ १—२८ ॥

पृथुः ॥ आशु म्रयते **मृदुः** ॥ सलोपे न्यङ्क्वादित्वात् कुः । परिपक्वधीः

---

१. G-पशि-
२. G-पसि-
३. G धुक्.
४. G omits कुः.
५. G ऋजिवशी.
६. G वेति.
७. G कम्यमौ-
८. G omits नाशयति.
९. A भोजने.
१०. G omits च.

भवति भृगुः मुनिः; भृज्यते[1] आतपैरिति गिरिशृङ्गं च ॥ रभेश्च[2] संप्रसारणं भोजोक्तम् । आरभन्ते लोकहितार्थं[3] ऋभवः देवाः ॥

॥ २९ ॥ रङ्घिलङ्घिबंहिभ्यो[4][5] नलोपश्च ॥ १—२९ ॥

जनैः गम्यते रघुः नृपः ॥ तूर्णं गच्छति लघुः ॥ वर्धते बहुः ॥

॥ ३० ॥ ऊर्णोतेर्णुलोपश्च ॥ १—३० ॥

वस्त्रेण छाद्यते ऊरुः ॥

॥ ३१ ॥ महति ह्रस्वश्च ॥ १—३१ ॥

छादयत्यन्यत् उरुः । "ऋक्षेरो ईश्च[6]" इति भोजः । छादयन्ति नभः छाद्यन्ते वा मेघाद्यैः[7] उडूनि ॥

॥ ३२ ॥ श्लिषेः कश्च ॥ १—३२ ॥

कुः अन्त्यस्य कश्च । श्लिक्कुः व्यवसायवान् ॥

॥ ३३ ॥ आङ्परयोः खनिशॄभ्यां डिच्च ॥ १—३३ ॥

कुः डित् स्यात् । टिलोपः । आ खनति भुवं आखुः ॥ परं[8] शृणातीति परशुः ॥ "द्युद्रुभ्यां[9] च" इति भोजः । डित् । कुः स्यात् । अभिगम्यते द्युः स्वर्गः ॥ फलाद्यर्थं द्रवन्त्येनं द्रुः वृक्षः ॥

---

१. G भज्यते.
२. G भेश्च-
३. G एकार्थमृभो-
४. G omits रङ्घि-
५. G बंह्योः.
६. -रौद्धश्च.
A रोधश्च.
७. A द्यरुडूनि.
८. P परान् शृणाति.
९. G omits -द्रु-

॥ ३४ ॥ हरिमितयोर्द्रुवः ॥ १—३४ ॥

डित् कुः स्यात् । हरिद्रुः वृक्षः ॥ मितद्रुः मितंगमः ॥

॥ ३५ ॥ शते च ॥ १—३५ ॥

शतधा द्रवति[1] शतद्रुः नदः ॥ कच्छब्दे च भोजः । कद्रुः ॥

॥ ३६ ॥ खरुशङ्कुपीयुनीलङ्गुलिग्वङ्गुपङ्गु-हिङ्गुशवः ॥ १—३६ ॥

एते निपात्यन्ते । खनति तुदत्यङ्गं[3] खरुः परुषः ॥ शङ्कते अध्वगः अस्मात्[4] शङ्कुः ॥ पीयुः उलूकः ॥ नीलङ्गुः क्रिमिः ॥ लिगुः[5] मुनिः ॥ अङ्गुः देहावयवः । तत्र[6] स्थितत्वादङ्गुष्ठता ॥ हन्ति रोगान् हिङ्गुः ॥ [अंशुः[7] ॥]

॥ ३७ ॥ मृगय्वादयश्च ॥ १—३७ ॥

मृगान् यातीति[8] मृगयुः ॥ एवं देवयुः धार्मिकः ॥ असहायो याति केवलयुः मानी ॥ मित्रयुः मित्रप्रियः ॥ अध्वर्युः ॥ ईर्ष्यावान् ईर्ष्युः ॥ असूयुः ॥ सुम्नयुः यजमानः ॥ अस्मयुः ॥ गृहयुः गृहपतिः ॥ मन्त्रयुः मन्त्री ॥

॥ ३८ ॥ मन्दिवासिमथिचतिचङ्क्यङ्किभ्य उरच् ॥ १—३८ ॥

मन्दतेऽस्यामश्वो मन्दुरा ॥ वासयति जनान् वासुरा रात्रिः । "मन्दिवाशि" इति माधवपाठः । वाशुरा[9] ॥ मथ्यन्ते शत्रवोऽत्र मथुरा पुरी ॥

---

१. G द्रवन्ति.
२. G -लिगुलिङ्गङ्गु-
३. GD अंहः.
४. G अस्मात् अध्वगः.
५. A, G and GD लिङ्गुः.
६. G, GD and P यत्र.
७. The word within brackets is omited in all mss.
८. G, GD and P omit इति.
९. G वाशि.

चेतति[1] याचनेनापीष्टं साधयति **चतुरः** ॥ "चङ्किः" सौत्रः गतौ । **चङ्कुरः** रथः ॥ अङ्कयति भुवं[2] **अङ्कुरः** ॥

॥ ३९ ॥ व्यथेः संप्रसारणं धः[3] किच्च ॥ १—३९ ॥

अन्त्यस्य धः । कित्वादगुणः । **विधुरः** ॥

॥ ४० ॥ मकुर[4]दर्दुरौ च ॥ १—४० ॥

दर्पण[5]भेकयोः निपात्यते । मङ्क्यते मण्ड्यतेऽनेन **मकुरः** ॥ दृणाति शब्दैः कर्णौ **दर्दुरः** ॥ भोजस्त्वाह "मुर्मुर[6]मुकुरदर्दुरचिकुरकुक्कुर[7]कुकुरकुकुन्दु[8]रोन्दुरनूपुरविथुरमद्गुरवागुरादयः" । मारयत्यसह्यत्वात् मुर्मुरःतुषाग्निः ॥

अकारं मुकुरस्यादौ उकारं दर्दुर[9]स्य च ।
बभाण पाणिनिस्तौ तु व्यत्ययेनाह भोजराट् ॥

"चक तृप्तौ" तर्पयति द्रष्टॄन् चिकुरः ॥ "कुक आदाने" आदत्ते मांसदीन् कुक्कुरः श्वा । कुरति भषति कुकुर इति केचित् ॥ कुकुरः[10] यादवः ॥ कुकुन्दुरौ नितम्बकूपकौ ॥ मुखाम्बुना खनितव्यमुदन् उन्दुरः मूषिकः ॥ नौति ध्वनति[11] नूपुरः ॥ व्यथयति विथुरः राक्षसः ॥ माद्यति मद्गुरः मत्स्यभेदः ॥ वान्ति गच्छन्त्येनां मृगा वागुरा ॥ आदिशब्दात् निष्ठुराद्या इति ॥

॥ ४१ ॥ असेरुरन् ॥ १—४१ ॥

क्षिपति देवान् **असुरः** ॥

---

१. G चतति.
२. G भुव-
३. G omits धः.
४. G मुकु-
५. G omits this sentence.
६. P मर्मर-
७. P omits -कुक्कुर-
८. A कुकुन्दर.
९. G दुर्दु-
१०. G कुक्कुरो-
११. G and P स्वनति.

॥ ४२ ॥ मसेश्च ॥ १—४२ ॥

मसुरा वेश्या ॥

॥ ४३ ॥ शावशेराप्तौ ॥ १—४३ ॥

शुपूर्वात् व्याप्त्यर्थात् अशेरुरन् । शुशब्दः पूजार्थोऽव्ययम् । पूजां प्राप्नोति श्वशुरः । "------- श्वशुरः" इति भाष्योक्तेः आल्लोपो वा ॥

॥ ४४ ॥ अविमह्योष्टिषच् ॥ १—४४ ॥

अविषः समुद्रः ॥ पूज्यत्वात् महिषी देवी । अपूज्यत्वात् महिषः पशुः ॥

॥ ४५ ॥ अमेर्दीर्घश्च ॥ १—४५ ॥

-------- अजीर्ण्या वा भोक्तारं रुजति आमिषम् ॥

॥ ४६ ॥ रुहेर्वृद्धिश्च ॥ १—४६ ॥

रोहति [2]गिरिशृङ्गं रौहिषः मृगः ॥

॥ ४७ ॥ तवेर्णिद्वा ॥ १—४७ ॥

तविषं ताविषं च बलम् । टित्वात् ङीबृद्धिः ॥

॥ ४८ ॥ नञि व्यथेः ॥ १—४८ ॥

अव्यथिषः सूर्यः ॥

॥ ४९ ॥ किलेर्बुक् च ॥ १—४९ ॥

किलन्ति क्रीडन्ति अनेन खलाः किल्बिषम् ॥

---

१. G शावसे-
२. G गुरु-
३. G द्धम्.
४. G खगाः.

॥ ५० ॥ इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमि[1]हिमुहिमिहिमुचिरुचिरुधिशुषिबन्धि[2]भ्यः किरच् ॥ १—५० ॥

[illegible] । इषिरः क्षिप्रः ॥ मदयति मदिरम् ॥ मो[3]दन्तेऽनेन मुदिरः मेघः ॥ खिद्यन्ते विरहिणोऽनेन खिदिरः चन्द्रः ॥ छिन्नत्वात् छिदि[4]रः छिद्रम् ॥ [5]भिदिरं वज्रम् ॥ मन्दन्तेऽस्मिन् मन्दिरम् ॥ [6]चन्दति चन्दिरः हस्ती ॥ आर्द्रीभूतमिव व्याप्नोति तिमिरम् ॥ मह्यते महिरं विचित्रम् ॥ मुह्यन्त्यस्मात् खलाः मुहिरं पवित्रम् ॥ वर्षोत्स्रष्टृत्वात् मेहति सिञ्चति मिहिरः सूर्यः ॥ मुचिरः मोक्षः ॥ दीप्यते स्वदते वा रुचिरम् ॥ रुणद्ध्यस्थ्यादिकं रुधिरम् ॥ शुष्यति शुषिरं काष्ठं विवरं च ॥ कित्वात् नलोपः । श्रोत्रं बद्धं रुद्धमस्मिन् बधिरः ॥

॥ ५१ ॥ अशेर्णिच्च ॥ १—५१ ॥

व्याप्नोति आशिरः सूर्यः । “ अशेर्निच्च ” इति पाठे अशिरः सूर्यः ॥

॥ ५२ ॥ अजिरशिशिरशिथि[7]रस्फिरस्थविरखदिराः ॥ १—५२ ॥

यान्त्यत्र अजिरम् ॥ शशति गच्छति शिशिरः कालः ॥ श्लथते शिथिरं श्लथम् । रलयोरभेदात् शिथिलम् ॥ तिष्ठति चिरं स्थिरम् ॥ स्फायतेः स्फिरं प्रभूतम् ॥ ष्ठीव्यते निरस्यते जनैः स्थविरः ॥ “ खद स्थैर्ये ” खदिरः ॥ कविरसरिरौ च भोजः । क्रमादक्षिरोगो जलं च ॥

---

१. G omits महि.

२. G omits बन्धि-

३. A, G and GD omit मोदन्तेऽनेन.

४. G -द्रम

५. G भिदुरं.

६. GD and P चन्दयति.

७. G -शिथिल-
A, P and GD add-शिबिर.-

॥ ५३ ॥ सलिकल्यनिमहि[1]भटिभण्डि[2]चण्डिशण्डिपिण्डि[3]तुण्डि-
कुकिभूभ्य इलच् ॥ १५—३ ॥

"षल कान्तौ" काम्यते **सलिलम्** ॥ कल्यते रजोभिः **कलिलम्** ॥ प्राणन्त्यनेन **अनिलः** ॥ मह्यते **महिला** । "महेरेलच्" इति भोजः । [4]महेला ॥ **भटिलः** भृत्यः ॥ **भण्डिलः** दूतः ॥ **चण्डिलः** नापितः[5] ॥ **शण्डिलः** ऋषिः ॥ पिण्डयति संख्याः **पिण्डिलः** गणकः ॥ तुण्डते[6] पीडयति वाग्भिः **तुण्डिलः** बहुभाषी ॥ आदत्ते जनमनांसि **कोकिलः** ॥ **भविलः** भव्यः ॥

॥ ५४ ॥ [7]कपेश्च ॥ १—५४ ॥

"[8]कप च्छादने" छादयति वर्णान्तरं **कपिलः** ॥

॥ ५५ ॥ गुपादिभ्यः कित् ॥ १—५५ ॥

गुपिलः[9] पक्षिभेदः ॥ कुटिलम् ॥

॥ ५६ ॥ मिथिलादयश्च ॥ १—५६ ॥

"मिथृ मेथृ सङ्गमे" इति पाठात् संगच्छन्तेऽत्रेति **मिथिला** । भोजोक्तौ तु स्थलति प्रतितिष्ठत्यत्र शुद्धद्रव्यमिति । लस्य डत्वे नुमि च स्थण्डिलः[10] ॥ विशेषेण [11]तर्पयति गन्धैः विचकिलः मल्लिकाभेदः ॥ गोभिलः ऋषिः ॥ निकुम्भिला गुहा ॥

॥ ५७ ॥ [12]पथिकथिकुठिगडिगुडिदंशिभ्य एरक् ॥ १—५७ ॥

---

१. A and G -भद्रि-
२. G omits -चण्डि-
३. G omits -तुण्डि-
४. G महिला.
५. G नावितः.
६. G and P तुण्डयते.
७. G कमेः पश्च.
८. G omits कप.
९. G गुपिकः.
१०. G and GD -लम्.
११. G कल्प-
१२. G पतिकठि-

पथेरः गन्ता ॥ **कथेरः** कथकः ॥ **कुठेरः** आर्जकः । **गडेरः** मेघः ॥ **गुडेरः** राजा ॥ कित्वात् नलोपः । **दंशेरः**[1] उष्ट्रजातिः ॥

॥ ५८ ॥ कुम्बेर्नलोपश्च ॥ १—५८ ॥

छादयति धनं **कुबेरः** ॥

॥ ५९ ॥ शदेस्त च ॥ १—५९ ॥

शतेरः नदीभेदः ॥

॥ ६० ॥ मूलेरादयश्च ॥ १—६० ॥

मूलेरं पण्यम् ॥ आदिग्रहणात् पतेरः पक्षी ॥ कटेरः[2] दुःखितः ॥ सतेरः वायुः ॥ मुदेरः मूर्खः ॥ कवेरः गिरिः ॥ नालिकेरम् ॥ शृङ्गिबेरम् ॥

॥ ६१ ॥ कठिचकिभ्यामोरच् ॥ १६—१ ॥

कृच्छ्रं जीवति **कठोरः** क्रूरः ॥ ज्योत्स्नया तृप्यति **चकोरः**; तर्पयति द्रष्टॄन् वा ॥

॥ ६२ ॥ किशोरादयश्च ॥ १—६२ ॥

"कश गतिशासनयोः" शास्यते **किशोरः** ॥

॥ ६३ ॥ कपिकडिगण्डिकटिपटिभ्य ओलक्[3] ॥ १—६३ ॥

छादयति दन्तादीन् **कपोलः** ॥ **कडोलः** मकरद्रव्यभेदः[4] ॥ **गण्डोल-कटोलपटोलाः** लताभेदाः ॥ बहुलमन्यत्रापि । तेन कल्लोलतक्कोलौ ॥ मक्कोलः सुधाभेदः ॥

---

1. G देशेरः.
2. G -रः.
3. G ओलच्.
4. G omits -द्रव्य-

॥ ६४ ॥ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ॥ १—६४ ॥

बध्यते सेतुः[१] ॥ तन् तुन् । वलादित्वात् इटि प्राप्ते "तितुत्र" इति निषेधः । तन्तुः ॥ गन्तुः गन्ता । आगन्तुः अतिथिः ॥ परिणतत्वात् मस्तु दधिखण्डः ॥ मिश्रीभवति सेव्यते वा सक्तुः[२] ॥ अव तुः । "ज्वरत्वर" इत्यत्र "क्ङिति" इत्यनुवृत्त्यभावात् उपधावकारयोरूडिति माधवः । ऊ तु । "सार्वधातुक" इत्यादिना[३] गुणः । रक्षत्यात्मानं ओतुः ॥ अभिदधाति अर्थं धातुः ; धीयते देहेन गिरिणा वेति शुक्लादौ गैरिके च ॥ क्रुशेः गुणे शस्य षत्वे ष्टुत्वे क्रोष्टु-शब्दः ॥ पूङश्च भोजः । पोतुः पविता ॥

॥ ६५ ॥ पः किच्च ॥ १—६५ ॥

कित्त्वात् "घुमास्था" इति ईत्वम् । पिबति जलं पीतुः सूर्यः ॥ अञ्जेश्च भोजः । कित्वात् नलोपः । कुत्वम् । अनक्ति हिमेन अक्तुः निशा ॥

॥ ६६ ॥ मीनातेरूरन् ॥ १—६६ ॥

गुणः । हिनस्ति सर्पान् मयूरः ।
मध्योदात्तो मयूरोऽयमिष्टो नित्वान्न सिद्ध्यति ।
तस्मादूरान्त एवोक्तो मयूरो भोजभूभुजा ॥

॥ ६७ ॥ अर्तेस्तुः[४] ॥ १—६७ ॥

अत्र[५] किदिति वर्तते । गच्छति ऋतुः ॥

॥ ६८ ॥ कमिमनिजनिगाभायापा[६]हिभ्यश्च ॥ १—६८ ॥

---

१. G सेत् कन्तु.
२. G सन्कुः.
३. GD इति.
४. G अर्तेश्च तुः.
५. A अकिदिति.
६. G omits-पा-

तुः स्यात्। क्नन्तुः कुसूलः। अर्थभेदात् पौनरुक्त्यम्॥ असह्यत्वात् सततं निरूप्यते मन्तुः अपराधः॥ जन्तुः॥ गातुः गायकः॥ भातुः सूर्यः॥ यातु रक्षः॥ पातुः त्राता॥ ण्यर्थवृत्तेः हेः[1] अवगमयत्यर्थम्, वर्धयति कार्यं वा हेतुः॥ असेश्च भोजः। अस्तुः अस्तिभावः॥

॥ ६९ ॥ चायः की च[2] ॥ १—६९ ॥

दृश्यते केतुः ध्वजः॥

॥ ७० ॥ आप्नोतेः ह्रस्वश्च ॥ १—७० ॥

अप्तुः अग्निः॥

॥ ७१ ॥ वसेस्तुन्[3] ॥ १—७१ ॥

वस्तु॥

॥ ७२ ॥ अगारे णिच्च ॥ १७—२ ॥

वसन्त्यत्र वास्तुः॥

॥ ७३ ॥ कृञः क्रतुः ॥ १७—३ ॥

[4]कित्त्वादगुणे यङ्। क्रियते क्रतुः॥

॥ ७४ ॥ एधिवह्योश्चतुः[5] ॥ १—७४ ॥

चित्त्वं स्वरार्थम्। एधतुः पुरुषः॥ उद्वहन्त्यनेन वहतुः स्त्रीधनम्॥

॥ ७५ ॥ जीवेरातुः ॥ १—७५ ॥

जीवातुः॥

---

1. G, and GD हेतुपगम-
2. G किश्च.
3. G, GD and P वस-
4. G adds कशुः.
5. G D -वह्रो-

॥ ७६ ॥ आतृकन् वृद्धिश्च ॥ १—७६ ॥

जैवातृकः चिरजीवी । जीवन्त्यनेन देवा इति इन्दुश्च ॥

॥ ७७ ॥ कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ॥ १—७७ ॥

कर्षूः कण्डूः ॥ भक्षयत्यरीन् चमूः ॥ तनूः ॥ धनूः शरः ॥ "षर्ज आर्जने" । सर्जूः[1] वणिक् ॥ खर्जयति पीडयति खर्जूः कण्डूः ॥ कन्देश्च भोजः । कन्दति[2] शब्दायते[3] कन्दूः पादकटकः ॥

॥ ७८ ॥ मृजेर्गुणश्च ॥ १—७८ ॥

मर्जूः रजकः । रज इति केचित्[4] ॥

॥ ७९ ॥ खडेश्च ॥ १—७९ ॥

खडूः मृतशय्या । "खड्यज्योः डुक्जुकौ च" इति भोजः । खड्डूः बालानामाभरणम् ॥ अज्यते प्राप्यते पुत्रैः अज्जूः जननी ॥

॥ ८० ॥ [5]वहो धश्च ॥ १—८० ॥

उह्यते वधूः ॥

॥ ८१ ॥ कषेश्छश्च ॥ १—८१ ॥

कष्यते नखैः कच्छूः पामा ॥

॥ ८२ ॥ णित्कसिपद्यर्तेः ॥ १—८२ ॥

---

१. G सजूः.

२. G, GD and P कन्दते.

३. P अतिशब्दा-

४. A, P and GD अन्ये.

५. A, P and GD वहेः.

ऊः णित्स्यात् । [1]वृद्धिः । गच्छति कामूः शैक्तिः ॥ पद्यतेऽनया पादूः उपानत् ॥ आरूः वृक्षभेदः ॥

॥ ८३ ॥ [3]अणो डश्च[4] ॥ १—८३ ॥

[5]अणेः ऊः णित्स्यात् । [6]ईश्चान्तादेशः । आड्डूः भृङ्गारः ॥ लत्वं चाह भोजः । आलूः भृङ्गारः ॥ अत्र णिदित्यननुवृत्तेः अड्डूः जलतरणीति माधवः ॥

॥ ८४ ॥ नञि लम्बेर्नलोपश्च ॥ १—८४ ॥

णित्त्वात् वृद्धिः । अलाबूः ॥

॥ ८५ ॥ के श्र एरङ् चास्य[7] ॥ १—८५ ॥

ऊः । ऋत एरङ् च । कशेरूः वीरुद्भेदः ॥

॥ ८६ ॥ त्रो [8]डुक् च ॥ १—८६ ॥

प्लवते व्यञ्जनेषु तर्डूः दर्विः ॥ भोजमते त्रो[9] दुक् च । तर्दूः [10]दर्विः ॥

॥ ८७ ॥ दरिद्रायालोपश्च ॥ १—८७ ॥

दरिद्रा इत्यस्य इआवर्णयोः लोपः ऊ[11]श्च स्यात् । दरिद्राति क्षीणो भवत्यनया [12]दर्द्रूः कुष्ठभेदः । "दरिद्राते[13]र्यालोपश्च" इति पाठे दर्द्रूः[14] ॥

---

1. G omits वृद्धिः......वृक्षभेदः.
2. GD गतिः.
3. G अणोः.
4. P ड च.
5. G omits अणेः......डश्च.
6. P डान्ता-
7. P चास्ये.
8. G दुट् च.
9. A and G त्रो डुक्.
10. G दर्वी.
11. G ऊ च.
12. G and P ददूः. GD दद्रुः.
13. G, GD and A -स्यालोपश्च.
14. G तद्रूः.

॥ ८८ ॥ नृतिशृध्योः कूः ॥ १—८८ ॥

कित्त्वादगुणः । नृतूः नर्तकः ॥ [1]शृधूः दीनवाक् । [1]शृधूः प्रज्ञा इत्येके ॥ कुहेश्च भोजः । तमसा सर्वाच्छादनात् कुहनां करोति[2] इति कुहूः ॥

॥ ८९ ॥ [3]ऋतेरं च ॥ १—८९ ॥

ऋतेः कूस्यात्, अमागमश्च । यण् । रम्रूः नाम नदी ॥

॥ ९० ॥ अन्दूदृम्भूजम्बूकफेलूकर्कन्धू-दिधिषूः ॥ १—९० ॥

"अदि बन्धने" अन्दूः पादनिगलः ॥ दृम्भूः सर्पजातिः ॥ जम्यते भक्षयते जम्बूः ॥ कफेलूः श्लेष्मातकः ॥ कर्कन्धूः बदरी ॥ दधात्येनां पुनरपि दिधिषूः [5]द्विरूढा स्त्री ॥ [6]चपेर्नुं च इति भोजः । "चप सान्त्वने" मधुरं वदति चम्पूः प्रबन्धभेदः ॥

॥ ९१ ॥ मृग्रोरुतिः ॥ १—९१ ॥

[7]उतेरिकार इत् । गुणः । नानार्थत्वात् म्रियते गच्छति मरुत् वायुः । न म्रियन्ते देवाः ॥ गिरति छादयत्यङ्गं गरुत् ॥

॥ ९२ ॥ [8]गर्मुच्च ॥ १—९२ ॥

गिरन्त्येनं गर्मुत् श्यामाकः ॥

---

१. GD गृ-
२. GD adds इव.
३. G and GD omit इति.
४. G ऋतेरश्च.
५. G ऊढा.
६. G चवेर्नुंञ.
७. G omits उ.
८. G-द् च.
P गर्मुं च.

॥ ९३ ॥ हृषेरुलच् ॥ १—९३ ॥

“ --------किशङ्क्य[1]त्कण्ठिभ्य उलच्[2] ” इति भोजः । हर्षुलः हर्षवान् ॥ वर्तुलः ॥ चटुलः ॥ शक्नोति धावितुं शकुलः मत्स्यः ॥ शङ्क्यते[3]ऽस्मात् शङ्कुला खण्डिनी[4] ॥ उत्कण्ठुलः उत्कण्ठावान् ॥ “ निचुलवञ्जुलबकुलतुमुलपृथुलस्थूलविसंस्थुलादयः ” इति च । निजेश्चत्वम् । निज्यते क्षाल्यते जलैः निचुलैः[5] ॥ वजेर्नुम् । वजति चलति जले वञ्जुलः ॥ “ बद स्थैर्ये ” दस्य कः । स्थिरत्वात् बकुलः ॥ ताम्यन्त्यस्मिन् जनाः तुमुलं भयानकम् ॥ तिष्ठन्त्यत्र [6]स्थुलः [7]वैटकुटीभेदः ॥ विविधं तिष्ठति विसंस्थुलः व्याकुलः । [8]शंसेर्विशं[9]स्थुल इति नाथः ॥

॥ ९४ ॥ हृसृरुहियुषिभ्य इतिः[10] ॥ १—९४ ॥

मनोहारितया हरित् वर्णः ॥ सरित्[11] ॥ रोहित् मृगः ॥ युषिः सौत्रः[12] यौत्यर्थः । मिश्रीभवति पुंसा योषित् ॥

॥ ९५ ॥ [13]ताटेणिलुक् च ॥ १—९५ ॥

णिलुकि “ न लुमता ” इति वृद्ध्यभावः । चौरादिकः “ तट आघाते ” इति टान्तोऽयं वृत्तावुक्तः । आहन्ति दृष्टिं वृक्षादीन् वा तटित् । “ ताडेः ” इति भोजमतम् । तडित् ॥

॥ ९६ ॥ षणेर्डः ॥ १—९६ ॥

---

१. G -शक्यु-
२. G उलः.
३. P शङ्कते.
४. GD and P बन्धनी.
५. G -ला.
६. GD स्थलः.
७. GD and P पट-
८. GD शसेः.
९. G -सां-
१०. GD and A omit visarga.
११. A space is left out for writing this word.
१२. G इति सौत्रो धातुः.
१३. G ताडे-

“षण संभक्तौ”। बाहुलकात् षस्सो न। न सेव्यते स्त्रीभिः **षण्ढः**। “शमेर्ढः” इति केचित्। शाम्यति शण्ढोऽपि क्लीब एव ॥ कुणेश्च भोजः। [1]कुण्ढः धूर्तः ॥ “[2]नञि सहेः षश्चादेः” इति च। [3]षह् ढ। “हो ढः”। ढो ढे लोपः। दीर्घः। न सहतेऽन्यानभिमानि[4]र्नक्षत्रत्वात् अषाढा ॥

॥ ९७ ॥ **कमेरठः** ॥ १—९७ ॥

[5]कमनीयत्वात् **कमठः**। “जॄकमि[6]रमिभ्योऽठः” इति भोजः। [7]जरठः ॥ रमठः देशः ॥

॥ ९८ ॥ **कलतृपश्च** ॥ १—९८ ॥

तृपेः कमेश्च कलप्रत्ययः। **तृपला** लताभेदः ॥ काम्यते **कमलम्** ॥ कुयमिकुविशलिकलिपलिभ्यश्च भोजः। कित्त्वादगुणः। उवङ्। कुवली बदरी ॥ यमलं युग्मम् ॥ कुवलः प्रवालः ॥ शलति पतति शललं शल्यरो[8]र्म ॥ बध्यते कललं गर्भाद्यवस्था ॥ पलति गच्छति देहात् पललं खण्डितमांसम् ॥

॥ ९९ ॥ [9]**शपेर्बश्च** ॥ १—९९ ॥

शबलः ॥

॥ १०० ॥ **वृषादिभ्यश्चित्** ॥ १—१०० ॥

कलश्चित् स्यात्। सिञ्चति सस्यादिकं **वृषलः** ॥ आदिग्रहणात् पटिदेविकेविवपिभ्यः। पटति व्याप्नोति पटलम् ॥ व्यवहरति पूजया देवलः ॥

---

१. G **कुण्ढा.**
२. G **न सहेः.**
३. G **षड् ढ.**
४. G **-मानिनः.**
५. G omits this sentence.
६. G omits **-रमि-**
७. G omits **जरठः...........भोजः** in the commentary on the next sūtra.
८. G **रोमः.**
९. G **शवेश्च.** A **शवेर्बश्च.**

" केवृ सेवने" निरपेक्षत्वान्नसेवतेऽन्यान्, सहायार्थं सेवतेऽन्यान् वा केवलः ॥ वपेः यजादित्वात् किति [1]संप्रसारणम् । उप्यते अर्प्यते भूमौ उपलः ॥

॥ १०१ ॥ मृजेष्टिलोपश्च ॥ १—१०१ ॥

[2]कलश्चित् स्यात् । मृज्यते मलम् ॥

॥ १०२ ॥ चुपेरच्चोपधायाः ॥ १—१०२ ॥

कलश्चित् स्यात् । चोपति चलति चपलः ॥

॥ १०३ ॥ शकिश[3]म्योर्नित् ॥ १—१०३ ॥

शक्यते ग्रहीतुं शकलम् ॥ शमनीयत्वात् शमलं दोषः ॥

॥ १०४ ॥ भ्रमिमस्योरुच्चोपधायाः ॥ १—१०४ ॥

[4]भ्रुमलम् अक्षिरोगः ॥ मुसलः ॥

॥ १०५ ॥ कम्बलादयश्च ॥ १—१०५ ॥

काम्यते कम्बलः ॥ शम्बलः पाथेयम् ॥ अत्र भोजः—" मृदिमण्डि-[5]कुण्डिकन्दिभ्योऽलच् " मृद्यते करेण मर्दलः । "अरोदि[6] भेरीभिरनर्दि मर्दलैः" इति प्रयोगः । " मद्दल इति कवयः " इति[7] स्वामी ॥ मण्ड्यते वर्तुलताभङ्ग्या मण्डलम् ॥ कुण्ड्यते दह्यते निर्माणे कुण्डलम् ॥ कन्द्यते मृदुत्वात् पीड्यते कन्दलः ॥ " लङ्गेर्दीर्घश्च " । भुवि गच्छति लाङ्गलं[8] हलम् ॥ " ऋजनोर्गुक्

---

1. G संप्र-
2. GD कलश्च चित्.
3. G -शमो-
4. G भ्रू-
5. G omits -कुण्डि-
6. G and GD भेरेभि-
7. GD इति तु.
8. G -कः.

च" । न गच्छन्त्यनेन अर्गलः ॥ न जायतेऽत्र किञ्चित् जैङ्गली[1] निर्जलदेशः ॥
"कुगुर्ध्वैञ्चिचैञ्चिवहिदिहितृसृतुसिर्कुसिभ्योऽलः" । एभ्यश्चिद्लः स्यात् । गुणे वब-
योरैक्यात् बः । भुक्तौ सशब्दत्वात् कबलः ॥ गवते ध्वनति गवलः महिषशृङ्गम् ॥
धुनोत्यन्यशोभां धवलः ॥ अञ्चति चलति अञ्चलं वस्त्रादीनामग्रम् ॥ चञ्चलम् ॥
वहति पुष्टिं बहलः ॥ दिह्यते उपलिप्यते देहली[6] ॥ प्लवते चलति तरलः ॥
अञ्जसा गच्छति सरलः ऋजुः ॥ तोसलाः जनपदः ॥ संश्लिष्यन्ति जना अत्र
कोसलाः जनपदः ॥ "मुरलोरलमुसलकुशलकोमलकोहलविरलकेरलकुन्तलकपिञ्जले-
ञ्जैलछगलर्भगलाहलकाहलनाहलानलयुगलपिप्पैलादयः" । "मुर संवेष्टने"
आँव्रियते जनैः मुरलाः जनपदः ॥ "उँर्वी" हिंसार्थः । पीडयत्यन्यान् उरलः
उत्कटः ॥ मुस्यते खण्डयतेऽनेन व्रीह्यादिः मुसलः । पूर्वत्रौर्थाञ्जस्यं न ॥
"कुश भाषणे" इति भौवादिकोऽस्तीति वृत्तौ । सम्यक् भाषते कुशलः ॥
काम्यते कोमलम् ॥ कोहलः भरतसूनुः ॥ अन्योऽन्यं विरह्यते विरलम् ॥
कीर्यन्ते व्याप्यन्ते मरिचादिभिः केरलाः ॥ कनति दीप्यते कुन्तलाः[13] ॥ कपिञ्जलः
गौरतित्तिरिः ॥ इञ्जलः वृक्षभेदः ॥ छगलः छागः ॥ भगलः ऋषिः ॥ आहन्तीति
आहलः विषाणम् ॥ कनति ध्वनति काहलः ॥ नाहलः[14] म्लेच्छः ॥ अनन्त्यनेनो-
दरस्थेन आनलः ॥ युज्यते मिथो[15] युगलम् ॥ आद्युक्तेः मुद्गलः ऋषिः । कीर्यते
कुरलः[16] ॥

---

१. P जङ्गलः.
२. G -ध्वञ्जि-
३. G -चञ्जि-
४. G -कुसु-
५. GD धुनोति निरस्यति. P धुनोति न निरस्यति.
६. G देहल-
७. A -कपिञ्जलकञ्जलजल- P -कपिञ्जलकज्जलेञ्जल-
८. G omits -भगल-
९. G -वोप्प-
१०. G आह्रीयते.
११. G उर्वि.
१२. G, GD and P त्रास्यार्थाञ्ज-स्यं.
१३. GD, A and P -लः.
१४. A, G and GD omit नाहलः म्लेच्छः.
१५. G अन्येन.
१६. GD and P add इति.

॥ १०६ ॥ कणेष्ठः ॥ १—१०६ ॥

शब्दं करोति कण्ठः ॥

॥ १०७ ॥ अमन्ताड्डः ॥ १—१०७ ॥

अमङणनान्ताद्धातोः डः । दम्यतेऽनेन दण्डः ॥ रम्यते[1] स्वेच्छया रण्डा कुलटा ॥ मन्यते काङ्क्ष्यते मण्डम्[2] ॥ भणति भण्डः बन्दी ॥ चमति सुखं[3] चण्डः ॥ गम्यते जनैः द्रमिडः देशः । बाहुलकात् "नेड्वशि" इति निषेधाभावः ॥

॥ १०८ ॥ कुणादिभ्यः कित् ॥ १—१०८ ॥

"कुण शब्दोपकरणयोः" इत्यतः तस्य[4] उपकरणमात्रवृत्त्या पाकादौ उपकरोतीति कुण्डम् ॥ रुण्डः कबन्धः ॥

॥ १०९ ॥ स्थाचतिमृजेरालवालञालीयरः[5] ॥ १—१०९ ॥

स्थ आलः । तिष्ठत्यन्नमस्मिन् स्थालम् ॥ चतेर्वालञ्[6] । चतेः गत्यर्थ-वृत्त्या गच्छन्त्यत्र त्याज्यत्यागार्थं चात्वालः ॥ मृजेरालीयर् । मृजेर्वृद्धिः । मृज्यन्तेऽत्र पात्राणि मार्जालीयं द्वौ यज्ञभूभागौ ॥

॥ ११० ॥ पतिचण्डिभ्यामालञ् ॥ १—११० ॥

ञित्त्वाद्वृद्धिः । पतन्त्यस्मिन् पातालम् ॥ कोपेन क्रूरकर्मलक्षणया चण्डालः ॥ "ऋकृमृवृभ्य आलच्" इति भोजः । अरालः ॥ "[7]कृञ्

---

१. G रमत्वे.
२. G and GD मण्डः.
३. G सुखः.
४. A, G and GD omit तस्य ....वृत्त्या.
५. G -लच्.
६. G लङ्.
७. G कृङ्.

हिंसायाम्" करालः क्रूरः॥ न म्रियते दिव्यपक्षित्वात् मरालः॥ व्रियते याच्यते वरालः दाता॥

॥ १११ ॥ पतेरङ्गच् पक्षिणि ॥ १—१११ ॥

पतङ्गः। पक्षिणीत्यतन्त्रम्। सूर्यादावपि स्यात्॥

॥ ११२ ॥ त्रादिभ्यश्च ॥ १—११२ ॥

प्लवते तरङ्गः॥ तमिलूभ्यां च भोजः। तम्यते काङ्क्ष्यते वासाय तमङ्गः हर्म्यनिर्व्यूहः॥ लवङ्गः तरुः॥

॥ ११३ ॥ बिडादिभ्यः कित् ॥ १—११३ ॥

बिडङ्गः तरुः॥ अत्र भोजः "कुरिबि[1]डिमृदिपिशिभ्यः[2] कित्"। "कुर शब्दे" कुरङ्गः॥ मृद्यते मृदङ्गः॥ "पिशँ[3] अवयवे" इत्यस्य दीप्त्यर्थवृत्त्या पिशङ्गः[4]॥ "मनस्तुट् च"। कित्त्वात् "अनुदात्तोपदेश" इति नलोपः। ज्ञानवत्वात् मतङ्गः मुनिः॥ "कलिस्फुलिभ्यामिङ्गक्"। कलिङ्गः॥ स्फुलति चलति स्फुलिङ्गः॥ "भृञो भुल् च"। भुलित्यादेशः। भुलिङ्गः शकुनिः॥ "माङि तुलेरङ्गच्"। न तुल्यते[5]ऽन्येन मातुलुङ्गः॥ "कमितमिशमिभ्यो[6] डित्[7]" कुङ्गः देशः॥ न काम्यति न[8] क्षीयते तुङ्गः॥ शुङ्गः मुनिः॥ "सर्तेरुच्च[9]"॥ सरत्यनया सुरुङ्गः[10] गूढमार्गः इति॥

॥ ११४ ॥ सर्तेर्णित् ॥ १—११४ ॥

णिदङ्गच् स्यात्। सरति सारङ्गः[11]; नाना गच्छति इति[12] चित्रवर्णश्च॥ वृनृभ्यामि[13] भोजः। वारङ्गः काण्डशल्यम्॥ नारङ्गः तरुः॥

---

१. G -वृद्धि-
२. G and GD -विशिभ्यः
३. G विश.
४. G विशङ्गः
५. G तुलते.
६. G कमिशतिमि-
७. G, GD and A क्ति.
८. G क्षीयति ने-
९. G -रुच्. GD रुश्च.
१०. G सुरङ्गा.
११. G omits this word.
१२. GD omits इति.
१३. GD adds च.

॥ ११५ ॥ गेन्गम्यदेः ॥ १—११५ ॥

गम्यते[2] जनैः गङ्गा ॥ अत्ति सर्वं अद्रः[3] समुद्रः ॥

॥ ११६ ॥ भृञः किन्नुट्[4] च ॥ १—११६ ॥

भरति मधु भृङ्गः ॥

॥ ११७ ॥ शृणातेः ह्रस्वश्च ॥ १—११७ ॥

हिनस्त्यनेन शृङ्गम् ॥ पीङश्च भोजः । पिबत्यन्यशोभां पिङ्गः ॥

॥ ११८ ॥ गण् शकुनौ ॥ १—११८ ॥

शृणातेः शकुनौ वाच्ये[5] गण् नुट् च स्यात् । वृद्धिः । शार्ङ्गः पक्षी ॥

॥ ११९ ॥ मुदिग्रोर्गग्गौ ॥ १—११९ ॥

गकः कित्वादगुणः । मोदतेऽनेन मुद्गः ॥ गृणाति वेदान् गर्गः ॥ भृस्वृभ्यां[6] च भोजः । बिभर्ति लोकान्[7] भर्गः ॥ स्वरन्ति स्तुवन्त्येनं स्वर्गः ॥

॥ १२० ॥ अण्डन् कृसृभृवृञः ॥ १—१२० ॥

क्रियते शिल्पिना करण्डः ॥ सरण्डः चतुष्पात् ॥ भरण्डः क्रिमि-जातिः ॥ वरण्डः काष्ठभेदः ॥ तृश्च भोजः । तरण्डः प्लवः । "अण्डैरण्डपि[8]-चण्डकाण्डभाण्डवतण्डपोगण्डादयः" इति च । पचत्यग्निरत्र पिचण्डः उदरम्[9] ॥

---

१. G गम्यदिभ्यां गन्.

२. G गायते.

३. G space is left out for this word.

४. A and P -न्नुश्च. GD णुश्च.

५. G omits वाच्ये.

६. A भूस्-

७. G and GD कोकं.

८. G -पिचकण्ड-

९. G -रः.

कायति ध्वनति काण्डं शरः समूहश्च ॥ भृञः प्रत्ययस्यादिदीर्घः डित्वं च । भ्रियते भाण्डः ॥ वतण्डः मुनिः ॥ पोगण्डः बालः ॥ आद्युक्तेः कूश्माण्डः ॥ कुरण्डः कोरण्डश्च वृक्षौ ॥

॥ १२१ ॥ श्रृदृभसोऽदिः ॥ १—१२१ ॥

अदेरिकार इत् । शृणाति कामुकान् शरत् ॥ दरत् देशः ॥ भसत् जघनम् ॥

॥ १२२ ॥ दृणातेः षुक् ह्रस्वश्च ॥ १—१२२ ॥

दीर्यते दृषत् ॥

॥ १२३ ॥ एतेस्तुट् च ॥ १—१२३ ॥

एतत् ॥

॥ १२४ ॥ त्विषिमिषिभ्यां च ॥ १—१२४ ॥

अदिः[3] स्यात् । त्वेषत् देवविशेषः ॥ मेषत् महिषजातिः ॥

॥ १२५ ॥ त्यजियजितनिभ्यो डिर्त् ॥ १—१२५ ॥

त्यद् ॥ यद् ॥ तद् ॥ "इणो दम्" इति भोजः । इदम् ॥ "कौतेर्डिमिः" इति च" किम् ॥

॥ १२६ ॥ सर्तेरटिः ॥ १—१२६ ॥

सरट् मेघः ॥

॥ १२७ ॥ लङ्घेर्नलोपश्च ॥ १—१२७ ॥

लघट् वायुः ॥

---

१. G omits this word.
२. G भसञ-
३. G आदिः.
GD अदि.
A अदित्.
४. G ड्वित्.
५. G तद् यद्.
६. G omits this word.

॥ १२८ ॥ पारेरजिः ॥ १—१२८ ॥

पारक् प्रकारः सर्पिश्च ॥ " भिषेः कित् " इति भोजः । भिषक् ॥

॥ १२९ ॥ युष्यसिभ्यां मदिक् ॥ १—१२९ ॥

युष्मद् ॥ अस्मद् ॥

॥ १३० ॥ अर्तिस्तुसुहु[1]सृधृक्षिक्षुभायापे[2]दियक्षिनीभ्यो मन् ॥ १—१३० ॥

व्याप्नोति नेत्रं अर्मः अक्षिरोगः ॥ स्तोमः सङ्घः ॥ सोमः ॥ हुतिः होमः ॥ प्राप्यत्वात् सर्म[3] सुखम् ॥ धृञः प्रीत्यर्थत्वात् तत्[4]साधनं धर्मः ॥ निवसन्त्यनेन क्षेमः रक्षा ॥ शब्यते प्रशस्यते क्षौमः[5] दुकूलम् । बाहुलकेन गुणाभावात् क्षुमा अतसीति माधवः ॥ भामः सूर्यः ॥ यामः[6] ॥ पद्यते गम्यते भृङ्गैः पद्मं कमलम् ।

पद्मं हि पद्यतेरुक्तं न पतेर्माधवादिभिः ।
स्पष्टो दै[7]कारश्चोदीचां तकारोक्तिरतो[8] भ्रमः ॥

रोगश्रेष्ठतया पूज्यत्वोपचारात् यक्ष्मा[9] ॥ नयते पृथक् क्रियते समुदायात् नेमः अर्द्धम् ॥ ईरिव्याशृभ्यश्च भोजः । ईर्ते व्याप्नोति देहं[10] ईर्मः व्रणम् ॥ व्ययते संवृणोति प्रमेयं व्योमः[11] प्रमाणभेदः ॥ शृणाति कूलं शमः नदः ॥ " अवोदैधौद्म " इत्युक्तेः[12] [13]उन्देर्नलोपो गुणश्च । ओद्म उन्दनम् ॥

---

1. G -हसु-
2. G -यावाप-
3. G शर्म.
4. G omits तत्.
5. P क्षोमः.
6. G omits this word.
7. G काद्‌कारश्चोदिच्या .
8. G किरतो.
9. G and GD यक्ष्मः.
10. G देहमर्मं.
11. GD व्योमः.
12. G Space is left out for the letter क्तेः.
13. G न्नेषलो-

॥ १३१ ॥ अवतेष्टिलोपश्च ॥ १—१३१ ॥

प्रत्ययस्यायं टिलोपः । अनुनासिके परे "ज्वरत्वर" इत्यूठ् । गुणः । ओम् ॥

॥ १३२ ॥ ग्रसतेरा च[1] ॥ १—१३२ ॥

मैन् अन्त्यस्यात्वं च । ग्रसन्तेऽत्रै[2]न्नादिकं ग्रामः ॥

॥ १३३ ॥ अविसिविशुषिभ्यः कित् ॥ १—१३३ ॥

"ज्वरत्वर" इत्यूठ् । ऊमा देवाः ॥ "च्छ्वोः शूड्" इत्यूठ् । स्यूमाः रश्मयः ॥ शोषयति परान् शुष्मः बलम् ॥ सिक्षुभ्यां च भोजः । सिमः सर्वार्थः ॥ क्षुमा अतसी ॥

॥ १३४ ॥ इषियुधीन्धिदसिश्याधूसूभ्यो मक् ॥ १—१३४ ॥

इष्यते रम्यत्वात् इष्मः वसन्तः ॥ युध्मः योद्धा । युध्यन्तेऽत्रेति[4] शरश्च ॥ इध्मः ॥ दस्मः क्षयकृत् ॥ हृदयं गच्छति श्यामत्वात्[5] श्यामः ॥ कम्पते धूमः ॥ सूयते गवा सूमः क्षीरम् ॥

॥ १३५ ॥ युजिरुचि[6]तिजां कुत्वं च ॥ १—१३५ ॥

युज्यते मिथो युग्मम् ॥ रोचते रुक्मम् ॥ परान् तेजयति तनूकरोति तिग्मः ॥

॥ १३६ ॥ हन्तेर्हि च ॥ १—१३६ ॥

हन्ति पीडयति हिमम् ॥

---

१. G -रच्.

२. G, GD and P मसन्तस्य

३. G -त्राम्नाति-

४. G युध्यतेतेति.

५. GD रम्यत्वात्.

६. G रुजि.

॥ १३७ ॥ [1]भियष्षुग्वा ॥ १—१३७ ॥

[2]भीमः ॥ [3]भीष्मः ॥ गुलि[4]बिलिभिलिसिधि[5]रुभ्यश्च भोजः । गुल्मम्[6] ॥ बिल्मः प्रकाशः ॥ भिल्मं भास्वरम् ॥ सिध्मं त्वग्रोगः ॥ रुमा लवणाकरः ॥ "अवे ह्रस्वश्च" इति च[7] । ऊठि कृते ह्रस्वः । उमा ॥

॥ १३८ ॥ घर्मग्रीष्मः ॥ १—१३८ ॥

दीप्यतेऽर्कोऽत्र घर्मः ॥ गिरति शैत्यं ग्रीष्मः ॥ भोजस्त्वाह "ग्रीष्म-घर्मकूर्मसूर्मसुह्मजिह्मजाल्मादयः" । कुचतीति कपालोदरे कूर्मः ॥ सूर्मः [8]चुल्लिः ॥ सुह्माः जनपदः ॥ जहात्यार्जवं जिह्मः ॥ जालति निशितधीः न भवति इति जाल्मः निर्विचारः ॥

॥ १३९ ॥ प्रथेः [9]षिवच् प्रसारणं च ॥ १—१३९ ॥

षित्वात् ङीष् । विस्तीर्यते पृथिवी ॥

॥ १४० ॥ अशुप्रुषिलटिकणिखटिविशिभ्यः क्वन् ॥ १—१४० ॥

सद्योऽश्नुते प्राप्यदेशं अश्वः ॥ वैपरीत्यात् प्रुष्वः वर्षम् ॥ [10]टुः पक्षी ॥ चक्षुः निमीलयति वेदादीन् वदनि वा कण्वः ऋषिः । जनैरुद्धोप्यते कैण्वं पापम् ॥ काङ्क्ष्यते खट्वा ॥ विशति व्याप्नोति सर्वं विश्वम् ॥ किणिबिलि-नलिशलिखलिभ्यश्च भोजः । [11]किण्वं सुराबीजम् ॥ बिलति भिनत्ति कण्टकैः

---

१. G भिषग्युग्वा.
२. G omits this word.
३. G omits this word.
४. GD खिल्लि.
५. G -सिद्धि-
६. G गुल्मः.
७. G -च्.
८. G चिल्लिः.
९. G ष्फवच्.
A ष्किवच्,
१०. G कण्टुः.
११. G omits किण्वं……क्षत्रियाः.

बिल्वः ॥ नल्वः भूमानभेदः ॥ शल्वाः क्षत्रियाः ॥ खेल्वं[1] निम्नम् ॥ " नञि भुवो डिते्[2]" इति च । टिलोपः । अभ्वम् अद्भुतम् ॥

॥ १४१ ॥ इण्शीभ्यां वन् ॥ १—१४१ ॥

स्वैयमेवैतीति[3] एवः केवलः । एवेति निपातोऽपि ॥ शेवः सुखकृत् ॥ श्याशालाभ्यश्च भोजः । व्याप्नोति द्रव्ये श्यावः कपिशः ॥ तनूकृताङ्गत्वात् शावः शिशुः ॥ लार्वः[4] पक्षी ॥

॥ १४२ ॥ सर्वनिघृष्वर्ष्वलष्वपद्वप्रह्वेष्वा[5][6] अतन्त्रे ॥ १—१४२ ॥

सैरति[7] व्याप्नोति सर्वः ॥ निघृष्वः निकषपाषाणः ॥ ऋष्वः हिंस्रः ॥ लष्वः नर्तकः ॥ पद्वः भूलोकः ॥ प्रह्वः प्रणतः ॥ इष्वः आचार्यः ॥ अतन्त्र इत्युक्तेः साधारणात्मके कर्तृमात्रार्थे सर्त्यादिभ्यः सर्वादयो न स्युः । किं तु सर्ता सारक इत्याद्येव स्यादिति भावः । एतच्चान्येष्वपि समानम् । लिष्वः लम्पट इति च भोजः ॥

॥ १४३ ॥ शेवायह्वाजिह्वाग्रीवाप्वामीवाः ॥ १—१४३ ॥

शेवा मेढ्रम् ॥ यह्वा बुद्धिः ॥ जीवन्त्यनया जिह्वा ॥ गिरन्त्यनया ग्रीवा ॥ अप्वा देवयूथम् ॥ अमीवा जलम् ॥

॥ १४४ ॥ कॄगॄशॄदॄभ्यो वः ॥ १—१४४ ॥

कर्वः कन्दरः ॥ गिरति तत्त्वबुद्धिं गर्वः ॥ शृणाति शैब्दं[8] शर्वः ॥

---

१. G बल्कं.
२. G डित्.
३. G. स्वमेवै-
४. G लावः.
५. G सर्वनिघृष्वपाषाणः.
६. A, G and GD omit-पद्व-
७. G omits सरति……पाषणः.
८. G omits शब्दं.

दर्वः राक्षसः ॥ ह्वसेश्च भोजः । ह्रस्वः ॥ "उर्देः धश्च" इति च । उद् धवः । "उपधायां च" इति दीर्घः । मीयते उच्छ्रितवस्तुना ऊर्ध्वः ॥

॥ १४५ ॥ कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ॥ १—१४५ ॥

कनिनः कित्त्वादगुणः । उवङ् । यौति संगच्छते स्त्रिया युवा ॥ वर्षत्यभीष्टं वृषा इन्द्रः समर्थश्च ॥ तक्षा ॥ राजा ॥ "धन्विः" सौत्रः । धन्वा मरुः ॥ द्युवा अभिगन्ता ॥ प्रतिदिवा द्यूतकरः ॥

॥ १४६ ॥ नञि जहातेः ॥ १—१४६ ॥

कित्वादाल्लोपः । न जहाति प्रकाशं अह्नः ।

॥ १४७ ॥ पञ्चेश्च ॥ १—१४७ ॥

ईदित्वान्नलोपो न । व्यक्तीक्रियन्ते अनया पदार्था इति पञ्च ॥

॥ १४८ ॥ सप्यशूभ्यां तुट् च ॥ १—१४८ ॥

सप्तन् ॥ अष्टन् ॥

॥ १४९ ॥ नुदंशोर्गुणश्च ॥ १—१४९ ॥

नौतेः गुणः । नवन् ॥ नलोपः । दशन् ॥

॥ १५० ॥ अन्नुक्षन् पूषन् प्लीहन् क्लेदन् स्नेहन् मूर्धन् मज्जन् अर्यमन् विश्वप्सन् परिज्वन् मातरिश्वन् मघवन्निति ॥ १—१५० ॥

1. G उदेर्धश्च इति दीर्घः.
2. G कनिन् कित्वादेः गुणः.
3. G omits द्युवा……करः.
4. G इति.
5. G प्राह्नन्.

आशु गच्छति श्वा ॥ सिञ्चति उक्षा ॥ पुष्णाति वृष्ट्या पूषा ॥ प्लीहा रोगः ॥ क्लेदा चन्द्रः ॥ स्नेहा व्याधिः ॥ मुह्यत्यनेनाहतेन मूर्धा ॥ मज्जति देहे मज्जा ॥ आर्यैः गणकश्रेष्ठैः मीयते अर्यमा ॥ विश्वप्सा कालः ॥ परिज्वा सूर्यः ॥ वेदे गगनस्य मातृत्वप्रसिद्धेः तत्र श्वयति मातरिश्वा ॥ मघं धनं स्वीकरोति मघवा ॥ इतिकरणात् भोजोक्तं ग्रावन् महन् अथर्वन् इति सिद्धम् । महा महत्वम् ॥ अथर्वा ऋषिः ॥

इति प्रक्रियासर्वस्वे उणादिखण्डे प्रथमः पादः ॥



अथ द्वितीयः पादः ॥

॥ १५१ ॥ कृहृभ्यामेणुः ॥ २—१ ॥

करोति युद्धादिकं **करेणुः** गजः ॥ हरति चित्तं **हरेणुः** गन्धद्रव्यम् ॥

॥ १५२ ॥ हनिकुषिनीरमिकाशिभ्यः क्थन् ॥ २—२ ॥

कित्त्वात् "अनुदात्तोपदेश" इति नलोपः । हन्यते **हथः** विषण्णः ॥ "तितुत्र" इत्यनिट्त्वम् । ष्टुः । कुष्णाति देहं **कुष्ठः** ॥ **सुनीथः** नीतिमान् ॥ रमन्ते अत्र **रथः** ॥ "छशां षः" । दीप्यतेऽग्नौ क्षिप्तं[1] **काष्ठम्** ॥

॥ १५३ ॥ अवे भृञः ॥ २—३ ॥

अवभ्रियन्ते संभाराः अत्र **अवभृथः** ॥

॥ १५४ ॥ उषिकुषिगार्तिकनिभ्यस्थन् ॥ २—४ ॥

गुणः । तप्यते श्वासैः **ओष्ठः** ॥ **कोष्ठः** कुक्षिः ॥ गीयते **गाथा** ॥ प्राप्यते **अर्थः** ॥ **कन्था** ॥

॥ १५५ ॥ सर्तेर्णित्[3] ॥ २—५ ॥

सरति **सार्थः**[4] ॥

॥ १५६ ॥ जृवृभ्यामूथन् ॥ २—६ ॥

जरूथः मांसम् ॥ वृणोत्यनेन **वरूथः** रथगुप्तिः सेनासङ्घातश्च ॥

॥ १५७ ॥ पातृतुदिवचिरिचिसिचिभ्यस्थक् ॥ २—७ ॥

---

1. G omits क्षिप्तं.
2. A and G omit -कमि-
3. P. णित्.
4. A and GD सार्थम्.

कित्त्वात् "घुमास्था" इतीत्वम् । पीथः पानम् ॥ "ऋत इत्" दीर्घः । तरत्यनेन नदीं पापं वा तीर्थम् ॥ तुत्थम् अञ्जनभेदः ॥ [1]यजादित्वात् उक्थम् साम ॥ क्षीयते रिक्थम् द्रव्यम् ॥ सिच्यते गव्यैः सिक्थं ओदनांशः ॥

॥ १५८ ॥ अर्तेर्निरि ॥ २—८ ॥

निरृथः निकायः गोसङ्घश्च ॥

॥ १५९ ॥ निशीथगोपीथावगाथाः ॥ २—९ ॥

शेरतेऽत्र निशीथः ॥ गोपीथः रक्षा ॥ अवगाथः प्रातस्सवनम् । अवगाथ इत्येके । स च मार्गार्थः ॥

॥ १६० ॥ गश्चोदि ॥ २—१० ॥

[2]क्थः । कित्त्वादीत्वम् । उद्गीथं[3] सामभेदः ॥

॥ १६१ ॥ समीणः ॥ २—११ ॥

समिथः सङ्गमः ॥

॥ १६२ ॥ तिथकुथपृष्ठगूथयूथप्रोथाः ॥ २—१२ ॥

तिथः दिवसः ॥ [कुथः ॥ पृष्ठम्[4]] ॥ गूथं पुरीषम् ॥ यौति यूथम् ॥ प्रोथः मुखाग्रम् ॥

॥ १६३ ॥ स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दि[5]दहिदसिदम्भिवासिवाशिशीङ्हसिसिधिशुभिभ्यो रक् ॥ २—१३ ॥

---

1. G omits यजादित्वात्……ओदनांशः.
2. G गश्चादिक्षकः.
3. G and P -थः.
4. The words within brackets are omitted in all mss.
5. A omits -दहि-

“नेड्वशि” “लोपो व्योः”। स्फारम् ॥ तञ्चिवञ्च्योः कित्त्वात् नलोपः। न्यङ्क्वादि कुः। तक्रम् ॥ वक्रम् ॥ शक्नोति शक्रः ॥ क्षिप्रं क्षोत्तुं शक्योऽर्हो वा क्षुद्रः ॥ सृप्रा नदी ॥ तृप्रं तृप्तिः ॥ दृप्रः सूर्यः ॥ यत्र नलोपाभावः तत्रेदित्त्वं ज्ञेयम्। वन्द्रः पूजकः ॥ उन्देरनिदित्वान्नलोपः। उद्रः यादो-भेदः। समुन्दन् भूमिं समुद्रः ॥ श्वित्रं रोगः ॥ वृत्रः ॥ अजेर्वीभावः। सर्वत्र गच्छति वीरः ॥ देशान्तरं नीयते नीरम् ॥ पद्रं ग्रामः ॥ मद्रः क्षत्रियः ॥ मोदतेऽनया दृष्टया सुहृत् मुद्रा ॥ खिद्रः सूर्यः ॥ छिद्यते छिद्रम् ॥ भिद्यते[1] भिद्रं वज्रम् ॥ मोदन्तेऽनेन श्रोतारो मन्द्रः ॥ चन्द्रः ॥ दह्रः अग्निः ॥ दस्यतो हतो रोगान् दस्रौ ॥ दभ्रः[2] अल्पः ॥ वसेः प्रसारणम्। उस्राः रश्मयः ॥ वाशते वाश्रा धेनुः ॥ शीरः अजगरः ॥ हस्रः हर्षुलः ॥ सिध्रः साधुः ॥ शुभ्रः ॥ घसेश्च भोजः। घस्रः दिवसः ॥

॥ १६४ ॥ निन्देर्नलोपश्च ॥ २—१४ ॥

निन्द्यते निद्रा ॥

॥ १६५ ॥ तमेर्दुक् च ॥ २—१५ ॥

ताम्यत्यनया तन्द्रा ॥

॥ १६६ ॥ चकिरम्योरुच्चोपधायाः ॥ २—१६ ॥

प्रतिहन्यतेऽनेन रसान्तरं चुक्रः अम्लः[3] ॥ रुम्रं रम्यम्। “चम्योः” इति पाठे[4] चुम्रः नाशः ॥

॥ १६७ ॥ वौ कसेः ॥ २—१७ ॥

उश्चोपधायाः। विकुस्रः चन्द्रः ॥

---

1. A, G and GD omit भिद्यते.
2. A and GD दस्रः.
3. G चुक्रोमः.
4. G omits पाठे.

॥ १६८ ॥ अमितम्योः दीर्घश्च ॥ २—१८ ॥

गम्यते फलार्थं आम्रम्[1] ॥ काङ्क्ष्यते ताम्रम् ॥

॥ १६९ ॥ दुरीणो लोपश्च ॥ २—१९ ॥

दुष्पूर्वस्येणो रक् । धातोर्लोपश्च । दुर् र । "रो रि" इति लोपे "ढ्रलोपे" इति दीर्घः । दुःखेन गम्यं दूरम् ॥

॥ १७० ॥ कृतेः छः क्रू च ॥ २—२० ॥

[2]कृते रक् स्यात्, अन्त्यस्य छत्वं क्रू इति सर्वादेशश्च । कृन्तति[3] जनान् कृच्छ्रम् । छिनत्ति क्रूरः ॥

॥ १७१ ॥ रोदेर्णिलुक् च ॥ २—२१ ॥

णिलुकि गुणाभावः । रोदयत्यरीन् रुद्रः ॥ "अरोदीत्" इति रुद्रः इति श्रुत्यानुगुण्यात् अण्यन्तादेवाह भोजः ॥

॥ १७२ ॥ बहुलमन्यत्रापि संज्ञाछन्दसोः ॥ २—२२ ॥

अन्यप्रत्ययेष्वपि संज्ञाछन्दसोः बहुलं णिलुक् स्यात् । वान्ति [4]पर्णशुषो वाताः । पर्णानि शोषयन्तीति क्विप्[5] । सर्वत्रापि धातोः[6] अन्तर्भावितण्यर्थत्वेन [7]विधिः ज्ञेयः । छन्दसि "वर्धन्तु त्वा" इत्यादि ॥

॥ १७३ ॥ जोरी च ॥ २—२३ ॥

जीरः अग्निः ॥

---

1. GD आम्रः.
2. G कृतेरन्त्यस्य.
3. GD adds पीडयति.
4. GD and A वर्ण.
5. GD and P add वायुभेद व्याख्या.
6. G omits धातोः.
7. A and GD न विधिः

॥ १७४ ॥ सुसूधागृधिभ्यः क्रन् ॥ २—२४ ॥

अभिषूयते सुरा ॥ सुवति प्रेरयति कर्मणि[1] जनान् सुरः[2] ॥ किञ्चा-दीत्वम् । दधाति प्रज्ञया सर्वं धीरः ॥ काङ्क्षति[3] मांसं गृध्रः ॥

॥ १७५ ॥ शुसिचिमीनां[4] दीर्घश्च ॥ २—२५ ॥

शुः गत्यर्थः । असंभ्रमं गच्छति[5] शूरः ॥ वृक्षायोभिः बध्यते सीरम् ॥ चीयते विस्तीर्यते आर्ज्यते वा चीरम् ॥ मीरः समुद्रः ॥

॥ १७६ ॥ वाविन्धेः ॥ २—२६ ॥

क्नः[6] किञ्चान्नलोपः । विध्रम् निर्मलम् ॥

॥ १७७ ॥ वृधिवपिभ्यां रन् ॥ २—२७ ॥

गुणः । वृधेः बन्धवृत्तित्वात्[7] वर्ध्रं[8] चर्मरज्जुः ॥ उप्यते[9]ऽस्मिन् बीजं वप्रः केदारः । उप्यन्ते निधीयन्ते शिला अत्रेति सीलश्च[10] ॥ रुधीणूभ्यां च भोजः । रलयोरैक्यात् रुणद्धि औष्ण्यं लोध्रः वृक्षः ॥ एरा तृणभेदः ॥

॥ १७८ ॥ ऋज्रेन्द्राग्रवज्रविप्रकुप्रचुप्रक्षुरखुरभद्रोग्रभेरभेलशुक्र-शुक्लगौरवज्रे[11]रामालाः ॥ २—२८ ॥

ऋज्रः नायकः ॥ इन्देः इन्द्रः[12] ॥ अञ्चति पुरो गच्छति अग्रम् ॥ अचञ्चलं वजति अप्रतिहतं गच्छति वज्रम् ॥ उप्यतेऽस्मिन् पुण्यं विप्रः ॥

---

१. G omits कर्मणि.
२. A, GD and P सूरः.
३. G and GD काङ्क्षते.
४. G -मीनां.
५. GD and P गच्छन्.
६. G रक्नः.
७. A and GD बद्ध-
८. GD वर्ध्रः.
९. G उप्यते.
१०. G शालश्च.
११. G -वज्रे-
१२. G इन्द्रियः.

कुपं वनम् ॥ चुपं वक्त्रम् ॥ क्षौति वपने कुदिति स्वनति छिनत्ति वा क्षुरः ॥ छिनत्ति भुवं खुरः ॥ भन्देः भद्रम् ॥ उच्यति समवैत्यत्र तमोगुणैः उग्रः ॥ भेरः भीरुः ॥ बिभेत्यस्मिन् भेलः जलतरणम् । बिभेत्यस्मात् भेरी दुन्दुभिः । भेरभेलावपि दुन्दुभ्यर्थावित्यन्ये[2] ॥ शोचति देवगुणैः शुक्रः ॥ शोचनीयत्ववैपरीत्यात् शुक्लः ॥ "गुरी उद्यमने" उद्यच्छति उन्नमति वर्णान्तरात् गौरः ॥ एति इरा जलम् ॥ अन्ध्ररन्ध्रसिलिन्ध्रोड्रपुण्ड्रतीरनीव्रशीध्रसान्द्रगुन्द्रोन्द्रादयो भोजोक्ताः ॥ ओड्रः तरुः ॥ नीव्रं गृहछदिरुपान्तः ॥ गुन्द्रा जलतृणम् ॥ आद्युक्तेः श्वभ्रम्[3] ॥

॥ १७९ ॥ समिकस उकन् ॥ २—२९ ॥

कसति गच्छति संकसुकः स्थिरः । बाहुलकात् सङ्कुसुक इत्यन्ये । भोजस्त्वाह—"कमितम्योः दुक् च" कमनीयत्वात् कन्दुकः ॥ तिन्दुकः तरुः ॥ "अशिकचोः नुं च" अश्नुतेऽङ्गं अंशुकम् ॥ बध्यतेऽङ्गे कञ्चुकः ॥ "कुहेः[4] कित्" कुहकम् आश्चर्यम् ॥ "कमेः क्रम[5] च वा" क्रमुकं[6] बन्धनम् ॥ "चुलुकोन्मुकचिबुकचूचुकजम्बुकगवेधुकामधुकभावुकादयः[7]" गवेधुका तृणजातिः ॥ मधुकः यष्टिमधु ॥ भावुकः[8] भगिनीपतिः ॥ आद्युक्तेः मड्डुकवालुकादीति ॥

॥ १८० ॥ पचिनशोः[9] णुकन्कनुमौ च ॥ २—३० ॥

आभ्यां णुकन् । पचेरन्त्यस्य कः । नशेः नुं च । वृद्धिः[10] । पाकुकः[11] सूपकारः ॥ नंशुकः चन्द्रः ॥

---

1. GD adds इति.
2. G दुन्दुभ्यावि-
3. G शुभ्रम्.
4. G कुहोः.
5. P क्रुम-
6. P क्रुमु-
7. P -भालु-
8. P भालुकः.
9. GD नश्योः.
10. G omits वृद्धिः.
11. G पाचकः.

॥ १८१ ॥ भियः क्रुकन् ॥ २—३१ ॥

भीरुकः ॥

॥ १८२ ॥ क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि ॥ २—३२ ॥

अनुपपदस्य सोपपदस्यापि धातोः शिल्पिनि नाम्नि च क्वुन्[1] स्यात् । वोरकः[2] शिल्पी ॥ लिखकः कायस्थः ॥ तक्षकः ॥ नाम्नि तु ध्वनति मशकः । भक्ष्यतेऽनेन चषकः ॥ सोपपदादपि ऊह्यम् ॥

॥ १८३ ॥ जहातेर्द्वे च ॥ २—३३ ॥

कित्त्वादाल्लोपः । जहकः त्यागी ॥

॥ १८४ ॥ ध्मो धम च ॥ २—३४ ॥

धमकः कर्मारः ॥

॥ १८५ ॥ हनो वध च ॥ २—३५ ॥

वधकः व्याधः ॥

॥ १८६ ॥ बहुलमन्यत्रापि ॥ २—३६ ॥

रुचितिलिपुलिपिटिक्षिपिध्रुधूभ्य आह भोजः । दीप्यते रुचकः अङ्गुलीयकम् ॥ स्निह्यते आर्द्रीकृत्य योज्यते तिलकः ॥ महत्तयोन्नमति पुलकः ॥ संहन्यते पिटकः ॥ क्षिपकः[3] आयुधम् ॥ उवङ् । टापि क्षिपकादित्वादित्वा-भावः[4] । ध्रुवका[5] पात्रभेदः ॥ धुवका सैव ॥

॥ १८७ ॥ कृषेर्वृद्धिश्चोदीचाम् ॥ २—३७ ॥

कार्षकः कृषकश्च कृषिजीवी ॥

---

१. A क्वुः.
G क्षुः.

२. G वारेकः.

३. A क्षिपः.

४. G क्षिपकादित्वाभावः.

५. G ध्रुवकः.

॥ १८८ ॥ उदकम् ॥ २—३८ ॥

[1]उनत्ति **उदकम्** । कीचकैरकैलकाश्मकादयो भोजोक्ताः । **एरका** तृणम् ॥ एलकः मेषः ॥ अश्मकाः जनपदः ॥

॥ १८९ ॥ वृश्चिकृषिकुशिभ्यः किकन् ॥ २—३९ ॥

छिनत्ति पुच्छेन **वृश्चिकः** ॥ [2]**कृषिकः** कृषीवलः ॥ हितं भाषते **कुशिकः** ॥

॥ १९० ॥ प्राङि पणिकषः ॥ २—४० ॥

प्रापणिकः आगन्तुः वणिक् च ॥ **प्राकषिकः** नर्तकः ॥

॥ १९१ ॥ मुषेर्दीर्घश्च ॥ २—४१ ॥

मुष्णाति अपनयति धान्यादि **मूषिकः** ॥

॥ १९२ ॥ स्यमेः [3]संप्रसारणं च ॥ २—४२ ॥

"हल" इति दीर्घः । **सीमिका** उपजिह्वा वल्मीकशिखा च ॥

॥ १९३ ॥ क्रिय इकन् ॥ २—४३ ॥

क्रयिकः ॥

॥ १९४ ॥ आङि पणिपनिपतिखनिभ्यः ॥ २—४४ ॥

आपणिकः वणिक् ॥ स्तूयत इति **आपनिकः** इन्द्रनीलः ॥ **आपतिकः** मयूरः ॥ **आखनिकः** आखुः ॥

---

1. A omits this sentence.
2. G omits this word.
3. GD and P प्रसारणं.

ये तद्धितादिभिः सिद्धाः क्रयिकापणिकादयः ।
ते व्युत्पत्तेर्बाहुविध्यं वक्तुमुक्ता महर्षिणा ॥

अलिकलिदलिपुलिस्फटि[1]पाभ्यश्च भोजः । अल्यते भूष्यते अलिकम् ॥ बद्धदलत्वात् कलिका ॥ दलिका कन्दारु ॥ पुलिकः मणिः ॥ "स्फट भेदने" आशु भिद्यते स्फटिकः ॥ कित्त्वादाल्लोपः । पिबति मधूनि पिकः ॥ "पिपीलिकेतिकहृदिकमक्षिकादयः" इति च[2] । पीडयति पिपीलिका ॥ इतिकः मुनिः ॥ हृदिकः यादवः ॥ सङ्घातीभवति मक्षिका ॥ आद्युक्तेः क्षुरिछुर्योः छेदनार्थयोः । क्षुरिका ॥ छुरिका ॥

॥ १९५ ॥ श्यास्त्याहृञविभ्य इनच् ॥ २—४५ ॥

आद्गुणः । गच्छति **श्येनः** ॥ संहन्यते धनमत्र **स्त्येनः** । "स्तेन चौर्ये" इत्यस्य पचाद्यचि स्तेन इति यकारं विनापि ॥ ह्रियते गीतेन **हरिणः** ॥ **अविनः** अध्वर्युः ॥

॥ १९६ ॥ वृजेः किच्च ॥ २—४६ ॥

वर्ज्यते **वृजिनं** पापम् ॥

॥ १९७ ॥ अजेरज च ॥ २—४७ ॥

[illegible] । गतं देहात् **अजिनम्** ॥

॥ १९८ ॥ बहुलमन्यत्रापि ॥ २—४८ ॥

पीडयति इति[3] कठिनम्[4] ॥ दह्यते शत्रुभिः कुण्डिनम् ॥

---

१. GD **स्थलि.**

२. G and A omit **च.**

३. G and P omit **इति.**

४. G adds **वनम्.**

॥ १९९ ॥ द्रुदक्षिभ्यामिनन् ॥ २—४९ ॥

द्रवति नश्यति **द्रविणम्** ॥ दक्षते वर्धते[1] फलमनया **दक्षिणा** ॥

॥ २०० ॥ द्रुहेः कित् ॥ २—५० ॥

न द्रुह्यति **द्रुहिणः** ॥

॥ २०१ ॥ अर्तेरिच्च ॥ २—५१ ॥

रपरः । इरादेशः । न गम्यते **इरिणं** ऊषरम् ॥

॥ २०२ ॥ वेपितुह्योः ह्रस्वश्च ॥ २—५२ ॥

[3]वेपतेऽत्र भयात् **विपिनम्** ॥ अर्दयति **तुहिनम्** ॥

॥ २०३ ॥ महेरिनण् च ॥ २—५३ ॥

अस्मात् ईनण्णपि स्यात् । **माहिनं** शरशयनम् ॥ **महिनः** माहात्म्यवान् ॥

॥ २०४ ॥ क्विब्वचिप्रच्छिश्रिद्रुस्रुकटप्रुज्वां[6] दीर्घोऽसंप्रसारणं[7] च ॥ २—५४ ॥

एभ्यः क्विप् दीर्घश्च । वचिप्रच्छयोः [8]प्राप्तं प्रसारणं[9] न स्यात् । वाच् । पदत्वे कुत्वम् । उच्यते **वाक्** शब्दः ॥ [10]प्राछ् । पदत्वे "छशां षः" जश्त्व-

---

१. G omits वर्धते.

२. G अर्तेः किदिच्च.
GD अर्तेः किदिश्च.

३. GD and P add वेपेः ह्रस्वोक्तिः.

४. P इनम्.

५. G इनञि नञापि.
P इनञ् । इनञपि.

६. G -स्रुद्रुप्रुज्वां.
A -प्रुजूवां.

७. GD and P अप्रसारणं.

८. G omits प्राप्तं.

९. G and GD add च.

१०. G प्राच्.

चर्त्वे । शब्दप्राट्[1] ॥ सेव्यते श्रीः ॥ द्रूः धारी ॥ स्रूः नदीभेदः ॥ कटप्रूः कामः ॥ जूः पिशाचः ॥

॥ २०५ ॥ परौ व्रजेः षश्च पदान्ते ॥ २—५५ ॥

परिव्रजेः क्विप् दीर्घश्च स्यात् । पदान्ते षत्वं च । षस्य जश्त्वचर्त्वे । परिव्राट् । अपदान्ते तु षो न । परिव्राजौ ॥

॥ २०६ ॥ हुवः श्लुवच्च ॥ २—५६ ॥

श्लुवत् क्विप् दीर्घश्च स्यात् । श्लुवत्त्वात् इत्वम् । जुहूः ॥

॥ २०७ ॥ द्युतिद्दणात्योः ह्रस्वश्च ॥ २—५७ ॥

श्लुवत् क्विप् । दृधातोः ह्रस्वश्च । दिद्युत् । "द्युतिस्वप्योः" इत्यभ्यासस्य प्रसारणम् । दिद्युत् सूर्यः ॥ उरदत्वम् । दद्दत् हिंस्रः ॥

॥ २०८ ॥ स्नुवः कन् ॥ २—५८ ॥

कित्त्वादगुणः । उवङ् । स्नुवः ॥

॥ २०९ ॥ चिक् च ॥ २—५९ ॥

स्नुधातोः चिक्प्रत्ययः स्यात् । इकावितौ । स्नुक् ॥

॥ २१० ॥ तनोतेरनश्च वः ॥ २—६० ॥

अन् इत्यस्य[3] वः स्यात्, चिक् च । विस्तीर्यते त्वक् ॥

॥ २११ ॥ ग्लानुदिभ्यां डौ ॥ २—६१ ॥

---

१. G शब्दः प्राग्. २. G and GD add स्वर्णम्.

३. A and G add नस्य.

ग्लायति कृष्णपक्षे **ग्लौः** ॥ नुद्यते **नौः** ॥

एजन्तत्वात् "कृन्मेजन्तः" इत्यव्ययत्वे प्राप्ते—

॥ २१२ ॥ च्विरव्ययम् ॥ २—६२ ॥

ग्लावादयः च्व्यन्ता एवाव्ययसंज्ञाः नान्यदा । तेन सुब्लुङ् न । च्व्यन्तत्वे तु नौकरोति तरून् इत्यव्ययत्वं स्यात् ॥

॥ २१३ ॥ रातेर्डैः[1] ॥ २—६३ ॥

दीयते **राः** ॥

॥ २१४ ॥ गमेर्डोः[2] ॥ २—६४ ॥

गच्छति **गौः** ॥ "द्युगमिभ्यां डोः" इति भोजः । अभिगम्यते द्यौः ॥

॥ २१५ ॥ भ्रमेर्डूः ॥ २—६५ ॥

भ्रमति चलति[3] **भ्रूः** ॥

॥ २१६ ॥ दमेर्डोसिः[4] ॥ २—६६ ॥

सित्वं खलु [5]पदत्वार्थं तस्य धातुष्वसंभवात् ।
वैफल्यात् सस्य नेत्संज्ञा दाम्यत्यरिरनेन दोः ॥

॥ २१७ ॥ पणेरिज्यादेश्च[6] वः ॥ २—६७ ॥

इजिप्रत्ययः, आदेः वत्वं च । **वणिक्** ॥

---

१. GD omits visarga.
२. GD डौ.
३. G omits this word.
४. A and P डोस्.
५. A, G and GD पदार्थत्वं.
६. A -येशश्च.

॥ २१८ ॥ वशः कित् ॥ २—६८ ॥

किस्त्वात् [1]संप्रसारणम् । उशिक् अग्निः कमनीयश्च ॥

॥ २१९ ॥ भृञ उच्च[3] ॥ २—६९ ॥

भुरिक् छन्दोभेदः ॥

॥ २२० ॥ जसिसहोरुरिन् ॥ २—७० ॥

जसुरिः अग्निः ॥ सहुरिः अनड्वान् । अङ्गेश्च भोजः । अङ्गुरिः अङ्गुलिरेव ॥

॥ २२१ ॥ सुयुरुवृञो युच् ॥ २—७१ ॥

सवनः कालभेदः ॥ जतिभेदाभावात् मिश्रीभवति यवनः म्लेच्छः ॥ रवणः भ्रमरः ॥ वरणः वृक्षभेदः ॥

॥ २२२ ॥ अशो रश च ॥ २—७२ ॥

अशेर्युच् रशादेशश्च । अश्नुते जघनं रशना ॥

॥ २२३ ॥ उन्देर्नलोपश्च ॥ २—७३ ॥

लघूपधगुणः । उद्यते घृताद्यैः ओदनः ॥

॥ २२४ ॥ बहुलमन्यत्रापि ॥ २—७४ ॥

चन्दनः । श्रुज्यसिर्[4]रसिरुचिरुहिभ्य आह भोजः । श्रवणः[5] नक्षत्रम् । जयनं ऊर्णापटः ॥ असनः वृक्षः ॥ रसना ॥ रोचना गोशीर्षम् ॥ रोहणः विद्रुरादिः ॥

---

१. G वशेः.
२. A, GD and P प्रसा-
३. GD उच्च.
४. GD omits-रसि-
५. GD श्रवणं.

॥ २२५ ॥ रञ्जेः क्युन्[1] ॥ २—७५ ॥

किस्वात् नलोपः । **रजनः** **रङ्गः** । महारजनं कुसुम्भम् । गौरादित्वात् रजनी ॥

॥ २२६ ॥ भूसूधूभ्रस्जिभ्यश्छन्दसि ॥ २—७६ ॥

बाहुलकाल्लोकेऽपि । **भुवनम्** ॥ **सुवनं**[2] चन्द्रतेजः ॥ **धुवनं** धूपः । निधुवनं रतिः ॥ भ्रस्जेः ग्रहिज्यादिना[3] प्रसारणम् । सस्य जश्त्वचुत्वे । **भृज्जनं** आष्ट्रः[4] ॥

॥ २२७ ॥ कॄपॄवृजिमन्दिनिधाञ्भ्यः क्युः ॥ २—७७ ॥

"ॠत इत्" कीर्यते दिक्षु **किरणः** ॥ "उदोष्ठ्यपूर्वस्य" । **पूरणः** समुद्रः ॥ **वृजनः**[5] विवेक्ता । "व्रजि" इति क्वचित् पाठः । व्रजनम् अन्तरिक्षम्[6] ॥ बाहुलकान्नलोपः । **मदनः** ॥ निधाञो[7] नाशार्थत्वात् **निधनम्** ॥ केवलादपि । धार्यते पोष्यते वा धनम् ॥

॥ २२८ ॥ धृषेर्धिष च संज्ञायाम् ॥ २—७८ ॥

प्रगल्भतेऽनया **धिषणा** बुद्धिः ॥

॥ २२९ ॥ हन्तेः घुरच् ॥ २—७९ ॥

घुरणः शंभुः ॥

---

१. G and GD क्युः.
२. G पुवनं.
३. G ग्रहीत्यादिना.
४. G and GD -ष्ट्रम्.
५. G -धानः.
६. G व्रजनो विवलः.
P विवलः.
७. G विधाञो.
८. G धिषू.

॥ २३० ॥ **गमेर्गग च** ॥ २—८० ॥

गच्छन्त्यत्र खगाद्याः **गगनम्** ॥

॥ २३१ ॥ **वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च** ॥ २—८१ ॥

अत्यन्ता एते वर्तमानेऽर्थे स्युः, शतृवच्च नुंङीबादि स्यात्। सिञ्चति **पृषत्** जलबिन्दुः ॥ **बृहत्** ॥ **महान्** ॥ गच्छति **जगत्** ॥ ङीपि पृषती बृहती इत्यादि। "जगत्सरसां शतृवच्च" इति क्वचित्[1] पाठः। तेन वक्ष्यमाणासुन्नन्तस्यापि सरश्शब्दस्य शतृवत्त्वात् ङीप्। सरसी ॥

॥ २३२ ॥ **संश्चत्तृपद्वेहत्** ॥ २—८२ ॥

संश्चत् कुहकः ॥ तृप्यन्त्यनेन **तृपत्** चन्द्रः ॥ विजहाति गर्भं **वेहत्** गर्भघातिनी। अत्र वियदादयश्च दण्डनाथोक्ताः ॥

॥ २३३ ॥ **छन्दस्यसानच् शवजॄभ्याम्** ॥ २—८३ ॥

शवसानः ज्वलनः ॥ **जरसानः** पुरुषः ॥

॥ २३४ ॥ **ऋजिवृधिमन्दिसहिभ्यः कित्** ॥ २—८४ ॥

ऋञ्जसानः मेघः ॥ **वृधसानः** पुरुषः। "ऋजिव्रजि" इति क्वचित् पाठः। व्रजसानोऽपि पुरुषः ॥ ईदित्वान्नुम्[2]। **मन्दसानः** जीवः ॥ **सहसानः** मयूरः ॥

॥ २३५ ॥ **अर्तेः गुणः शुट् च** ॥ २—८५ ॥

अर्शसानः विप्रः ॥

---

1. GD omits क्वचित्. 2. G ईत्वा-

॥ २३६ ॥ संस्यानच् स्तुवः ॥ २—८६ ॥[1]

संस्तवानः उद्गाता ॥

॥ २३७ ॥ युजिबुधिदृशिभ्यः किच्च ॥ २—८७ ॥[2]

[3]**युजानः** विप्रः ॥ **बुधानः** पण्डितः ॥ **दृशानः** ज्योतिः ॥ एतदन्ताः[4] छान्दसाः ॥

॥ २३८ ॥ पषेर्णिच्च ॥ २—८८ ॥

णित् । आनच् स्यात् । **पाषाणः** ॥

॥ २३९ ॥ मुचियुधिभ्यां सन्वच्च ॥ २—८९ ॥

आभ्यामानच् सन्वत् स्यात् । तेन द्विर्वचनम्[5] । "रलो व्युपधात्" इति सन्वद्भाकित्त्वे प्राप्ते बाहुलकान्नित्यम् । **मुमुचानः** मेघः ॥ **युयुधानः** साहसिकः सात्यकिश्च । "मुषियुधिभ्याम्" इति पाठे मुमुषाणः हरणेच्छुः ॥ "मुचिबुधिभ्याम्" इति माधवपाठः । तत्र बुबुधानः ज्ञानेच्छुः । "हलन्ताच्च" इति सन्वत् कित्त्वम् ॥

॥ २४० ॥ हुर्च्छेः सनो लुक् छलोपश्च ॥ २—९० ॥

जुहूर्छिषा इत्यस्मात् सनो लुकि छलोपे हल्परत्वाभावाददीर्घः[6] । **जुहुराणः** कुटिलाचारः ॥

॥ २४१ ॥ श्वितेर्दश्च[7] ॥ २—९१ ॥

---

1. G omits this sūtra and the commentary.
2. G omits this sūtra too.
3. G omits this sentence.
4. -दन्ताच्छन्दसाम्.
5. G द्वित्वं.
6. G and A स्वाद्.
7. A omits this sūtra.

" श्विनेर्दश्च " इति च[1] टीकासर्वस्वे दृष्टम् । शिश्विदानः शुद्धकर्मा । पापकर्मेत्यन्ये ॥

॥ २४२ ॥ तृंस्तृचौ[2] शंसिशसिशासिदसिक्षदादिभ्यः संज्ञायां चानिटौ ॥ २—९२ ॥

ऐभ्यः[3] संज्ञायां कर्तरि च तृंस्तृचावनिटौ स्तः । शंस्ता होता ॥ शस्ता हिंसकः ॥ शास्ता ॥ दस्ता क्षयकृत् ॥ क्षत्ता सारथिः ॥

॥ २४३ ॥ बहुलमन्यत्रापि ॥ २—९३ ॥

उद्गाता, उन्नेता, तृजन्तौ ॥ प्रतिहर्ता, प्रतिप्रस्थाता, प्रशास्ता, प्रस्तोता, तृन्नन्ता ऋत्विगाख्याः ॥

॥ २४४ ॥ नप्तृनेष्टृत्वष्टृ[4]क्षत्तृहोतृपोतृजामातृपितृमातृभ्रातृदुहितृ ॥ २—९४ ॥

अत्र क्षत्ता रुद्र इति भेदः ॥ पाति पिता ॥ मानयति माता ॥ दोग्धि सर्वमर्थं पितुः सकाशात् दुहिता ॥ " आपो[5] ह्रस्वश्च " इति भोजोक्तेः तृच् । अप्ता यज्ञः[6] ॥

॥ २४५ ॥ सुञ्यसेः ऋन् ॥ २—९५ ॥

सुतरामस्यते त्यज्यते परस्मै दीयत इति स्वसा ॥

॥ २४६ ॥ यतेः वृद्धिश्च ॥ २—९६ ॥

याता भ्रातृजाया ॥

---

१. G omits च.
२. A चा.
३. G adds एभ्यः संज्ञायां चानिटौ
४. G omits -त्वष्टृ-
५. G अपो.
६. P याज्ञः.

॥ २४७ ॥ नञि च नन्देः ॥ २—९७ ॥

ऋन् वृद्धिश्च । ननान्दा पत्युर्भगिनी । बाहुलकान्नञो नलोपाभावः ॥

॥ २४८ ॥ दिवेः ऋः ॥ २—९८ ॥

देवृशब्दो देवरार्थः ॥

॥ २४९ ॥ नयतेः डिच्च ॥ २—९९ ॥

नृशब्दः ॥

॥ २५० ॥ सव्ये स्थः छन्दसि ॥ २—१०० ॥

[१]डिद्दस्यात् । लोकेऽपि भोजः । बाहुलकात् अलुक् । "स्थास्थिन्स्थूणामिति वाच्यम्" इति स्वृशब्दस्य षत्वम् । सव्येष्ठा सारथिः ॥

॥ २५१ ॥ अर्तिसृधृधम्यश्यवितृभ्यो निः ॥ २—१०१ ॥

प्राप्यतेऽग्निरत्र **अरणिः** ॥ गम्यतेऽनया **सरणिः** ॥ ध्रियते स्थिरमवतिष्ठते[२] **धरणिः** ॥ धमिः सौत्रः । **धमनिः** सिरा ॥ व्याप्नोति शत्रुं **अशनिः**, व्याप्नोत्याकाशं वा ॥ रक्ष्यते नृपैः **अवनिः** ॥ तरति द्यां **तरणिः** सूर्यः ॥ कृरञ्जिकट्यटिभ्यश्च भोजः । करणिः अनुकृतिः ॥ रञ्जेः निपातनान्नलोपः । [३]रज्यन्त्यत्र जना रजनिः निशा ॥ कटनिः शैलमेखला ॥ प्राप्यते ज्यया अटनिः चापाग्रम् ॥

॥ २५२ ॥ आङि शुचेः सनश्छन्दसि ॥ २—१०२ ॥

बाहुलकात् लोकेऽपि । शुचेः दीप्त्यर्थात् समन्तात् ज्वलितुमिच्छन् **आशुशुक्षणिः** । बाहुलकात् शुचेः सन्यनिट्त्वम् ॥

---

१. G omits डिद्द········सव्येष्ठा.
२. G omits भवतिष्ठते.
३. G रज्यत्रत्व-

॥ २५३ ॥ कृषेरादेश्च चः[1] ॥ २—१०३ ॥

कृष्यते कर्मभिः चर्षणिः नरः ॥

॥ २५४ ॥ अदेर्मुट् च ॥ २—१०४ ॥

अद्मनिः अग्निः ॥

॥ २५५ ॥ वृतेश्च ॥ २—१०५ ॥

वर्तन्तेऽस्यां जनाः वर्तनिः । 'मुट् च' इत्यनुवृत्त्या वर्त्मनिः इत्यपि माधवः । सापि मार्ग एव ॥

॥ २५६ ॥ क्षिपेः किच्च ॥ २—१०६ ॥

क्षिपणिः आयुधम् ॥

॥ २५७ ॥ अर्चिशुचिहुसृपिछृदिछादिभ्य इसिः[3] ॥ २—१०७ ॥

अन्त्य इकार इत् । पूज्यते अर्चिः ॥ दीप्यते शोचिः ॥ हविः ॥ सर्पति स्यन्दते सर्पिः ॥ छर्दिः वमनम् ॥ णिलोपः । "इस्मन्त्र" इति ह्रस्वः । छदिः गृहोर्ध्वावरणम्[4] ॥ रुचेश्च भोजः । रोचिः ॥

॥ २५८ ॥ बृंहेर्नलोपश्च ॥ २—१०८ ॥

लघूपधगुणः । बृंहयति धर्मकृत्यानि बर्हिः दर्भोऽग्निश्च । वर्धते वा ॥

॥ २५९ ॥ द्युतेरिसिन्नादेश्च जः ॥ २—१०९ ॥

ज्योतिः ॥

---

१ P च.

२. G -हसृवि-

३. A हविः.

४. A -णः.

|| २६० || वसौ रुचेः संज्ञायाम् || २—११० ||

वसुरोचिः अग्निः ||

|| २६१ || भुवः कित् || २—१११ ||

भुविः शरत् ||

|| २६२ || [1]सहेर्धश्च || २—११२ ||

सधिः [2]सत्त्वम् ||

|| २६३ || पिबतेस्थुक्[3] || २—११३ ||

पाथिः सूर्यः ||

|| २६४ || जनेरुसिः || २—११४ ||

जनुः जन्म ||

|| २६५ || मनेर्धश्छन्दसि || २—११५ ||

अन्त्यस्य धः । [4]मधुः सान्तः । क्षौद्रार्थः ||

|| २६६ || अर्तिपॄवपियजितनिधनितपिभ्यो नित् || २—११६ ||

व्याप्नोति अरुः व्रणः || पूर्यते सिराभिः पर्व || [5]उप्यन्ते सर्वदुःखान्यत्र वपुः || इज्यतेऽनेन यजुः || तनुः शरीरम् || धनुः || त्रपुः सीसम् || अन्त्यास्त्रयः [6]उदात्ता अप्युक्ताः ||

|| २६७ || प्रेऽदः || २—११७ ||

प्रपूर्वाददेः उसिः नित् स्यात् । प्रादुः प्रकाशे अव्ययम् ||

---

१. G सहो धुश्च.

२. G स्वत्त्वम्.

३. GD and P add च.

४. G omits this sentence.

५. G omits उप्यन्ते सर्व-

६. G उदन्ताः.

॥ २६८ ॥ एतेर्णिच्च ॥ २—११८ ॥

ऐतीति आयुः ॥

॥ २६९ ॥ चक्षेः शिच्च ॥ २—११९ ॥

चक्षिङः ख्याञभावः । पश्यन्त्यनेन चक्षुः ॥

॥ २७० ॥ बहुलमन्यत्रापि ॥ २—१२० ॥

चक्षेः शित्त्वमन्यत्रापि स्यात् । तेनास्यानुदात्तेत्त्वात् युचि ख्याञभावः । विचक्षणः ॥

॥ २७१ ॥ मुहेः कित् ॥ २—१२१ ॥

उसिः कित् स्यात् । मुहुः ॥

॥ २७२ ॥ कॄगॄशॄपॄचतिभ्यः ष्वरच् ॥ २—१२२ ॥

कर्वरः व्याघ्रः[4] ॥ [5]**गर्वरः** दर्पः ॥ **शर्वरः** सायाह्नः ॥ षित्त्वात् ङीष् । शर्वरी [6]रात्रिः ॥ **पर्वरः**[7] कुटिलकेशः ॥ चतेः गत्यर्थवृत्तेः गम्यतेऽत्र **चत्वरः** ॥

॥ २७३ ॥ नौ सदेः ॥ २—१२३ ॥

निषीदन्ति लगन्त्यत्र पदार्था इति **निषद्वरः** पङ्कः । "सदिरप्रतेः" इति षत्वम् ॥

इत्युणादिवृत्तौ प्रक्रियासर्वस्वे द्वितीयः पादः ॥



---

१. G omits this sentence.

२. G omits this sūtra.

३. P adds शित्त्वात्.

४. G omits this word.

५. G omits this word.

६. G and A omit रात्रिः.

७. G -रम्.

॥ अथ तृतीयः पादः ॥

॥ २७४ ॥ छित्वरछत्वरधीवरपीवरमीवर[1]चीवरतीवर-नीवरगह्वरकट्वरसंयद्वराः ॥ ३—१ ॥

छित्वरः कार्यातिक्रमी ॥ **छत्वरः** निकुञ्जः । चत्वरमिति माधव-पाठः ॥ दधाति गृ[2]ह्णाति मत्स्यान् **धीवरः** ॥ [3]प्यायतेः **पीवरः** ॥ **मीवरः** हिंस्रः ॥ चीयते आर्ज्यते विस्तीर्यते वा **चीवरः** ॥ **तीवरः** म्लेच्छः ॥ **नीवरः** गम्भीरः ॥ गाह्यते **गह्वरः** ॥ सिञ्चति **कट्वरः** द्रवः ॥ **संयद्वरः** अनूपदेशः । उपह्वरोदुम्[4]बरकूबरतूवरादयश्च भोजोक्ताः । उपह्वरं समीपम् ॥ कूबरः रथाङ्ग[5]म् ॥ [6]तूवरः निश्मश्रुः ॥ आद्युक्तेः डंब[7]रादि ॥

॥ २७५ ॥ इण्सिञ्दीङुष्यविभ्यो नक् ॥ ३—२ ॥

व्याप्नोति विश्वं **इनः** ॥ **सिनं** शरीरम् ॥ **दीनः** ॥ **उष्णम्** ॥ "ज्वरत्वर" इत्यूठ् । **ऊनः** ॥ जेश्च भोजः । अभिभवति वैदिकान् जिनः बुद्धः ॥

॥ २७६ ॥ फेनमीनौ ॥ ३—३ ॥

फणत्यूर्ध्वं गच्छति **फेनः** ॥ मीयते हिंस्यते **मीनः** ॥

॥ २७७ ॥ कृषेर्वर्णे ॥ ३—४ ॥

कर्षति दृष्टिं **कृष्णः** ॥

---

१. G omits-**मीवर**-
२. G omits **गृह्णाति**.
३. GD omits this sentence.
४. G -**दुम्वर**-
५. GD **ङ्गः**.
६. G **रूपरो**.
७. GD **संब**-

S. 460

॥ २७८ ॥ बंधे[1]र्ब्रधिबुधी च ॥ ३—५ ॥

बधेर्नक् । एतावादेशौ स्तः । उदयेन लोकान् कर्मणि बध्नाति **ब्रध्नः** ॥ पृथ्वीबद्धत्वात् **बुध्नः** मूलम् ॥

॥ २७९ ॥ धापॄवस्यज्यतिभ्यो नः ॥ ३—६ ॥

धीयन्ते भक्षणार्थं[2] उद्धीयन्ते **धानाः** ॥ पूरयति तरुं **पर्णम्** ॥ वसन्त्यनेन **वणिजः** ॥ **वस्नं** मूल्यम् ॥ अजेर्वी । क्षिपति धर्मं **वेनः** ॥ अत्नः[4] वायुः । सिवेश्च भोजः । वस्य ऊठ् । गुणः । यण् । स्योनं[3] मुखम् ॥

॥ २८० ॥ पणेरिच्चोपधायाः ॥ ३—७ ॥

ईत्त्वसामर्थ्यान्न गुणः । **पिण्णः**[5] तिलकल्कः ॥

॥ २८१ ॥ लक्षेरट्[6] च ॥ ३—८ ॥

लक्षेः नः । तस्य अट् च । **लक्षणा** दुर्योधनसुता ॥

॥ २८२ ॥ सिवेष्टेर्यू च ॥ ३—९ ॥

इवशब्दस्य यूभावः । **स्यूना** रशना ॥

॥ २८३ ॥ कॄवॄजॄसिद्रुपन्यनिस्वपिभ्यो नित् ॥ ३—१० ॥

एभ्यो नो नित् स्यात् । कीर्यते शब्दोऽत्र **कर्णः**[7] । किरति शरान् धनं वा कर्णः ॥ आवृणोति द्रव्यमिति पूर्वं रक्तादिः **वर्णः** । इह तु वृणुते स्वधर्ममिति ब्राह्मणादिरिति[8] भेदः ॥ **जर्णः** तरुः ॥ सिनोति बध्नाति रिपुं **सेना** ॥

---

1. G बन्धे-
2. G घर्थं.
3. G स्योनः.
4. G उत्व-
5. G विण्णः.
6. A रिट्.
7. G, GD and P नक्.
8. A and G omit इति.

वेगेन द्रवति द्रोणः । द्रूयते प्राप्यते व्रीह्यादिनेति मानपात्रं च ॥ पन्न मानम् । प्राणन्त्यनेन अन्नम् ॥ स्वप्नः ॥ त्रश्च भोजः । प्लवते वलैति[1] तर्णः[2] वत्सः ॥

॥ २८४ ॥ धेट ई च ॥ ३—११ ॥

गुणः । [3]धेना वाक् ॥

॥ २८५ ॥ तृषिशुषिरसिभ्यः कित् ॥ ३—१२ ॥

निच्च स्यात् । तृष्णा ॥ शुष्णः दैत्यः ॥ रस्नः अश्वः ॥

॥ २८६ ॥ सुञो दीर्घश्च ॥ ३—१३ ॥

सूना वधस्थानम् ॥

॥ २८७ ॥ रमेस्त च ॥ ३—१४ ॥

रमतेऽनेन रत्नम् ॥

॥ २८८ ॥ रास्नासास्नास्थूणावीणाः ॥ ३—१५ ॥

रास्ना रज्जुः ॥ सास्ना ॥ तिष्ठति स्थूणा । [5]क्षिप्यते नखैः वीणा । सुम्नद्युम्न[6]निम्नशिश्नाभीक्ष्णचौत्नादयश्च भोजोक्ताः । सुम्नं सुखम् ॥ द्युम्नं द्रविणम् ॥ च्यौत्नी कांस्यादि पात्री ॥

॥ २८९ ॥ गादाभ्यां इष्णुच्[7] ॥ ३—१६ ॥

आभ्यामिष्णुच् । "आद्गुणः" । गेष्णुः रङ्गोपजीवी ॥ देष्णुः दाता ॥

---

१. P वल्गति.

२. G पर्णो.

३. G इत्य.

४. G omits the word.

५. G and A omit this sentence.

६. G omits -द्युम्न-

७. GD, A and P चेष्णुच्.

॥ २९० ॥ कृत्यशूभ्यां क्स्नः[1] ॥ ३—१७ ॥

[2]कित्त्वादगुणः । वेष्टयति व्याप्नोति **कृत्स्नम्** ॥ "छशां षः" । "षढोः कः" । षत्वम् । **अक्ष्णं** खण्डम् ॥

॥ २९१ ॥ तिजेर्दीर्घश्च ॥ ३—१८ ॥

झलि "चोः कुः" चर्त्वषत्वे । "तिज निशाने" **तीक्ष्णम्** ॥

॥ २९२ ॥ श्लिषेरच्चोपधायाः ॥ ३—१९ ॥

षस्य कः । श्लिष्यति स्पर्शे[3] **श्लक्ष्णम्** स्निग्धम् ॥

॥ २९३ ॥ यजिमनिशुन्धिदसिजनिभ्यो युः[4] ॥ ३—२० ॥

बाहुलकादनादेशाभावः । **यज्युः** ऋत्विक् ॥ ज्ञायते परैः **मन्युः** ॥ **शुन्ध्युः** पवित्रम् ॥ ण्यर्थान्तर्भावात् उपक्षीणोऽत्यर्थं[5] **दस्युः** ॥ **जन्युः** प्राणी ॥

॥ २९४ ॥ भुजिमृङ्भ्यां युक्त्युकौ ॥ ३—२१ ॥

क्रमात् स्तः । **भुज्युः** ऋषिः ॥ **मृत्युः** ॥

॥ २९५ ॥ सर्तेरयूः ॥ ३—२२ ॥

सरयूः नदी । वृत्तौ "सर्तेरयुः" इत्युदन्तमुक्त्वा सरयुः इत्युदाहृत्य "अप्राणिजातेः" इत्यूङि सरयूः इत्युक्तम् ॥

॥ २९६ ॥ पानीविषिभ्यः पः ॥ ३—२३ ॥

पिबति सुखं **पापम्** ॥ **नेपः** पुरोहितः ॥ **वेष्पः** जलम् ॥ अलिशीङ्भ्यां च भोजः । **अल्पः** ॥ शेते **शेपः** ॥

---

१. A क्सः.
२. G omits this sentence.
३. A and GD स्पर्शः.
४. G युच्.
५. G क्तम्.

॥ २९७ ॥ च्युवः किद्दीर्घश्च ॥ ३—२४ ॥

च्यूपः संग्रामः ॥

॥ २९८ ॥ स्त्यः संप्रसारणमूश्च ॥ ३—२५ ॥

स्त्यस्य प्रसारणे इत्वे पूर्वरूपत्वे च कृते ऊत्वम् । **स्तूपः** संघातः । 'उश्च' इति पठित्वा स्तुप इत्याह माधवः ॥

॥ २९९ ॥ [1]सुशृभ्यां निच्च ॥ ३—२६ ॥

नित्पः स्यात् । ऊश्चान्तादेशः । सूयते गवा **सूपः** ॥ ऊतो रपरत्वात् तुषादयो [illegible] **शूर्पः** ॥ किरतेश्च भोजः । कूर्पं भ्रूमध्यम् ॥

॥ ३०० ॥ कुयुभ्यां च ॥ ३—२७ ॥

नित् प ऊश्च स्यात् । कौति जलेन **कूपः** ॥ यौति पशुरत्र **यूपः** ॥

॥ ३०१ ॥ खष्पशि[2]पशष्पबाष्पपर्परूपतल्पाः ॥ ३—२८ ॥

खष्पः बलात्कारः ॥ **शिष्पः** कालयोगः ॥ शस्यते हिंस्यते पशुभिः **शष्पं** तृणम् ॥ वातेष्पुक् । निर्गच्छति **बाष्पम्** । पृणाति पालयति जलात् **पर्पः** प्लवः ॥ रौति **रूपः** हरिणः ॥ तलति प्रतितिष्ठत्यत्र **तल्पः** । शिल्पक्षुपनी[3]पचम्पाशम्[4]पादयश्च भोजोक्ताः । शिल्प्यते आरभ्यते शिल्पम् ॥ क्षुपः ह्रस्वशाखस्तरुः ॥ नीपः वृक्षभेदः ॥ चम्पा पुरी ॥ शाम्यति तमोऽनया शम्पा विद्युत् । [5]चम्पा विद्युदिति केचित् ॥ आद्युक्तेः पम्पा सरः ॥

---

१. G सू-

२. G शिल्प-

३. G omits शिल्प……पुरी but has instead शिष्पक्षुपनीपचंवा पुरी.

४. A and G omit शम्पा.

५. G omits चम्पा विद्युत्. GD चम्पा अपि.

॥ ३०२ ॥ स्तनिहृषिपुषिशुषिगदिमदिभ्यो णेरित्नुच् ॥ ३—२९ ॥

"अयामन्त" इति णेरयादेशः । **स्तनयित्नुः** मेघः ॥ **हर्षयित्नुः** सुजनः ॥ **पोषयित्नुः** भर्ता[1] ॥ **शोषयित्नुः** सूर्यः ॥ **गदयित्नुः** वाग्मी ॥ **मदयित्नुः** शीधुः ॥ घुषिगलिमण्डिजनिनन्दिभ्यश्च भोजः । घोषयित्नुः पिकः ॥ गलयित्नुः मेघः ॥ मण्डयित्नुः कामुकः ॥ जनयित्नुः पिता ॥ नन्दयित्नुः पुत्रः ॥

॥ ३०३ ॥ कृहनिभ्यां क्नुः ॥ ३—३० ॥

कृणुः खड्गादिकोशकृत् ॥ बाहुलकात् अझलादावपि क्नित्यनुनासिकलोपः । **हनुः** । पुनरुक्तिः स्वरभेदात्[2] ॥ 'कृहनिभ्यां क्त्नुः' इति[3] च पाठः । कृत्नुः ऋषिः ॥ हत्नुः हन्ता ॥

॥ ३०४ ॥ गमेः सन्वच्च ॥ ३—३१ ॥

गमेः क्नुः सन्वत् स्यात् । प्राग्वदनुनासिकलोपः । **जिगनुः** अग्निः । अत्रापि क्त्न्वधिकारे जिगत्नुः ॥

॥ ३०५ ॥ दाभाभ्यां नुः ॥ ३—३२ ॥

दानुः दाता ॥ **भानुः** ॥

॥ ३०६ ॥ वचेर्गश्च ॥ ३—३३ ॥

वग्नुः वाग्मी ॥

॥ ३०७ ॥ धेट इच्च ॥ ३—३४ ॥

गुणः । पीयते वत्सेन **धेनुः** ॥

---

१. G माता.

२. G omits कृहनि........भेदात्.

३. G omits इति च पाठः.

॥ ३०८ ॥ सुवः कित् ॥ ३—३५ ॥

सूनुः ॥

॥ ३०९ ॥ जहातेर्द्वे[1]ऽन्त्यलोपश्च ॥ ३—३६ ॥

[2]द्वित्वमन्त्यलोपश्च । जहात्यधर्मं **जह्नुः** ॥

॥ ३१० ॥ स्थो णुः ॥ ३—३७ ॥

स्थाधातोः णुः स्यात् । **स्थाणुः** ॥

॥ ३११ ॥ अजिवृरीभ्यो नित्[3] ॥ ३—३८ ॥

[4]एभ्यो णुः नित् स्यात् । अजेर्वीत्वम् । गुणः । निर्गच्छति शब्दोऽस्मात् **वेणुः** ॥ **वर्णुः** नदः ॥ रीयते च्यवते **रेणुः** ॥

॥ ३१२ ॥ विषेः किच्च ॥ ३—३९ ॥

विष्णुः ॥

॥ ३१३ ॥ कृदाधारार्चिकलिभ्यः कः ॥ ३—४० ॥

बाहुलकात् कस्येत्वम् न । करोति वेगगतिं **कर्कः** श्वेताश्वः ॥ **दाकः** यज्ञः ॥ **धाकः** ओदनः ॥ दानं कुर्वन्त्यस्यां राति सुखं वा **राका** ॥ अर्चेः सेट्त्वेऽपि "तितुत्र" इति कस्यानिट्त्वम् । "चोः कुः" । अर्च्यते **अर्कः** ॥ क्षिप्यते **कल्कं** मलम् ॥ कुतुस्तूयिभ्यश्च भोजः । कौति कोकः ॥ क्रमाद्वर्धते तोकं बालः ॥ अल्पस्य कौतुककरत्वात् स्तूयते जनैः स्तोकः ॥ ऊयेर्यलोपः । ऊकः समूहः ॥

---

1. A and GD **च लोपश्च.**
2. G omits **द्वित्व……श्च.**
3. G **निच्च.**
4. G omits **एभ्यो……स्यात्.**

॥ ३१४ ॥ सृवृभूशुषिमुषिभ्यः कित् ॥ ३—४१ ॥

सृका आयुधभेदः ॥ **वृकः** ॥ **भूकः** कालः ॥ **शुष्कः** नीरसः। निष्ठया सिद्धेऽपि उक्तिः अभूतकाले सिद्ध्यर्थम् ॥ वस्त्रादिना मुष्यते तिरोधीयते **मुष्कः** ॥

॥ ३१५ ॥ शुकवल्कोल्काः ॥ ३—४२ ॥

शोभते **शुकः**। शोः गत्यर्थाद्वा ॥ संव्रियतेऽनेन **वल्क** तरुत्वक् ॥ ओषति दहति **उल्का**। षस्य लः ॥ "निष्कतुरुष्कोदर्कालर्कशुल्कफल्ककिञ्जल्कोल्काछेककेकादयः" इति भोजः। अलर्कः उन्मत्तश्वा ॥ "शल गतौ" गच्छत्यनेन दत्तेन शुल्कः श्वा ॥ फल्कः अन्धकभेदः ॥ किञ्चिदल्पः सन् जलत्यतीक्ष्णो भवति किञ्जल्कः ॥ "कै शब्दे" केका ॥

॥ ३१६ ॥ इण्भीकापाशल्यतिमर्चिभ्यः कन् ॥ ३—४३ ॥

एति सङ्ख्यान्तरेषु व्याप्नोति **एकः** ॥ बिभेति सर्पादेः **भेकः** ॥ "कै" **काकः** ॥ पिबति स्तनं **पाकः**। पाति स्वबलमिति दैत्यश्च ॥ शलति गच्छति अवयविभ्यः **शल्क** शकलम् ॥ सततं गम्यते **अत्कं** समीपम् ॥ "मर्चिः" सौत्रो गत्यर्थः। धावति **मर्कः** मार्जारः ॥

॥ ३१७ ॥ नौ हः ॥ ३—४४ ॥

निलीय गच्छति **निहाका** गोधा ॥

॥ ३१८ ॥ स्यम ईट् च ॥ ३—४५ ॥

स्यमीकं जलम्। पुंसि मेघश्च ॥

---

१. G and GD कुसृ-
२. G space is left out for writing नीरसः.
३. G सश्च.
४. G omits कै.
५. G omits पाकः.
६. G दैत्यश्व[श्च] पाकः.
७. G omits शल्कम्.

॥ ३१९ ॥ अजियुधूनीभ्यो दीर्घश्च ॥ ३—४६ ॥

अजेर्वी । वीका अक्षिमलम् ॥ यौति केशेषु यूका ॥ धूका पताका ॥ नीका घृतम् ॥ शुघुभ्यां च भोजः । शूकः ॥ "घुङ् शब्दे" घूकः उलूकः ॥

॥ ३२० ॥ ह्रियो रश्च लो वा[2] ॥ ३—४७ ॥

ह्रीकः पिता ॥ ह्लीकः लज्जः ॥

॥ ३२१ ॥ शकेरुनोन्त्योन्त्युनयः ॥ ३—४८ ॥

शक्नोति द्यां गन्तुं शकुनः शकुन्तः शकुन्तिः शकुनिः[3] ॥

॥ ३२२ ॥ भुवो झिच् ॥ ३—४९ ॥

"झोऽन्तः" । भवन्तिः कालः ॥ अवेश्च भोजः । अवन्तिः नृपः ॥

॥ ३२३ ॥ कन्युच् क्षिपेश्च ॥ ३—५० ॥

क्षिपेः भुवश्च कन्युच्[6] । क्षिपण्युः वायुः ॥ भुवन्युः अग्निः ॥

॥ ३२४ ॥ चनुङ् नुदेश्च ॥ ३—५१ ॥

नुदेः क्षिपेः भुवश्च चनुङ् । नुदनुः क्षिपनुश्च वायुः ॥ भुवनुः भवितव्यता ॥ नदिवदिपतिदाभ्यश्च भोजः । नदनुः मेघः ॥ वदनुः वक्ता ॥ पतनुः पक्षी ॥ ङित्त्वादालोपः । दनुः असुरमाता ॥

---

१. G -युधी-
२. G लोपः.
३. G omits this word.
४. A ह्निः.
५. G अपे-
६ P omits कन्युच्.
A omits क्षिपेः भुवश्च कन्युच्.
७. G अनुङ् नदेश्च.
८. GD omits भुवः.
९. G नदनुः.

॥ ३२५ ॥ कृवृतृदारिभ्य उनन् ॥ ३—५२ ॥

करोऽत्यन्यहितं **करुणः** दयावान्। करोति हितमनयेति करुणा दया च ॥ व्रियते प्रार्थ्यते **वरुणः** ॥ बाल्यं तरति **तरुणः** ॥ दारयति पैरान् **दारुर्णः** ॥

॥ ३२६ ॥ वो रश्च लो वा ॥ ३—५३ ॥

तरतेरुननि परे रेफस्य लत्वं वा स्यात्। **तलुनः** अपि तरुण एव ॥

॥ ३२७ ॥ क्षुधिपिशिमिथिभ्यः कित् ॥ ३—५४ ॥

क्षुधुनः बुभुक्षावान् ॥ पिंशति विभजति गूँढार्थं **पिशुनः** ॥ "मिथृ संगमे" **मिथुनर्म्** ॥ "फलेः गुक्च" इति भोजः। फलति शुभं फल्गुनी नक्षत्रम् ॥

॥ ३२८ ॥ अशेर्लशश्च ॥ ३—५५ ॥

लशुनं पलण्डुभेदः ॥

॥ ३२९ ॥ अर्जेर्णिलुक् च ॥ ३—५६ ॥

अर्जेरुनन् णिलुक् च। "अर्ज प्रतियत्ने" निर्मलीकृतत्वात् धवलो **अर्जुनः**। अर्जयति श्रियमर्जुनः ॥

॥ ३३० ॥ तृणाख्यायां चित् ॥ ३—५७ ॥

अर्जुनाख्यं तृणम्। स्वरे भेदः ॥

---

१. G कृ-
२. G omits this sentence.
३. G वरान्.
४. GD दारुणं.
५. G रूरन्.
६. G omits पिंशति.
७. GD गृध्रार्थं.
८. GD मिथुनः.
९. GD लश.

॥ ३३१ ॥ अर्तेश्च ॥ ३—५८ ॥

चिदुनन् स्यात् । गच्छति[1] अरुणः ॥

॥ ३३२ ॥ धारेः णिलुक् च ॥ ३—५९ ॥

णिलुकि वृद्ध्यभावः । धरुणः धर्ता । अस्य नित्त्वं चित्त्वं च विना प्रत्ययस्वर एव दृष्टः ॥

॥ ३३३ ॥ अजियमिशीङ्भ्यश्च ॥ ३—६० ॥

उनन् स्यात् । प्राप्यत्वात् वयुनं भद्रम् ॥ उपरमयति पापं यमुना ॥ शयुनः अजगरः । वयुनादेरपि धरुणवत्स्वरो दृष्टः ॥

॥ ३३४ ॥ वृतवदिहनिकमिकषियुमुचिभ्यः[2] सः ॥ ३—६१ ॥

"तितुत्र" इति सस्येडभावः । वर्षम् ॥ तर्षः सूर्यः ॥ चर्त्वम् । वदति किञ्चित् वत्सः बालः ॥ हन्ति सम्यग्गच्छति हंसः ॥ काम्यते कंसः पात्रम् ॥ "षढोः कः" कष्यते भुजेन कक्षः । कषति हिनस्तीति वनं च ॥ संगच्छते योषा ॥ "चोः कुः" मोक्षः ॥ "युमाभ्यां षः" इति भोजोक्त्या माषः ॥

॥ ३३५ ॥ प्लुषेरच्चोपधायाः ॥ ३—६२ ॥

प्लक्षः ॥ यजिवामाभ्यश्च भोजः । व्रश्चादि षः । कः । सेव्यते यक्षः । वासा आटरूषः ॥ मासः ॥

॥ ३३६ ॥ मनेर्दीर्घश्च ॥ ३—६३ ॥

मन्यते काङ्क्ष्यते मांसम् ॥

॥ ३३७ ॥ अशेर्देवने ॥ ३—६४ ॥

"छशां षः" । कः । द्यूतकर्मण्यश्नुते अक्षम् ॥

१. G omits गच्छति. २. G and A omit युमुचिभ्यः.

॥ ३३८ ॥ नदेः कश्च ॥ ३—६५ ॥

नक्षं नभः ॥

॥ ३३९ ॥ स्नुव्रश्चिकृ[1]त्यृषिभ्यः कित् ॥ ३—६६ ॥

स्नुषा ॥ ग्रहिज्यादिना प्रसारणम् । सोपधत्वात् "स्कोः" इति सलोपः । व्रश्चादि ष[2]त्वम् । कत्वम् । व्रश्च्यते **वृक्षः** ॥ **कृ[3]त्सम्** उदकम् ॥ गच्छति **ऋक्षं** नक्षत्रम् ॥ रिषिशॄभ्यां च भोजः । रलयोरभेदात् लिक्षा क्षुद्रजन्तुः ॥ "ॠत इत्" दीर्घः । शीर्यते मृतौ शीर्षम् ॥

॥ ३४० ॥ ऋषेर्जातौ ॥ ३—६७ ॥

ऋक्षः वानरः । पूर्वेण सिद्धेऽप्युक्तेः फलं चिन्त्यम् ॥

॥ ३४१ ॥ गृधिपण्योः दकौ च ॥ ३—६८ ॥

गृत्सः गृध्नुः ॥ पतन्त्यनेन **पक्षः** । भोजस्त्वाह "अमेर्नित्" । सो नित् स्[4]यात् । अंसः ॥

॥ ३४२ ॥ उन्देः नलोपश्च ॥ ३—६९ ॥

स[5] च नित् स्यात् । **उत्सः** निर्झरः इति ॥

॥ ३४३ ॥ अशेः सरन्[6] ॥ ३—७० ॥

"तितुत्र" इति सस्येडभावः । अश्नुते व्याप्नोति पदानि **अक्षरम्** ॥ क्यजिमाभ्यश्च भोजः । केसरः ॥ अजेर्वी । वेसरः चमर[7]ः ॥ मासरः आचामः ॥

---

१. A -कृषिभ्यः.

२. G षः.

३. A, GD and P कृत्स्नमुदरम्.

४. G omits स्यात्.

५. G सश्च.
A सश्च.

६. G सरः.

७. GD अश्वतरः.

॥ ३४४ ॥ वसेश्च ॥ ३—७१ ॥

सरन् स्यात् । "सःस्य" इति तः । वसत्यस्मिन् ऋतुगणो वत्सरः ॥

॥ ३४५ ॥ संपूर्वाच्चित्[1] ॥ ३—७२ ॥

स्वरे भेदः । संवत्सरः ॥ परिवत्सरः ॥

॥ ३४६ ॥ कृधूमदिभ्यः कित् ॥ ३—७३ ॥

कृसरः तिलमिश्रान्नम् ॥ धूयते निरस्यते धूसरः ॥ माद्यति मुह्यत्यनेन मत्सरः ॥ केश्च भोजः । किसरः गन्धद्रव्यम् ॥

॥ ३४७ ॥ पते रश्च लो[2] वा ॥ ३—७४ ॥

पतेः[3] सरन् रस्य लत्वं च वा स्यात् । वत्सरः वत्सलः गोमान् ॥

॥ ३४८ ॥ तन्यृषिभ्यां क्सरन् ॥ ३—७५ ॥

कित्त्वात् "अनुदात्तोपदेश" इति नलोपः । तसरः कौशेयसूत्रम् ॥ ऋक्षरः कण्टकः ॥

॥ ३४९ ॥ पीयुकणिभ्यां कालन् ह्रस्वः [4]प्रसारणं च ॥ ३—७६ ॥

[5]पीयेः ह्रस्वः । कणेः प्रसारणम् । पीयतिः सौत्रः । पियाल[6]ः चारः ॥ कुणालः पक्षी ॥ [7]तमिविडिमृणिकुलिपलिपञ्चिभ्यश्च भोजः । तमालः ॥

---

१. G, P and A संपूर्वात्.

२. G कः.

३. G adds लोपः.

४. A and G संप्र.

५. G omits पीयेः......णम्.

६. G पीयालः.

७. G तमिविड्डिमुणि-

बिडालः मार्जारः ॥ "मृण हिंसायाम्" मृदुत्वात् पीड्यते मृणालम् ॥ [1]बन्धुमत्वात् कुलालः ॥ लघुत्वात् गच्छति वायुना पलालम् ॥ विस्तृतत्वात पञ्चालाः ॥ पुनश्चाह "कम्पेर्नलोपश्च"। भेदनावस्थायां चलति घटात कपालम् ॥ "भञ्जेर्गश्च" नलोपश्च। भगालं कपालमेव ॥ "सर्तेर्गुक् च" कालन्नपि। सरति सृगालः ॥ "कीलालकङ्कालहिन्तालवेतालजम्बालादयश्च" कीलति प्रतितिष्ठति देहे कीलालं रक्तं जलं च ॥ कङ्कति गच्छति कङ्कालः [2]कलेबरम् ॥ हिन्तालः तरुः ॥ वेति गच्छति [3]अश्नाति खादति वा मांसं वेतालः ॥ जमति गिरति वन्यवस्तूनि जम्बालः ॥ आद्युक्ते चक्रवालकरवालालवालादयः इति ॥

॥ ३५२ ॥ कुटिकुषिभ्यां काकुः ॥ ३—७९ ॥

कुटाकुः दरिद्रः ॥ **कुषाकुः** मूषिकः ॥ शिवेश्च भोजः। शिवाकुः ऋषिः।

॥ ३५३ ॥ चटिकटिभ्यामाकुः ॥ ३—८० ॥

कुचाटः मुनिः ॥ **कटाकुः** कुटुम्बपोषकः ॥ "चेरुपन्योर्डित्" इति भोजः। उपचाकुः मुनिः ॥ निचाकुः निपुणः ॥

॥ ३५४ ॥ सर्तेर्दुक् च ॥ ३—८१ ॥

सृदाकुः वायुः ॥

---

१. G बन्धुत्वात्.

२. G omits कलेबरम्.

३. G अश्नोति.

॥ ३५५ ॥ पर्देर्नित् संप्रसारणमल्लोपश्च ॥ ३—८२ ॥

शूत्कारादिकुत्सितशब्दं करोति **पृदाकुः** सर्पः[१] ॥

॥ ३५६ ॥ सृयुवचिभ्योऽन्युजागूजक्नुचः ॥ ३—८३ ॥

[३]**सरण्युः** मेघः ॥ योरागूच् । मिश्रीक्रियते **यवागूः** ॥ वचेरक्नुच् । **वचक्नुः** विप्रः ॥

॥ ३५७ ॥ आनकः शीङ्भियः ॥ ३—८४ ॥

शयानकः अजगरः ॥ **भयानकः**[४] ॥ लूषूशिङ्घिधाञ्भ्यश्च । लवानकः देशः ॥ शिङ्घानकः श्लेष्मा ॥ धानाकः संग्रामः ॥ "अनेर्डित्" इति भोजः । डित्वात् सर्वलोपः । आनकः पटहः ॥

॥ ३५८ ॥ उल्मुकदर्विहोमिनः[५] ॥ ३—८५ ॥

अचेर्लत्वम् । समवैत्यग्निना **उल्मुकः** ॥ दृणाति विभजत्यन्नं **दर्विः** भिस्सटा[६] ॥ **होमी** सर्पिः ॥

॥ ३५९ ॥ ह्रियः कुग्रश्च लो वा[७] ॥ ३—८६ ॥

ह्रीकुः ह्लीकुश्च लज्जावान् । "कैशीशमीरमिभ्यः कुः" इति भोजः । आत्वम् ॥ काकुः सविकारशब्दः ॥ शेकुः उद्भिद्भेदः ॥ स्थिरत्वात् शाम्यतीव शङ्कुः ॥ रमते वने रङ्कुः ॥

॥ ३६० ॥ [८]हसिमृग्रिण्वमिदमिलूपूधुर्विभ्यस्तन् ॥ ३—८७ ॥

---

१. G adds सृयुवचिभ्योनित्.
२. A -कृनुच्.
३. GD and P add सर्तेरन्युच्.
४. G adds आणको लुधुशिघिधाभ्यः.
५. A, GD and P होमिन्.
६. A सट्ट. GD and P सिटा.
७. G लोपः.
८. G repeats हसि.

"तितुत्र" इति इडभावः। हसेरुपादानार्थवृत्त्या **हस्तः** ॥ **मर्तः**[1] मनुष्यः ॥ गिरत्यर्पितवस्तु **गर्तः** ॥ एति नाना गच्छति **एतः** सारङ्गवर्णः[2] ॥ **वातः** ॥ अमति समाप्नोत्यनेनेति **अन्तं** समापनम् ॥ दमयति चर्वणीयानि **दन्तः** ॥ **लोतः** कीटभेदः ॥ पवतेः गतिवृत्त्या गच्छन्त्यनेनाब्धौ **पोतः** ॥ "लोपो व्योः" इति वलोपः। हिनस्त्यन्यान् **धूर्तः** ॥ वसेश्च भोजः। "वसु स्तम्भे" अज्ञत्वात् बस्तः छागः ॥

॥ ३६१ ॥ [3]नप्याप इट् च ॥ ३—८८ ॥

बाहुलकान्नलोपो न। अशुद्धत्वात् नाप्यते **नापितः** ॥

॥ ३६२ ॥ तनिमृङ्भ्यां किच्च ॥ ३—८९ ॥

कित्त्वादनुनासिकलोपः। निषेकादिक्रियां तनोति **ततः** पिता। याचनस्य मरणतुल्यत्वात् म्रियत इवानेन **मृतं**[4] याचितम् ॥ "हुर्छेर्मुट् च" इति भोजः। हुर्छेस्तन् किद्धातोर्मुट् च। "उपधायां च" इति दीर्घः। "राल्लोपः" इति[6] छलोपः। "हलि च" इति दीर्घः। मूर्तः[8] ॥

॥ ३६३ ॥ अञ्जिघृसिभ्यः क्तः ॥ ३—९० ॥

अक्तं जगत् ॥ "घृ क्षरणदीप्त्योः" **घृतम्** ॥ बध्नाति दृष्टिं **सितः** श्वेतः। निष्ठया सिद्धेऽपि[9] नामत्वादुक्तिः ॥ लूसूचितिभ्यश्च भोजः। लुनात्यन्यजन्तून् लूता ॥ प्रेरयत्यश्वान् सूतः ॥ जानन्त्यनेन चित्तम् ॥

॥ ३६४ ॥ दुतनिभ्यां दीर्घश्च ॥ ३—९१ ॥

---

१. G and GD मर्त्यो.
२. G and GD सारङ्गः.
३. A, GD and P नप्याप्नोतेरिट् च.
४. G मृतो याचितः.
५. A omits "उपधायां च" इति [दीर्घः.
६. G omits इति.
७. G and GD omit हलि...दीर्घः.
८. G मुहूर्तः, GD and P मूर्तः.
९. G सिद्धोऽपि.

क्तेः स्यात्। गच्छति दूतः॥ नलोपे कृते दीर्घः। तातः ततवत्॥ बाहुलकात् षिञः क्तः दीर्घश्च। बीजानि सिनोति सीता॥

॥ ३६५ ॥ जेर्मुट्चोदात्तः ॥ ३—९२ ॥

जेः क्तः तस्योदात्तः मुट् धातोः दीर्घश्च। जयत्युष्णं जीमूतः॥

॥ ३६६ ॥ लोष्टपलितौ ॥ ३—९३ ॥

लूयते खण्ड्यते लोष्टः॥ फलति विशीर्यतेनेन देह इति पलितं जरा॥ व्रातालातसुतपुतपित्तनिमित्तमुस्तपुस्तरूस्तबिस्तवितस्तादयो भोजोक्ताः। व्रजति व्रातः[1]॥ अर्धदग्धत्वेनान्यानुपयुक्तत्वात् न लात्येतत् अलातम्[3]॥ षूङो ह्रस्वः॥ सुतः॥ पुतः॥ स्फिक्॥ पतन्त्यनेन पित्तम्॥ "मुस खण्डने" खण्डयते वराहैः मुस्ता॥ पुषेः सत्त्वम्। पुष्यत्यनेन ज्ञानं पुस्तं पुस्तकम्॥ रूस्तानि वस्त्रदशाः॥ बिस्यते प्रेर्यते क्रयाद्यर्थं बिस्तम् कर्षपरिमितहेम॥ वितस्ता नदी॥ आद्युक्तेः अयुतम् नियुतम्[4]॥

॥ ३६७ ॥ हृश्याभ्यामितन् ॥ ३—९४ ॥

हरति चित्तं हरितः॥ व्याप्नोति श्येतः सितः॥

॥ ३६८ ॥ रुहे रश्च लो वा ॥ ३—९५ ॥

वर्णान्तरेभ्य[5] उपरि गच्छति रोहितः लोहितः॥ भोजेन पिशिपृषिभ्यां किदुक्तः। अंशीकृतत्वात् पिशितम्॥ पृषितं बिन्दुः॥

॥ ३६९ ॥ श्रुदक्षिस्पृहिभ्य आय्यः ॥ ३—९६ ॥

---

१. G, P व्रतश्च.

२. A, GD व्रातम्.

३. G अलातः.

४. G, P omits नियुतम्.

५. G पर्णा-

श्रवाय्यः श्रोता ॥ "दक्ष गतिहिंसनयोः" "दक्ष वृद्धौ शीघ्रार्थे च" सर्वत्र गन्तृत्वात् हिंसकत्वात् वृद्धाङ्गत्वात् शीघ्रगामित्वाद्वा **दक्षाय्यः** गृध्रः ॥ "अयामन्त" इति णेरय् । **स्पृहयाय्यः** स्पृहयालुः ॥ "स्पृहिगृहिभ्यः" इति पाठे गृहयाय्यः गृहस्वामी ॥

॥ ३७० ॥ दधिषाय्यः ॥ ३—९७ ॥

[1][दधिषाय्यः] आज्यार्थे निपात्यते ॥

॥ ३७१ ॥ वृञ एण्यः ॥ ३—९८ ॥

संभज्यते **वरेण्यः** श्रेष्ठः ॥

॥ ३७२ ॥ स्तुवः क्षेय्यश्छन्दसि ॥ ३—९९ ॥

स्तुषेय्यः[2] स्तुत्यः ॥

॥ ३७३ ॥ राजेरन्यः ॥ ३—१०० ॥

राजन्यः क्षत्रियः ॥

॥ ३७४ ॥ अर्तेर्निश्च[3] ॥ ३—१०१ ॥

न गच्छति अस्मिन्निति **अरण्यम्** ॥

॥ ३७५ ॥ पर्जन्यः ॥ ३—१०२ ॥

पृणातेरन्यप्रत्ययस्य जुट् । पालयति पूरयति वा **पर्जन्यः** ॥ शूरम्योश्च[4] भोजः । शरण्यः रक्षिता ॥ रमण्या योषित् ॥

---

१. The word within brackets is omitted in the ms.

२. G **क्सेय्यः**.

३. A, GD and P नित्.

४. A **रमोश्च**.

॥ ३७६ ॥ वदेरान्यः ॥ ३—१०३ ॥

वदान्यः प्रियवाक् दाता च, दातॄणामपि सम्यग्भाषित्वात्[1] ॥

॥ ३७७ ॥ अमिनक्षियजिवधिपतिभ्योऽत्रन् ॥ ३—१०४ ॥

अमति भक्षयत्यस्मिन्[2] [3]**अमत्रम्** ॥ गच्छति **नक्षत्रम्**[4] ॥ **यजत्रः** यज्वा ॥ **वधत्रं** आयुधम् ॥ **पतत्रम्** ॥

॥ ३७८ ॥ गलेरादेश्च[5] कः ॥ ३—१०५ ॥

गलति भुङ्क्ते भर्तुः स्वं **कलत्रम्** ॥

॥ ३७९ ॥ वृञश्चित् ॥ ३—१०६ ॥

व्रियते वेष्ट्यतेऽनया **वरत्रा** रज्जुः ॥

॥ ३८० ॥ सुञि विदेः कत्रन्[6] ॥ ३—१०७ ॥

सुविदत्रं धनम् ॥

॥ ३८१ ॥ कृतेर्नुम् च ॥ ३—१०८ ॥

कृन्तत्रं लाङ्गलम् ॥

॥ ३८२ ॥ भृमृदृशियजिपर्विपच्यमिनमिहर्य-[7][8]
भ्योऽतच् ॥ ३—१०९ ॥

भरतः ॥ **मरतः**[9] वायुः ॥ **दर्शतः** दर्शनीयः ॥ **यजतः** यज्वा ॥

---

१. G and GD भाषितत्वात्.
२. G भाषयति.
३. G न मिलं.
४. G omits नक्षत्रं.
५. G गडे-
६. A कत्रः.
७. G adds तमि.
८. G हर्येभ्यो.
९. G and P मरुतो.

र्व्यते पूर्यते वृक्षादिभिः **पर्वतः** ॥ **पचतः** कालः ॥ **अमतः** मृत्युः ॥ **नमतः** कुथभेदः ॥ गच्छन्त्यनेन स्वर्गम्, काम्यते वा देवैः **हर्यतः** यज्ञः ॥ वलेश्च भोजः । वलतं कुसूलम् ॥

॥ ३८३ ॥ पृषिरञ्जिभ्यां कित् ॥ ३—११० ॥

सिञ्चति रेतस्सेकं करोति **पृषतः** मृगः ॥ रज्यते काङ्क्ष्यते **रजतम्** ॥ सेकेश्च भोजः । सिकता ॥

॥ ३८४ ॥ खलतः ॥ ३—१११ ॥

खलतः दुर्जनार्थोऽयम् ॥

॥ ३८५ ॥ शीङ्शपिरुगमिवञ्चिजीवि-
प्राणिभ्योऽथः ॥ ३—११२ ॥

शयथः अजगरः ॥ **शपथः** ॥ **रवथः** शब्दकारः ॥ **गमथः** पन्थाः ॥ **श्वथः** कालः ॥ **जीवथः** वायुः ॥ **प्राणथः** बलवान् ॥ वन्दिबन्धि-यां च भोजः । वन्दथः स्तोता ॥ बन्धथः कोकिलः ॥ दृशमिदमिभ्यश्च । रथः गर्तः ॥ शमथः शान्तिः ॥ दमथः दमः ॥

॥ ३८६ ॥ उपसर्गे वसेः ॥ ३—११३ ॥

आ वसन्त्यस्मिन् आवसथः गृहम् ॥ उप वसन्त्यस्मिन् देवाः उपवसथः त्यापूर्वमहः ॥

॥ ३८७ ॥ भृञश्चित् ॥ ३—११४ ॥

भरथः लोकपालः ॥

---

१. G बन्दि. २. A and GD श्वस.

॥ ३८८ ॥ रुदिविदिभ्यां कित् ॥ ३—११५ ॥

उवङ् । रुवथः श्वा ॥ विदथः यज्ञो योगी च ॥

॥ ३८९ ॥ अत्य[1]मिचमितमिरभिन[2]भितपिप[3]णि-पनि[4]भ्योऽसच्[5] ॥ ३—११६ ॥

अतसी तरुः ॥ अमसम् उदकम् ॥ चमसः ॥ तमसा नदी ॥ रभसः[6] "रभेरशब्लिटोः" इतिनुम् बाहुलकान्न ॥ नभसः समुद्रः नभो[7] वा ॥ तपसः[8] सूर्यः ॥ पणसः पण्यम् ॥ स्तूयते भुञ्जानैः पनसः ॥ [9]अल्यवरधिचटिभ्यश्च भोजः । शक्त्यर्थस्य वैपरीत्यात् अलसः ॥ [10]अवसं पाथेयम् ॥ रधसः अन्धकजातिः ॥ चटसः चर्मपुटम् ॥

॥ ३९० ॥ वेञ[11]स्तुट् ॥ ३—११७ ॥

शोभते वेतसः ॥

॥ ३९१ ॥ वयो णित् ॥ ३—११८ ॥

"वय गतौ" । वायसः ॥

॥ ३९२ ॥ वाहसः ॥ ३—११९ ॥

न वहति न[13] गच्छति वाहसः अजगरः ॥ "वहियुभ्यां णित्" इत्येके । गोभक्षः किल यावसः । अत्र भोजः तामरसपुत्कसादीन् न्यपातयत् ॥

---

१. G अत्यवि.
२. G adds लभि.
३. G adds पति.
४. G transposes पणि and पनि.
५. G महिभ्यो.
६. GD omits रभसः.
७. G omits नभः.
८. G तपः.
९. G अल्यविरथिधि-
१०. G अवसा.
११. A, GD and P विय-
१२. G omits this sūtra.
१३. GD omits न गच्छति.

॥ ३९३ ॥ दिविसिविभ्यां किच्च[1] ॥ ३—१२० ॥

दीव्यति व्याप्रियते गच्छति वात्र **दिवसः**, शोभते वा ॥ **सिवसः** स एव ॥

॥ ३९४ ॥ कॄगॄशॄशलि[2]गर्दिभ्योऽभच् ॥ ३—१२१ ॥

करभः उष्ट्रः ॥ **गरभः** हिंस्रः ॥ शृ[3]णाति **शरभः** ॥ गच्छति **शलभः** ॥ **गर्दभः** ॥

॥ ३९५ ॥ ऋषिवृषिभ्यां कित् ॥ ३—१२२ ॥

गच्छति **ऋषभः** ॥ सदा रेतः सिञ्चति **वृषभः** ॥

॥ ३९६ ॥ रुषेर्नित् लुँ[4]श् च ॥ ३—१२३ ॥

हिनस्ति **लुशभः** गन्धहस्ती ॥

॥ ३९७ ॥ रासिवल्लिभ्यां च ॥ ३—१२४ ॥

शब्दायते **रासभः** ॥ संवृणोत्यनिष्टं **वल्लभः** ॥

॥ ३९८ ॥ ग[5]लेः कल च ॥ ३—१२५ ॥

जलेन सिञ्चत्यात्मानं **कलभः** ॥

॥ ३९९ ॥ जविशिभ्यां झच् ॥ ३—१२६ ॥

“झोऽन्तः” **जरन्तः** महिषः ॥ विश्यते गाह्यते **वेश[6]न्तः** पल्वलम् ॥ **रिवेश्च** भोजः । रेवन्तः सूर्यपुत्रः ॥

---

१. G कित्.
२. G adds कलि.
३. GD omits शृणाति.
४. G and P नि लुष् च. GD लश च.
५. G रालेः.
६. G वेषन्तः.

|| ४०० || रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि || ३—१२७ ||

आशिषि द्योत्यायां रुहादिभ्यो झच् षित् स्यात् । रोहत्वित्याशास्यमानत्वात् **रोहन्तः** वृक्षः । षित्त्वात् रोहन्ती लता ॥ **नन्दन्तः** सुखी ॥ **जीवन्तः** ऋषिः । जीवन्ती ओषधिः ॥ **प्राणन्तः** वायुः ॥

|| ४०१ || तॄभूवसिवहिभासिसाधिगडिमण्डिजिनन्दि-[1] भ्यश्च || ३—१२८ ||

एभ्यः षित् झच् स्यात् । **तरन्तः** समुद्रः ॥ **भवन्तः** कालः ॥ सुखं वसन्त्यस्मिन् इति **वसन्तः** । निवसन्तः निवासस्थानम् ॥ **वहन्तः** रथः ॥ **भासन्तः** सूर्यः ॥ "अयामन्त" इति णेरय्[2] । **साधयन्तः** भिक्षुः ॥ **गलयन्तः** मेघः ॥ **मण्डयन्तः** अलङ्कर्ता ॥ **जयन्तः** इन्द्रपुत्रः ॥ **नन्दयन्तः** सुखकृत् ॥

|| ४०२ || हन्तेर्हि मुट् च || ३—१२९ ||[3]

झचो मुट् च[4] । तुषारेण हन्ति जनान् **हेमन्तः** ॥ दुषेः षुक् च भोजोक्तेः[5] । न दुष्यति दुष्षन्तः[6] ॥

|| ४०३ || सिनोतेरी च || ३—१३० ||

झचो मुडीत्वं च[7] । **सीमन्तः** ॥

|| ४०४ || भन्देर्नलोपश्च || ३—१३१ ||

भदन्तः क्षपणः ॥

---

1. G transposes वहि and वसि.
2. G णेरयः.
3. G हन्तेर्मुट् हि च.
4. GD and P omit झचो मुट् च.
5. G -क्तम्.
6. G दुष्यन्तः.
7. G झचो मुट् हित्वं च.

॥ ४०५ ॥ ऋच्छेररः ॥ ३—१३२ ॥

ऋच्छरः त्वरावान् ॥ "मुदेर्गुक् च" इति भोजः । मोदन्ते योद्धारो अनेन मुद्गरः ॥ "गुरेर्जुक् च गू" इति । गूर्जरो देशः ॥

॥ ४०६ ॥ अर्तिकमिचमिभ्रमिदेविवासिवाशिभ्यश्चित् ॥ ३—१३३ ॥

अर्यतेऽनेनेति **अररम्** कवाटम् ॥ **कमरः** कामुकः ॥ भक्षयति तृणादि **चमरः** मृगः ॥ **भ्रमरः** ॥ **देवरः** पत्यनुजः ॥ सुखं वासयति जनान् **वासरः** ॥ **वाशरः** अग्निः[2] ॥ भोजस्तु[3] "सुन्दिकन्दिमन्दिमन्थिमञ्जिपञ्जिपिञ्जिचटिकासिकुटिकबिशबिशुदुकदिबदिभ्यो नित्" स्यादित्याह । सुन्दरः ॥ प्रतिध्वनिना सिंहादिशब्दैर्वा रोदितीव कन्दरः ॥ मन्दन्ते मृगादयोऽत्र मन्दरः ॥ क्षोभयति चारुगत्या हृदयं मन्थरः ॥ गौरादि ङीष्, मञ्जरी ॥ पञ्जरः ॥ "पिजि वर्णे" पिञ्जरः[4] पिङ्गः ॥ चटरः मधुकरण्डः ॥ कुत्सितशब्दकृत्वात् कासरः महिषः । बाहुलकात् "गाङ्कुटादि" इति ङित्त्वाभावः ॥ प्रायेणानृजुरन्ध्ररूपत्वात् कोटरम् ॥ स्तूयते कबरः केशः नानावर्णश्च ॥ गच्छति वने शबरः ॥ दवरः गुणः ॥ कदरः सितखदिरः ॥ गौरादित्वात् बदरी ॥ भूयोऽप्याह "कृगघजझदबभमभ्यस्संधात्वादिष्टित्"[5][6] एभ्यः क्रमात् धात्वादिभूतकादिवर्णसहितो[7] रप्रत्ययष्टित् स्यात् । तेन करगरधरेत्यादिप्रत्ययः । कर्करः क्षुद्रात्मा । टित्वात् कर्करी लता ॥ गर्गरः राजर्षिः ॥ घर्घरः घोषः ॥ जर्जरः दीर्णः ॥ झर्झरदर्दरौ वाद्यभेदौ[8] ॥ बर्बरः म्लेच्छजातिः ॥ भर्भरः छद्मवान् ॥ मर्मरः शुष्कपत्रचयः ॥ मर्मरायां दूर्वायां इत्यादौ टित्त्वेऽपि बाहुलकान्न ङीप् ॥ पिठरककरमकरशिखरशेखरडहरकुहरकूर्परशबर-[9]

---

१. G transposes भ्रमि and चमि.
२. G अहिः.
३. G omits भोजस्तु.
४. G पिञ्जि.
५. G कृधझदपभमृभ्यः.
६. G सत्त्वधात्वामिष्टित्.
७. G धान्तादिभूत-
८. A झर्झरो दर्दरोऽपि.
९. A, GDand P कर्पर-

डमरडामरपामरसगरतेगरतोमराजगरादयोऽप्यरान्ता उक्ताः। क्रकरः तित्तिरिः ॥ डहरं हृत्पद्मम्। दन्त्यादि केचित् पठन्ति ॥ कूर्परः हस्तैकदेशः ॥ कर्परः कपालः ॥ डमरः डामरश्च विशृङ्खलः ॥ तगरः वृक्षः ॥ आद्युक्तेः कैडङ्गरः अम्बुसम् इति ॥

॥ ४०७ ॥ कुवः क्ररन् ॥ ३—१३४ ॥

कौति **कुररः** पक्षी ॥

॥ ४०८ ॥ अङ्गिमदिमन्दिभ्य आरन् ॥ ३—१३५ ॥

अङ्गतेः दीप्त्यर्थत्वात् **अङ्गारः** ॥ **मदारः** वराहः रत्नं च ॥ मोदन्ते अनेन **मन्दारः** ॥ अगिकासिभ्यां च भोजः। अगति गतप्रत्यागतैः कुटिलं गच्छति अत्र अङ्गारः[1] ॥ दुर्जलत्वात् कासन्तेऽनेन पीतेन कासारः सरः ॥

॥ ४०९ ॥ गलेः[2] कट च ॥ ३—१३६ ॥

कटत्यत्र[3] **कटारः** जलपात्रम्। "कडे च" इति पाठे कडारः पिङ्गलः ॥

॥ ४१० ॥ शृङ्गारभृङ्गारौ ॥ ३—१३७ ॥

शृङ्गति व्याप्नोति सामाजिकहृदयं **शृङ्गारः** ॥ भ्रियते जलमस्मिन् **भृङ्गारः** ॥

॥ ४११ ॥ कञ्जिमृजिभ्यां चित् ॥ ३—१३८ ॥

कञ्जारः कुसूलः ॥ मृजेर्वृद्धिः। जिह्वया मार्ष्टि सर्वपात्राणि **मार्जारः**। आखुभ्यो गृहं मार्ष्टि शोधयति वा ॥ "कृञो मुट् च" इति भोजः। कर्मारः लोहकारः ॥

---

१. A omits the word.
२. G and P अङ्गारं.
३. A and P गडेः.
४. GD adds जलं

॥ ४१२ ॥ कमेरुच्चोपधायाः ॥ ३—१३९ ॥

काम्यते काङ्क्ष्यते कुमारः ॥

॥ ४१३ ॥ तुषारादयश्च ॥ ३—१४० ॥

अत्र भोजः—तुषिकुटिभ्यामारन् । तुष्यन्तेऽनेन शीतार्थिनः तुषारः ॥ कुठारः ॥ कल्हारकान्तारकेदारकोविदारकर्बुदारकाञ्चनारादयः । कैलन्तेऽत्र भृङ्गाः कल्हारः ॥ काम्यते [3]मृगैः कान्तारम् ॥ क्लिद्यते जलैः केदारः ॥ अन्यास्त्रयो वृक्षभेदाः ॥ आद्युक्तेः दीनारः काञ्चनम् । मसारः इन्द्रनीलः इति ॥

॥ ४१४ ॥ सर्तेरपः षुक् च ॥ ३—१४१ ॥

व्याप्नोति व्यञ्जनेषु सर्षपः ॥

॥ ४१५ ॥ उषिकुटिदलिकचिखजिभ्यः कपन् ॥ ३—१४२ ॥

उषपः सूर्यः ॥ कुटपः प्रस्थचतुर्थभागः । "कुडुप इत्यव्युत्पन्नमस्ति" इति हरः ॥ दलपः शरः ॥ कचपः शूकः ॥ खजपः घृतमन्थः ॥ कुषिकलिभ्यश्च भोजः । कुषपः विन्ध्यः[6] ॥ कलपः शाकपर्णः ॥

॥ ४१६ ॥ कणेः संप्रसारणं च ॥ ३—१४३ ॥

पूर्वमक्वणत् कुणपः शवम् ॥

॥ ४१७ ॥ [7]कवश्चाक्रवर्मणस्य ॥ ३—१४४ ॥

तन्मते कुणवः शवम् ॥

---

१. G रि-
२. G कलन्ति.
३. A भृङ्गैः.
४. G खचिभ्यः P खञ्जिभ्यः.
५. G इत्यप्यु-
६. G विन्धः.
७. G कुप-

॥ ४१८ ॥ विटपविष्टपविशिपोलपाः ॥ ३—१४५ ॥

"[1]विट शब्दे" ध्वनन्त्यत्र खगा विटपः ॥ "विषॢ व्याप्तौ" [2]विष्टपम् ॥ विशिपः गृहम् ॥ उच्यति सङ्घातीभवति उलपः तृणम् ॥ कुतपचातपशिंशपादयश्च भोजोक्ताः । कुतपः छागलोम ॥ चातपः मुनिः ॥

॥ ४१९ ॥ वृतेस्तिकन् ॥ ३—१४६ ॥

वर्त्तिका चित्रोपकरणम् ॥

॥ ४२० ॥ कृतिभिदिलतिभ्यः कित् ॥ ३—१४७ ॥

कृत्तिका ॥ [3]भित्तिका शतावरी [4]वज्रं च ॥ लतिः सौत्रः । लत्तिका गोधा ॥ पुतेश्च भोजः । पुत्तिका मधुमक्षिका ॥

॥ ४२१ ॥ इष्यशिभ्यां तकन् ॥ ३—१४८ ॥

कित् स्यात् । इष्यते चयनार्थम् इष्टका । अश्नन्ति[5] पितरोऽत्र इति अष्टका ॥ "भियो ह्रस्वश्च" इति भोजः[6] । बिभीतकः ॥

॥ ४२२ ॥ इणस्तशंस्तशसुनौ ॥ ३—१४९ ॥

एतशः इन्द्रः ॥ एतशसु ब्राह्मणः ॥

॥ ४२३ ॥ विपतिभ्यां तनन् ॥ ३—१५० ॥

वियन्त्यश्नन्त्यनेन वेतनम् ॥ पत्यते गम्यते जनैः पत्तनम् ॥ "[7]पॄपूभ्यां कित्" इति भोजः । प्रीणयति नृपं [8]पूतना ॥ पूतना ॥

१. G omits root and meaning.
२. G adds व्याप्तत्वात्.
३. G omits this word.
४. G वज्रश्च.
५. G अश्नुवन्ति.
६. G omits भोजः.......जनैः.
७. G omits पॄ.
८. G omits पूतना.

॥ ४२४ ॥ दृदलिभ्यां भः ॥ ३—१५१ ॥

दृणाति पाणिं[1] दर्भः ॥ दल्भः वल्कलम् ॥

॥ ४२५ ॥ अर्तिगृभ्यां भन् ॥ ३—१५२ ॥

अर्यते रम्यत्वात् [2]अर्भः बालः ॥ गीर्यते अन्तर्ध्रियते गर्भः ॥

॥ ४२६ ॥ इणः कित् ॥ ३—१५३ ॥

एति मन्दं[3] मन्दं इभः ॥

॥ ४२७ ॥ असिसञ्जिभ्यां क्थिन् ॥ ३—१५४ ॥

अशुद्धत्वात् अस्यते अस्थि[4] ॥ नलोपः । अन्योऽन्यं सजति सक्थि ऊरू ॥ अजेश्च भोजः । वीभावः । गम्यतेऽनया वीथिः ॥

॥ ४२८ ॥ प्लुषिशुषिकुषिभ्यः क्सिः ॥ ३—१५५ ॥

"षढोः कः" प्लुक्षिः अग्निः ॥ शुक्षिः वायुः ॥ कुक्षिः ॥

॥ ४२९ ॥ अशेर्नित् ॥ ३—१५६ ॥

अश्नुते विषयान् अक्षि ॥

॥ ४३० ॥ इष्यशिभ्यां क्सुः ॥ ३—१५७ ॥

इष्यते भक्षणार्थे इक्षुः ॥ "छशां षः" "षढोः कः" अक्षुः आदित्यः ॥

॥ ४३१ ॥ अवितृस्तृतन्त्रिभ्य ईः ॥ ३—१५८ ॥

अवत्यात्मानं अवीः पुष्पिता स्त्री ॥ तरीः नौः ॥ स्तरीः निवृत्तप्रसवा ॥

---

१. G पाणिभिः.

२. G अर्भको.

३. A and GD omit मन्दं.

४. G अस्थिन्.

धार्यते वीणा तन्त्रीः वीणागुणः ॥ तन्द्रेश्च भोजः । तन्द्रीः । माधवस्तु इकारान्तमुक्त्वा "कृदिकारात्" इति वा[1] ङीष् इत्याह । तन्द्रिः तन्द्री[2] ॥

॥ ४३२ ॥ यापोः किद्द्वे च ॥ ३—१५९ ॥

कित्त्वादाल्लोपः । ययीः दीर्घयष्टिः ॥ पपीः दन्ती ॥

॥ ४३३ ॥ लक्षेर्मुट् च ॥ ३—१६० ॥

लक्षयति पश्यति सुकृतिनं लक्ष्मीः, अङ्कयति हरेः गात्रं वा ॥

इत्युणादिवृत्तौ पञ्चपाद्यां प्रक्रियासर्वस्वे

॥ तृतीयः पादः ॥



---

1. G omits वा.

2. G omits this word.

॥ अथ चतुर्थः पादः ॥

॥ ४३४ ॥ वातप्रमीः ॥ ४—१ ॥

[वातप्रमीः] मृगविशेषः । "देवयजीः" इत्यपि कौमुदी[1] । देवान् यजतीत्यर्थे बाहुलकादीप्रत्ययः प्रसादे उक्तः । बाहुलकादिप्रत्ययादिदन्त एवायमिति शङ्करः ॥

॥४३५॥ अर्तितन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः अत्निच्-यतुजलिजिष्ठुजिष्णुं[2]जिशन्स्यनिथिनुल्यषासानुकः ॥ ४—२ ॥

अर्तेरत्निच् । अर्यते मीयतेऽनेनेति अरत्निः ॥ तनेर्यतुच् । तन्यतुः सूर्यः ॥ अञ्जेरलिच् । [3]अज्यते जलेनेति अञ्जलिः ॥ पाटेश्च भोजः । पाटलिः वृक्षः ॥ वनेरिष्टुच् । वनिष्ठुः मांसभेदः ॥ अञ्जेरिष्णुच् । अञ्जिष्णुः घृतम्[4] ॥ अर्पेरिशन् । अर्पिशः हस्ती ॥ मदेः स्यन् । चर्त्वम् । माद्यति जले मत्स्यः ॥ अतेरिथिन् । सततं गच्छतीति अतिथिः ॥ अङ्गेरुलिः । अङ्गति चलति अङ्गुलिः ॥ कोरषः । कवषः मुनिः ॥ योरसन् । युवन्ति पशवोऽत्र यवसः ॥ कृशेरानुक् । तनूकरोत्याधारं कृशानुः ॥

॥ ४३६ ॥ श्रः करन् ॥ ४—३ ॥

शृणाति पादं रसान्तरं वा शर्करा ॥ वृकिभ्यां च भोजः । वर्करः[5] छागशिशुः ॥ केकरः वक्रदृष्टिः ॥

॥ ४३७ ॥ पुषः कित् ॥ ४—४ ॥

---

१. GD and P कौमुद्यां.

२. G omits -जिष्णु-

३. G omits अज्यते जलेनेति.

४. G घटम्.

५. GD बर्करः.

पुष्यति जले पुष्करः पद्मम् । पुष्णाति धान्यादिकमिति जैलादिकमपि । व्याप्नोतीति अम्बरं च । पुष्यति शैब्दोऽत्रेति वाद्यमुखं च ।

"कराग्रं करिणां व्योम कुशेशयमसेः फलम् ।
आननं चानकादीनां ब्रवते पुष्करं बुधाः ॥"

"सुपुषिभ्यां कित्" इति भोजः । बहु सूते सूकरः ॥

॥ ४३८ ॥ [४]कलच् च ॥ ४—५ ॥

पुषेः कलच् कित्स्यात् । पुष्यति पुष्कलम् ॥ "वलेः कलच्" इति भोजः । संवृणोत्यङ्गं वल्कलम् ॥

॥ ४३९ ॥ गमेरिनिः ॥ ४—६ ॥

गमी गमिष्यन्नित्यर्थः ॥

॥ ४४० ॥ आङि णित् ॥ ४—७ ॥

आगामी ॥ "आङि च णित्" इति भोजः । तेन केवलादपि गामी ॥

॥ ४४१ ॥ भुवश्च ॥ ४—८ ॥

भावी ॥

॥ ४४२ ॥ प्रे स्थः ॥ ४—९ ॥

प्रस्थायी ॥ "यातेः प्रतौ च" इति भोजः । प्रतियायी प्रयायी । "बुधेश्च" यातिवत् स्यात् । प्रबोधी प्रतिबोधी । एषाम् "भविष्यति गम्यादयः" इति भविष्यदर्थता ॥

॥ ४४३ ॥ परमे कित् ॥ ४—१० ॥

---

१. GD omits पुष्यति......पद्मम्. जले पुष्करं वर्त्म.

२. G and P जलमपि. GD omits this word, but adds पुष्करं जलं पुष्यति

३. A शब्दान.

४. G कलच्. GD कलश्च.

परमे शब्दे पूर्वस्य स्थाधातोः किदिनिर्भवेत्। आल्लोपात् परमेष्ठी इति। "स्थास्थिन्स्थूणाम्" इति इह षः।

स्थास्थिन्नितीह स्थाशब्दः स्थाधातोः क्विपि वर्णितैः।
शिरिष्ठाश्च रतेष्ठा इत्यलुक् तत्पुरुषे कृति॥

॥ ४४४ ॥ मथेः ॥ ४—११ ॥

मथेरिनिः स्यात्। मिथिन्शब्दो मन्थनार्थः॥

॥ ४४५ ॥ पतेः स्थ च ॥ ४—१२ ॥

पतन्ति गच्छन्त्यत्र पन्थाः॥

॥ ४४६ ॥ खजेराकः ॥ ४—१३ ॥

खजाकः मन्थः॥

॥ ४४७ ॥ बलाकादयश्च ॥ ४—१४ ॥

वलति गच्छति बलाका॥ मनाका कामिनी॥ नभाकः ऋषिः॥ पवाकः पूतः॥ प्लवाकः प्लवः॥ लवाकः कर्मकारः॥ नवाकं नवम्॥

॥ ४४८ ॥ शलिपटिपतिभ्यो नित् ॥ ४—१५ ॥

"शल गतौ" सूक्ष्मस्थानेऽपि गच्छति शलाका॥ गच्छति गगनमिति पटाकापताके समार्थे॥

॥ ४४९ ॥ पिनाकादयश्च ॥ ४—१६ ॥

"पिनाकपिण्याकश्यामाकपुलाकवार्ताकवृन्ताकज्योन्ताकादयः" इति भोजः। पिनष्टयरीन् पिनाकः॥ गच्छत्युदरं श्यामाकः॥ "पुल महत्त्वे"

---

1. G omits स्थाधातोः.....स्था-शब्दः.
2. GD omits आल्लोपात्.
3. GD पण्डितः.
4. GD गिर-
5. GD स्थः.
6. G and GD omit वृन्ताक.

वैपरीत्यात् पुलाकः तुच्छधान्यम् ॥ वार्ताकवृन्ताकौ बृहतीभेदौ ॥ ज्योन्ताकं स्वेदसद्म ॥ आयुक्तः[1] गुपाकः क्रमुकः[2] । गुवाक इति वकार इत्यन्ये ॥ स्योनाकः तरुः ॥ पराकः व्रतभेदः[3] ॥ भवाकः कपोतः ॥ शुभाकः शोभनः ॥

तड आघात इत्यस्मात् तडाकोऽत्रेति वृत्तिकृत् ।
तडाकं मन्यते भोजः तडेरागजितीरयन् ॥

[4]टीकासर्वस्वकारस्तु तटाकमपि रक्षितुम् ।
आके कृते तडेरेव बाहुल्याट्टत्वमिच्छति ॥

॥ ४५० ॥ कषिदूषिभ्यामीकन् ॥ ४—१७ ॥

कषीका मक्षिका ॥ दूषीका नेत्रमलम् ॥ माधवेन तु इकन्नुक्त्या दूषिका साधिता । तस्योत्तरत्रानुवृत्तिर्न विघ्नः ॥[5]

॥ ४५१ ॥ चङ्कण्यतेः किङ्किण च ॥ ४—१८ ॥

यङन्तात् कणेरीकन् किङ्किणादेशश्च । किङ्किणीका क्षुद्रघण्टिका । किङ्किणी तु पृषोदरादित्वात् वार्धूषिवत् ॥

॥ ४५२ ॥ शपृवृञां द्वे रुक् चाभ्यासस्य ॥ ४—१९ ॥

उरदत्वे[1] हलादिशेषे च कृते रुक् । शर्शरीकः अश्वः ॥ पर्परीकः भक्षोऽग्निश्च ॥ वर्वरीकः केशसङ्घातो गजश्च ॥

॥ ४५३ ॥ पर्फरीकादयश्च ॥ ४—२० ॥

पर्फरीकः मृदुः ॥ दर्दरीकः इन्द्रः ॥ मर्मरीकः शुष्कपर्णम् ॥ कर्करीका जलपात्रम् ॥ मृद्वीकतिन्तिडीकबाह्लीकवल्मीककल्मलीकपुण्डरीकचञ्चरीकसमीकपूतीकादयश्च भोजोक्ताः । आशु मृद्यते मृद्वीका । मृद्वीशब्दात् कनि ह्रस्वे

---

१. GD adds शुपाकः.
२. GD omits क्रमुकः । गुवाकः.
३. G पत्रभेदः.
४. G omits this verse.
५. G adds भृण्वुल्यंवैतत्.
A and P add इति ण्वुल्यंवैतत्.

मृद्वीकेति माधवः ॥ तिन्तिडीकः तरुः ॥ बाह्लीकः राजा ।[1] वलन्ते स्त्रियोऽत्र वल्मीकः ॥ कलते ध्वनति कल्मलीका ज्वाला ॥ "पुडि खण्डने" खण्ड्यते पुष्पार्थिभिः पुण्डरीकम् ॥ चञ्चति भ्रमति चञ्चरीकः भृङ्गः । रलयोरैक्यात् चञ्चलीकः ॥ पृथक् प्रतीयते प्रतीकः अङ्गम् ॥ [2]संयन्त्यत्र समीकं युद्धम् ॥ पूयते दशापवित्रेण पूतीकः स[illegible] लता ॥ आद्युक्तः तिन्त्रिणीकः झर्झरीकः । अर्थो मृग्यः ॥

॥ ४५४ ॥ अनिहृशिभ्यां किच्च ॥ ४—२१ ॥

ईकन् स्यात् । जीवन्त्यनेन नृपाः अनीकं सेना ॥ दृशीकं रम्यम् ॥

॥ ४५५ ॥ ऋचेश्च ॥ ४—२२ ॥

ऋचीकः ऋषिः । ऋजेरिति पाठात् ऋजीक इत्यन्ये ॥

॥ ४५६ ॥ ईषेर्ह्रस्वश्च ॥ ४—२३ ॥

इषीका तृणभेदः ॥

॥ ४५७ ॥ सर्तेर्नुं च ॥ ४—२४ ॥

सृणीकः अग्निः ॥

॥ ४५८ ॥ मृडेः कीकन्ककनौ ॥ ४—२५ ॥

मृडीकः सुखकृत् । मृडकः सुखी ॥

॥ ४५९ ॥ अलीकादयश्च ॥ ४—२६ ॥

अल्यते वार्यत इति अलीकं अप्रियम् असत्यं च । भूष्यत इति ललाटं च ॥ आद्युक्तेः कणीकं निमीलनम् ॥ मनीकं भाजनम् ॥ अणीकः सूक्ष्मः[3] ।

---

१. GD राजा. द्रुम् before पृथक् प्रतीयते.

२. A,GD and P read सं...... ३. G सूर्यः.

बलीकः बलवान् ॥ हृषिवलिस्यमिभ्यश्च किर्कैकन् भोजोक्तः । हृष्यति विषयैः[2] हृषीकम्[3] इन्द्रियम् ॥ संवृणोति वलीकं वेश्मप्रान्तः ॥ स्यमीकं जलम् ॥

॥ ४६० ॥ कॄतॄभ्यामीषन् ॥ ४—२७ ॥

कीर्यते करीषम् ॥ तैरीषं प्लवः ॥

॥ ४६१ ॥ शॄपॄभ्यां कित् ॥ ४—२८ ॥

"ॠत इत्" शीर्यते चूर्ण्यते स्नानीयार्थं शिरीषः ॥ "उदोष्ठ्यपूर्वस्य" पूर्यतेऽन्तः पुरीषम् ॥

॥ ४६२ ॥ अर्जेः ऋज[5] च ॥ ४—२९ ॥

अर्जितोऽस्माद्रस इति ऋजीषं पिष्टम् ॥

॥ ४६३ ॥ अम्बरीषश्च ॥ ४—३० ॥

अम्बते शीशब्दं करोतीति अम्बरीषः भ्राष्ट्रः । शब्द्यते जनैः इति राजा च ॥ "उषेर्नक् च" इति भोजः । ओषति दीप्यते शोभत इति उष्णीषम् ॥

॥ ४६४ ॥ कॄपॄशॄगॄकटिपटिशौटिभ्य[6] ईरन् ॥ ४—३१ ॥

कीर्यते क्रमात् विस्तीर्यते करीरं वंशाङ्कुरम् ॥ परीरं फलम् ॥ शीर्यते शरीरम् ॥ [7]गरीरः पर्वतः ॥ आव्रियते कटीरं कटी ॥ गम्यते जनैः पटीरः ॥ शौटीरः गर्ववान् ॥ मञ्जिकुटिपूङ्भ्यश्च भोजः । मञ्जीरम् । बाहुलकात् ईत्वम् ॥ कोटीरः मौलिः ॥ पवीरं बीजावपनम्[8] ॥

---

१. G भोजः कीकन्.
२. GD omits विषयैः.
३. G हर्षः.
४. G omits this word.
५. P adds चित्.
६. G कॄशॄपॄकटि-
GD कॄगॄघॄ-
७. GD omits this word.
८. G बीजवापनं.

॥ ४६५ ॥ वशेः कित् ॥ ४—३२ ॥

कित्त्वादुत्वम् । काम्यते उशीरम् ॥ कुलेश्च भोजः । संघातत्वेन जायते कुलीरः ॥

॥ ४६६ ॥ कशेर्मुट् च ॥ ४—३३ ॥

गच्छन्त्यत्र कश्मीरः देशः ॥

॥ ४६७ ॥ कृञ उच्च ॥ ४—३४ ॥

कुरीरं मैथुनम् ॥

॥ ४६८ ॥ घसेः किच्च[1] ॥ ४—३५ ॥

घसेरीरः किच्च[2] । पिच्च स्यात् । कित्त्वात् "गमहन" इत्युपधालोपः । षत्वचर्त्वे । अद्यते क्षीरम् ॥

॥ ४६९ ॥ गभीरगम्भीरौ ॥ ४—३६ ॥

कृच्छ्रेण गाह्यते गभीरः ॥ गम्भीरः ॥ डिण्डीरवानीराभीरकुम्भीरकीर-जम्बीरकिर्मीरादयश्च भोजोक्ताः । जले डयते गच्छति डिण्डीरः फेनः ॥ वन्यते सेव्यते[3] भृङ्गादिभिः वानीरः वेतसः ॥ आप्यते गव्यार्थिभिः आभीरः ॥ कुम्भि-र्धारणार्थः । धारयन् गच्छति जन्तून् कुम्भीरः नक्रः ॥ "कै शब्दे" कीरः ॥ जम्यते भक्ष्यते जम्बीरः ॥ कीर्यते[4] नाना भवति किर्मीरः नानावर्णः ॥ आद्युक्तेः तूण्यते पूर्यते शरैः तूणीरः ॥ "नासृ शब्दे" ध्वनति नासीरम् ॥ करेण वीयते प्राप्यते करवीरम् ॥

॥ ४७० ॥ विसा विहा ॥ ४—३७ ॥

विसा बिसखण्डः ॥ विहा विरागः । एते अव्यये इति तद्वृत्तिः ॥

---

१. P चिच्च. GD चिश्च.
२. G omits घसे......स्यात्.
३. G omits this word.
४. GD omits this word.
५. G omits this word.

॥ ४७१ ॥ पच एलिमच् ॥ ४—३८ ॥

पचेलिमः माषः ॥

॥ ४७२ ॥ भिदेः क्विच्च ॥ ४—३९ ॥

भिदेलिमं काष्ठम् । अस्य चित्त्वात् केलिमरो भेदः ॥

॥ ४७३ ॥ शीङ्स्थुग्लग्वालन्वलञः ॥ ४—४० ॥

शेरतेऽनेन पीतेन **शीथुः** "शीङो[1] धुक्" इति पाठे शीधुः ॥ ह्रस्वत्वात् परहृदयेषु शेते **शीलम्** ॥ [2]शेते जले **शैवालं शैवलं** च । वालन्प्रत्ययेन शैवालमित्यन्ये ॥

॥ ४७४ ॥ मृकणिभ्यामूकोकणौ ॥ ४—४१ ॥

मरूकः मयूरः ॥ **काणूकः** श्रेष्ठः ॥

॥ ४७५ ॥ वल्लेरूकः ॥ ४—४२ ॥

वल्लूकः पक्षी । वल्लक इति कचिन्निपात्यते । तदुत्पलनाम ॥

॥ ४७६ ॥ उलूकादयश्च ॥ ४—४३ ॥

उचेर्लत्वम् । समवैति सदा श्रिया इति **उलूकः** । अत्र भोजः— "कणिजलिवलिबन्धिभल्लिभ्य ऊकः" कणूकः धान्यस्तोकः ॥ अतितीक्ष्णत्वात् जलूकः ॥ बध्यते स्रजि बन्धूकः ॥ "भल्ल परिभाषणे" शब्दं करोति भल्लूकः कपिः ॥ [3]मधूकोरुबूकशम्बूकवरूकादयः ॥ उरुबूकः हिरण्यम् ॥ शम्बूकः क्षुद्रशङ्खः ॥ वरूकः तृणभेदः ॥ आद्युक्तेः मल्लूकः क्रिमिजातिः इति ॥

॥ ४७७ ॥ शलिमण्डिभ्यामूकण् ॥ ४—४४ ॥

---

१. G omits शीङः.
२. G omits शेते जले.
३. P adds भल्लि.

शल्यते जलमग्नत्वात् कृच्छ्रेण प्राप्यते **शालूकम्** उत्पलादिकन्दम् ॥ मण्ड्यते रेखाभिः **मण्डूकः** ॥

॥ ४७८ ॥ **नियो मिः** ॥ ४—४५ ॥

नीयते रथोऽनया **नेमिः** ॥

॥ ४७९ ॥ **अर्तेरूच्च** ॥ ४—४६ ॥

रपर ऊः । तटं गच्छति **ऊर्मिः** ॥

॥ ४८० ॥ **अशेरश च** ॥ ४—४७ ॥

अश्नुते व्याप्नोति **रश्मिः** ॥

॥ ४८१ ॥ **भुवः कित्** ॥ ४—४८ ॥

भवन्त्यस्यां **भूमिः** ॥

॥ ४८२ ॥ **दल्मिः** ॥ ४—४९ ॥

दलयति भूमिमन्तः[1] **दल्मिः** शङ्कुः ॥

॥ ४८३ ॥ **वीज्यात्वरिभ्यो निः** ॥ ४—५० ॥

बाहुलकात् णत्वम् । गच्छति **वेणिः** प्रवाहः, कान्तिमत्त्वात् केशश्च ॥ **ज्यानिः** ॥ अनुनासिके परे "ज्वरत्वर" इत्यूठ् । **तूर्णिः** आदित्यः ॥

॥ ४८४ ॥ **सृवृषिभ्यां कित्** ॥ ४—५१ ॥

सरत्यनया गजः **सृणिः** अङ्कुशः ॥ वर्षत्यभीष्टं **वृष्णिः** ॥ **धोश्च** भोजः । कम्पमाना गच्छति धुनिः नदी ॥

॥ ४८५ ॥ **अङ्गेर्नलोपश्च** ॥ ४—५२ ॥

देवानां पुरस्तात् अङ्गति **अग्निः** ॥

---

1. G omits **भूमिमन्तः**.

॥ ४८६ ॥ वहिश्रिश्रुयुग्लाहात्वरिभ्यो नित् ॥ ४—५३ ॥

वहति हविः **वह्निः** ॥ श्रयन्त्येनां **श्रेणिः** ॥ श्रूयते न तु दृश्यते वस्त्रच्छन्नत्वात् **श्रोणिः** ॥ युवन्ति संगच्छन्तेऽत्र **योनिः** ॥ **ग्लानिः**[1] ॥ **हानिः** ॥ **तूर्णिः** ॥ नित् स्वरार्थम् । क्षोश्च भोजः । क्षोणिः ॥ "शाशीङो ह्रस्वश्च" इति च । तनूकरोति सुखं शनिः ॥ शिनिः यादवः ॥

॥ ४८७ ॥ घृणिपृश्निपार्ष्णिभूर्णिचूर्णि[2] ॥ ४—५४ ॥

"घृ क्षरणदीप्त्योः" दीप्यते **घृणिः** ॥ पृच्छयते समूहगतः **पृश्निः** अल्पतनुः ॥ पारयति कर्मसु **पार्ष्णिः** ॥ **भूर्णिः** धरणिः ॥ **चूर्णिः** ग्रन्थः ॥

॥ ४८८ ॥ पृदृभ्यां विन् ॥ ४—५५ ॥

पर्विः शकटम् ॥ **दर्विः** प्राङ्निपातनात् विफलम् ॥

॥ ४८९ ॥ जॄशॄस्तॄजागृभ्यः क्विन् ॥ ४—५६ ॥

"ॠत इत्" "हलि च"। **जीर्विः** वृद्धः ॥ **शीर्विः** हिंस्रः ॥ **स्तीर्विः** रुचिरः ॥ "अविचिण्णल्ङित्सु" इति गुणाभावः । **जागृविः** विनिद्रः ॥

॥ ४९० ॥ दिवो द्वे दीर्घश्चाभ्यासस्य ॥ ४—५७ ॥

दीदिविः स्वर्गः अन्नं च ॥

॥ ४९१ ॥ कृविघृष्विछविस्थविदिवि[3]किकिदीवि ॥ ४—५८ ॥

कृविः तन्तुवायः ॥ **घृष्विः** वराहः । "वराहः सूकरो घृष्विः इति पाठः" इति वृत्तौ ॥ छिनत्ति तिमिरं **छविः** ॥ **स्थविः** तुन्नवायः ॥ **दिविः** धर्मशीलः । दविरित्यन्ये ॥ किकि इत्युक्त्वा क्रीडति गच्छति वा[4] **किकिदीविः** पक्षी ॥ अटविः शिबिश्च भोजोक्तौ ॥

---

1. G omits ग्लानिः.
2. G -चूर्णिभूर्णि.
3. G omits -दिवि-
4. G omits वा.

॥ ४९२ ॥ पातेर्डतिः ॥ ४—५९ ॥

पतिः ॥

॥ ४९३ ॥ शकेः ऋतिन् ॥ ४—६० ॥

इनावितौ । शक्नोत्यनेन देहः शकृत् ॥ "यजेः कश्च" इति भोजः । यकृत् मांसभेदः ॥

॥ ४९४ ॥ अमेरतिः ॥ ४—६१ ॥

अमतिः मार्गः ॥ योः कित् भोजोक्तः । यौति पुंसा युवतिः स्त्रीमात्रम् ॥

॥ ४९५ ॥ वहिवस्यर्तिभ्यश्चित् ॥ ४—६२ ॥

वेहतिः गौः ॥ वसतिः ॥ अरतिः क्रोधः ॥ खलेश्च भोजेः । खलतिः गतकेशः ॥

॥ ४९६ ॥ अञ्चेः को वा ॥ ४—६३ ॥

अङ्कतिः वायुः ॥ अञ्चतिः अग्निः ॥

॥ ४९७ ॥ हन्तेरं ह च ॥ ४—६४ ॥

अंहतिः मृगः ॥ "वृञो व्रत च" इति भोजः । आवृणोति भुवं व्रततिः लता ॥

॥ ४९८ ॥ रमेर्नित् ॥ ४—६५ ॥

रमतिः स्वर्गः ॥

॥ ४९९ ॥ सूङः क्रिः ॥ ४—६६ ॥

सूते वाचः सूरिः ॥

॥ ५०० ॥ अदिशदिभूशुभिभ्यः क्रिन् ॥ ४—६७ ॥

1. G omits बहतिः गौः. २. G भोजोक्ताः.

अदन्ति मृगादयोऽत्रेति अद्रिः ॥ शद्रिः हस्ती ॥ भूरिः ॥ शुभिः ब्रह्मा ॥

॥ ५०१ ॥ वङ्क्रयादयश्च ॥ ४—६८ ॥

"वकि कौटिल्ये" वङ्क्रिः पार्श्वास्थि ॥ अङ्घति गच्छति अङ्घ्रिः ॥ अभ्रिः खननशङ्कुः ॥ विभ्रिः मृत्युः ॥ कुद्रिः समुद्रः ॥

॥ ५०२ ॥ राशदिभ्यां त्रिप् ॥ ४—६९ ॥

राति सुखं भयं वा रात्रिः ॥ शत्रिः गजः ॥

॥ ५०३ ॥ अदेस्त्रिन् ॥ ४—७० ॥

फलाद्यत्तीति अत्रिः ॥

॥ ५०४ ॥ पतेरत्रिन् ॥ ४—७१ ॥

पतत्रिः पक्षी ॥

॥ ५०५ ॥ मृकणिभ्यामीचिः ॥ ४—७२ ॥

तापान्म्रियन्तेऽत्र मरीचिः ॥ कणीचिः लता ॥ अविदधिभ्यां च भोजः । अवीचिः नरकभेदः ॥ दधीचिः ऋषिः ॥

॥ ५०६ ॥ वेञो डिच्च ॥ ४—७३ ॥

तन्तुवानवत् सन्ततो भवति वीचिः ॥

॥ ५०७ ॥ श्रयतेश्चित् ॥ ४—७४ ॥

श्रयीचिः चन्द्रः ॥

॥ ५०८ ॥ ऋहनिभ्यामूषन् ॥ ४—७५ ॥

अरुषः व्रणः ॥ हनुषः राक्षसः ॥

॥ ५०९ ॥ पुरः कुषन् ॥ ४—७६ ॥

पॄधातोः कुषन् । "उदोष्ठ्यपूर्वस्य" देहं विश्वं वा पृणाति पालयति पूरयति **पूरुषः** ॥

॥ ५१० ॥ विदिपुरोश्च ॥ ४—७७ ॥

विदुषः विद्वान् ॥ **पुरुषः**[1] ॥

॥ ५११ ॥ पॄकलिभ्यामुषन् ॥ ४—७८ ॥

प्रीतौ वैपरीत्यात् **परुषम्** ॥ कल्यते बध्यते पङ्कैः **कलुषम्** ॥ कल्पिहपिभ्यां च भोजः । कल्पुषः क्रियानुगुणः ॥ हपुषा ओषधिः ॥

॥ ५१२ ॥ नहिकलिहनिलसिभ्य उषच् ॥ ४—७९ ॥

नहुषः ॥ **कलुषहनुषौ** स्वैरान्तरार्थमुक्तौ[2] ॥ **लसुषः** लसन् ॥

॥ ५१३ ॥ [3]पीयेरूषन् ॥ ४—८० ॥

पीयतिः सौत्रः पानार्थः । **पीयूषम्** ॥

॥ ५१४ ॥ मूज्योर्लोपश्च ॥ ४—८१ ॥

अनयोरूषन् अन्त्यलोपश्च । **मूषा** लोहद्रावणपात्रम्[4] ॥ **जूषः** पेयविशेषः ॥

॥ ५१५ ॥ मस्जेर्नुं च ॥ ४—८२ ॥

स्यात् । पूर्वं नुमि कृते सस्य जश्त्वचुत्वे। "झरो झरि"। मज्जन्त्यन्तर्भवन्त्यत्र वस्तूनि **मञ्जूषा** ॥

॥ ५१६ ॥ अङ्गूषः ॥ ४—८३ ॥

---

१. G omits **पुरुषः**.

२. G **स्वरार्थ**.

३. G **पीयतेरुषं**.

४. G **द्रोहण**.

एष बाणार्थः गजार्थश्च । जॄपॄकॄहनिगण्डिभ्योऽपि ऊषन् भोजक्तः । जरूषः सूर्यः ॥ परूषः वृक्षः ॥ करूषं जनपदः[1] ॥ हनूषः राक्षसः ॥ गण्डूषः ॥ "यूषशूषार्कलूषकारूषकोरदूषाटरूषशैलूषादयः" इति च । यूषः पेयभेदः ॥ शूषः बलम् ॥ अर्कलूषः ऋषिः ॥ कारूषः जनपदः ॥ कोरदूषः आटरूषश्च उद्भिद्भेदौ । आद्युक्तेः प्रत्यूषादि ॥

॥ ५१७ ॥ अर्तेररुः ॥ ४—८४ ॥

अररुः दैत्यः ॥

॥ ५१८ ॥ कुटः कित् ॥ ४—८५ ॥

कुटरुः पक्षिभेदः ।

कुटेर्ङित्त्वेन सिद्धेऽपि यदयं किद्ग्रहः कृतः ।
तेन कोटरकोटीराद्युणादौ ज्ञापितो गुणः ॥

॥ ५१९ ॥ शकादिभ्योऽटन् ॥ ४—८६ ॥

अत्र भोजः—"कृसृवृकलिमशकिकङ्किकर्किमक्यविभ्योऽटच्" करटः काकः ॥ सरटः कृकलासः ॥ वरटा हंसी ॥ कलमटः[2] क्षुद्रपत्तनम् ॥ शक्नोत्यनेन गन्तुं शकटः ॥ [कङ्कटः] ॥ कर्कटः ॥ मर्कटः ॥ अवत्यस्मात् पतनभिया इति अवटम् ॥ "कीकटकपटकर्पटादयः" कीकटः मगधदेशः ॥ कम्पतेऽनेन परधीः कपटम् ॥ कर्पटं वस्त्रम् ॥ आद्युक्तेः पर्पटः भक्ष्यभेदः । देवटः शिल्पिभेदः । मर्कटः वानरः इति ॥

॥ ५२० ॥ अर्तिशॄभ्यामुटच् ॥ ४—८७ ॥

अरटुः शरटुश्च हिंस्रः ॥ अवेश्च भोजः । अवटुः कण्ठस्य पश्चाद्भागः ॥

---

1. G omits जनपदः. GD करूषः नृपः.
2. P and GD कमटः.

॥ ५२१ ॥ कृ[1]कलिकैटिकडिभ्योऽम्बच् ॥ ४—८८ ॥

संकीर्यते **करम्बः** संमिश्रम् ॥ "कल किल क्षेपे" क्षिप्यते **कलम्बः** शरः ॥ **कटम्बः** वृक्षः ॥ **कडम्बः** धान्यभेदः ॥

॥ ५२२ ॥ कै[2]देर्णित् पक्षिणि ॥ ४—८९ ॥

कद्यते पीड्यते [3]वर्षेण अवर्षेण[4] च **कादम्बः** हंसः ॥ **कदम्बः** वृक्षः । संघर्षेण पीड्यत इति समूहोऽपि[5] ॥

॥ ५२३ ॥ [6]कर्दिकल्योरमः ॥ ४—९० ॥

पादक्षेपे कुत्सितशब्दं करोति **कर्दमः** ॥ क्षिप्यते भूमौ **कलमः** ॥ सर्तेश्च भोजः । सरमा शुनी ॥

॥ ५२४ ॥ कुणिपु[7]ल्योः किन्दच् ॥ ४—९१ ॥

कुणिन्दः वृषलः ॥ "पुल महत्त्वे" स्थूलो भवति **पुलिन्दः** किरातः ॥ अलिकलिभ्यां च भोजः । भूष्यते पुष्पाद्यैः अलिन्दः ॥ ध्वनन्ति मृगादयोऽत्र कलिन्दः गिरिः ॥

॥ ५२५ ॥ कुवश्च ॥ ४—९२ ॥

कुविन्दः तन्तुवायः ॥

॥ ५२६ ॥ नौ सञ्जेर्धथिन् ॥ ४—९३ ॥

घित्त्वात् "चोः[8] कुः" । **निषङ्गथिः** धनुर्धरः ॥

---

1. A and G -कडिकटि.-
2. GD कदेर्णिद्वा.
3. G अपकर्षेण.
4. G space is left out for writing this word.
5. G समूहश्च.
6. G कलिकर्द्योः. GD कर्दिकलोः.
7. GD -पूलोः.
8. GD "चजोः कुः".

॥ ५२७ ॥ उद्यर्तेः चित् ॥ ४—९४ ॥

उदरथिः समुद्रः ॥

॥ ५२८ ॥ सर्तेर्णित् ॥ ४—९५ ॥

सारयति प्रेरयति अश्वादिकं सारथिः ॥

॥ ५२९ ॥ खर्जिपिञ्जादिभ्य ऊरोलचौ ॥ ४—९६ ॥

अत्र भोजः । “ खर्जिखेलिकृपिवल्लिमयिमण्डिभ्य ऊरः ” खर्जूरः तरुः ॥ खल्लूरः खुरलीस्थानम्[2] । गौरादित्वात् खल्लूरी ॥ कल्पते शक्नोति सुरभीकर्तुं कर्पूरः । बाहुलकात् कृपो रो लाभावः ॥ वैल्लूरं[3] मांसम् ॥ मयते गच्छति वने मयूरः ॥ मण्डूरः कल्कभेदः ॥ “ तलिमलिशलिभ्यो णित् ” तालूरः जलावर्तः ॥ धार्यते श्रीकामैः मालूरः बिल्वः ॥ गच्छति शालूरः भेकः ॥ “ विडूरसिन्दूर-पत्तूरधुस्तूरधुत्तूरादयः ” । स्यन्दनं कृत्वा निर्मितत्वात् सिन्दूरम् ॥ पत्तूरं गन्ध-द्रव्यम् ॥ अन्त्यौ उन्मत्तकाख्ये ॥ आद्युक्तेः कस्तूरी । मार्जारः[4] सुवर्णशोधकः ॥ “ मसेरूरन् ” मसूरः धान्यभेदः ॥ “ कृञश्चुट् च ” ॥ लघूपधगुणः । कर्चूरः ओषधिः इति ॥ पिञ्जादिस्तु पिञ्जुलः हस्तिबन्धनपाशः[6] ॥ पलूलं बदरविकारः ॥ “ मव बन्धने ” मवूलः हस्ती ॥ कुकूलदुकूलवल्लूल-लाङ्गूलादयश्च भोजोक्ताः । कौति [7]उष्णाद्रोदित्यनेन कुकूलः तुषाग्निः ॥ “ [8]दु गतौ ” प्राप्यते धान्यैः दुकूलम् ॥ वैल्लूलः[9] तरुः ॥ लङ्गति चलति लाङ्गूलम् ॥

---

१. G -पटि-
२. G खुरलस्थोनक्.
३. GD adds here the commentary on sūtras 464-502.
४. G मन्जूरः.
५. GD कर्पूरः.
६. G -बाधः.
७. G कुष्ठात्.
८. G omits दु........धान्यैः.
९. P बल्बूलः.

|| ५३० || शॄणातेर्दुक् दीर्घश्च || ४—९७ ||

ऊलच्च स्यात् । गुणे कृते दीर्घः । हिनस्ति शार्दूलः ॥

|| ५३१ || तमेर्बुक् दीर्घश्च || ४—९८ ||

ताम्यते काङ्क्ष्यते ताम्बूलम् ॥

|| ५३२ || कुवश्चट् दीर्घश्च || ४—९९ ||

कूचः हस्ती । टित्त्वात् कूची प्रमदा ॥

|| ५३३ || समीणः || ४—१०० ||

चट् दीर्घश्च । समीचः चन्द्रः ॥

|| ५३४ || सिवेष्टेरू च || ४—१०१ ||

टित्त्वात् सूची ॥ सूचयतेः "अच इः" इति सूचिरपि । "कृञश्च" इति भोजः । कृञः चट् स्यात्, टेरूत्वं च रपरत्वात् । कूर्चम् श्मश्रु । टित्त्वात् कूर्ची[3] ॥

|| ५३५ || शमेर्बुन् || ४—१०२ ||

शमयत्यरीन् शम्बः वज्रः ॥ नितमेश्च भोजः । नितरां काम्यते नितम्बः रत्या ग्लायति वा ॥

|| ५३६ || उल्बादयश्च || ४—१०३ ||

अत्र भोजः ॥ "अलशलोरत उच्च" उल्बं गर्भवेष्टनम् ॥ शुल्बं ताम्रम् रज्जुश्च ॥ "अमर्णिद्वा" । गम्यते बालैः अम्बा । आम्बः अपह्नवः ॥ "निम्ब-बिम्बडिम्बहिडिम्बसाम्बादयश्च" डिम्बः व्यसनम् । आद्युक्तेः कुशाम्बः नृपः इति ॥

---

१. GD adds च.
२. G तृकश्च.
३. G कूर्चिः.

॥ ५३७ ॥ **स्थः स्तोऽम्बजबकौ** ॥ ४—१०४ ॥

स्थाधातोः स्त इत्यादेशः, अम्बच् अम्बकच् इति प्रत्ययौ च स्तः । **स्तम्बः स्तबकः** ॥

॥ ५३८ ॥ **हसृभ्यां क्वनिप्** ॥ ४—१०५ ॥

हृत्वा मत्स्यहन्ता ॥ **सृत्वा** भीरुः । स्त्रियां **हृत्वरी सृत्वरी**[1] ॥

॥ ५३९ ॥ **सृजेरश्च** ॥ ४—१०६ ॥

सृज्वा[2] ब्रह्मा पटश्च ॥

॥ ५४० ॥ **शाशपिभ्यां ददनौ** ॥ ४—१०७ ॥

आतपेन तनूक्रियते **शादः** पङ्कः तृणं च ॥ [**शब्दः**[3] ॥]

॥ ५४१ ॥ **अब्दादयश्च** ॥ ४—१०८ ॥

आप्नोति भावान् इति **अब्दः** वत्सरः ॥ अत्र भोजः । "**गुवः कित्**" **गुदम्** ॥ "**वृतुसुकुभ्यो नुं च**" आवृणोति **वृन्दम्** ॥ वर्धते **तुन्दम्** उदरम् ॥ **सुन्दः** असुरः ॥ कुवन्त्यत्र भृङ्गाः **कुन्दः** इति ॥

॥ ५४२ ॥ **वलिमलितनिभ्यः कयन्**[4] ॥ ४—१०९ ॥

वलति संवृणोति प्रकोष्ठं **वलयः** ॥ धारयति चन्दनादीन् **मलयः** ॥ तनोति कुलं **तनयः** ॥

॥ ५४३ ॥ **वृह्रोः षुग्दुकौ च** ॥ ४—११० ॥

वृषयः श्रेष्ठः ॥ ह्रीयते विषयैः **हृदयम्** ॥ "किसलयगेयगवयमुकय-[5]

---

१. G omits सृत्वरी.

२. GD सृज्वा.

३. G, GD, A and P omit the word within brackets.

४. GD omits कयन्.

५. G -गवयगय-

केकयादयः" इति भोजः । कसति उद्गच्छति विकसति वा किसलयम् ॥ गच्छति जानाति धर्मं गयः ऋषिः ॥ गम्यते गया ॥ गवयमुकयौ मृगभेदौ । केकति निवसत्यत्न केकयः जनपदः ॥

॥ ५४४ ॥ मापोरुरी च ॥ ४—१११ ॥

मापाभ्यां रुरन्त्यस्य ईत्वं च । गुणः । मीयते सूर्येण न मीयते वा **मेरुः** । मान्ति देवा अत्र वा ॥ पाति जले **पेरुः** नौः ॥

॥ ५४५ ॥ जत्र्वादयश्च ॥ ४—११२ ॥

जत्रुः —–––––– ॥ गत्रुः गमनशीलः ॥ शेरुः स्वापशीलः ॥ शिग्रुः ॥ पूरुः ॥

॥ ५४६ ॥ रुशतिभ्यां क्रुन् ॥ ४—११३ ॥

रौति **रुरुः** ॥ **शत्रुः** । शतिः सौत्रः । शातयतीति शत्रुः इति जत्र्वादितयापि सिद्धिः ॥

॥ ५४७ ॥ कुसेरूलोम्भोण्डोमेदेताः किच्च ॥ ४—११४ ॥

कुसेः ऊल उम्भ उण्ड उम ईद इत इत्येते कितः स्युः । संश्लिष्यति व्रीह्याद्यत्र **कुसूलम्** ॥ संश्लिष्यति वस्त्रादिभिः **कुसुम्भः** ॥ **कुसुण्डः** ॥ संश्लिष्यति मालादौ **कुसुमम्** ॥ श्लिष्यति मूलधनेन **कुसीदं** वृद्धिः ॥ **कुसितः** ऋषिः ॥

॥ ५४८ ॥ जनिदाच्युसृवृमदिशमिनमिभृञ्भ्य इत्वन्त्वन्क्तन्क्निशक्छक्खठक्टगटचः ॥ ४—११५ ॥

जन्यादिभ्यः क्रमादित्वन्नादयः स्युः । **जनित्वं** लोकः ॥ दधातेस्त्वन्,

दात्वः यज्वा ॥ च्युधातोः क्नन्, द्विककारयोगात् कित्त्वम्। **च्युक्नः**[1] क्षीणपुण्यः। च्योक्ना रात्रिः इति क्वचिद्वृत्तौ। चोक्ना वा ॥ सृधातोः क्निः। **सृणिः** इन्द्रः, पूर्वं[2] तु अङ्कुश उक्तः ॥ वृङः शक्। **वृशं** शृङ्गिवेरम् ॥ मादेच्छक्। **मच्छः** मत्स्यः ॥ शमेः खः। शाम्यत्यनेन पापं[3] पावनत्वात् **शङ्खः** ॥ पुनः शमेरेव ठक्। शमेः अनुदात्तोपदेशत्वात् बाहुलकात् किति मलोपः। **शठः** ॥ नमेष्टक्। अनुदात्तोपदेशत्वान्मलोपः। नमति सर्वान् **नटः** ॥ भृञोऽटच्। भ्रियते **भरटः** भृत्यः ॥

॥ ५४९ ॥ अन्येभ्योऽपि दृश्यन्ते ॥ ४—११६ ॥

इत्वन्नादयोऽन्यधातुभ्योऽपि दृश्यन्ते। पाधातोरित्वम्; "आह्रुणः" पेत्वः[3] मेषः ॥ णीञस्त्वन्। गुणः। नेत्वः ॥ "प्यायी" प्यात्वम् ब्राह्मणः ॥ गोत्वं यजमानः ॥ शगादिविस्तरस्तु भोजोक्तितो ग्राह्यः। "भृवम्यमिक्रुभ्यः शक्" भृशम् ॥ वंशः ॥ अंशः ॥ कृशः ॥ "गुगम्यमितुदिमदिभ्यः छक्" गवन्ते भृङ्गा अत्र गुच्छः ॥ कित्त्वात् "अनुदात्तोपदेश" इति नलोपः। गच्छः गतसंख्या ॥ अच्छः ॥ तुदति व्यथयति पर्याप्तत्वात्[4] तुच्छः ॥ "पूङ्पीङोः ह्रस्वश्च" पुच्छः ॥ पिच्छं बर्हिः ॥ "कच्छगुलुच्छपिलिपिञ्छादयः"। कष्यते जलेन कच्छः ॥ पिलिपिञ्छः राक्षसः ॥ आद्युक्तेः पिञ्छः ॥ "शमिमनिभ्यां खः" मङ्खः मागधः[5] ॥ "निय ऊनक् च"। यण्। नस्यानुस्वारपरमवर्णौ। न्यूङ्खः ॥ "पुंवो[6] नुं ह्रस्वश्च" ॥ पुङ्खः ॥ "अश्नोतेर्डित्"। डित्त्वात् सर्वलोपः। व्याप्तत्वात् खम् ॥ "मयेरूक् च" मयते सर्वत्र प्रसरति मयूखः ॥ "पीङ्कुणिभ्यां ढगुक्तः" पीठम् ॥ कुण्ठः ॥ एते भोजोक्ताः ॥ टकि तु वनतितनत्योः कित्त्वान्नलोपः। प्रार्थ्यते छायार्थिभिः

---

१. G च्यक्नुः.
२. G वालं.
३. G वेतोमः.
४. G अपर्यन्तत्वात्.
५. P adds निगथः.
६. G omits पुंवो........मयूखः.

वटः ॥ विस्तृतत्वात् तटः ॥ भोजस्तु "जुकिजनिपणिभ्यो दीर्घश्च" टच् स्यात् । जूटः मौलिः ॥ कीटः ॥ जाण्टपाण्टौ पक्षिणौ ॥ "घण्टाजटासटादयः" आद्युक्तेः छटा इति । अटज्विस्तरस्तु "शकादिभ्योऽटच्" इत्यत्रोक्तः ॥

॥ ५५० ॥ मूशक्यबिभ्यः क्लः ॥ ४—११७ ॥

बध्यते भूमौ **मूलम्** ॥ **शक्लः** प्रियंवदः ॥ इदित्त्वान्नलोपाभावः । अम्बते रोदिति क्रौर्यात् **अम्ब्लः** रसभेदः ॥ भोजस्त्वाह "स्याशक्यमिभ्यो लः"। स्यालः[1]। अम्लः इत्येतन्मते ॥ "भिल्लाच्छभल्लसौविदल्लादयः" । भिनत्ति मृगान् भिल्लः शम्बरः[2] ॥ अच्छभल्लः कपिभेदः ॥ सुङो[3] वृद्धिः । सुष्ठु वेत्ति सौविदल्लः कञ्चुकी । आद्युक्तेः भिनत्ति भल्लः इति ॥

॥ ५५१ ॥ सानसिसर्णसिवर्णसि[4]तण्डुलाङ्कुशचषालेवल्वल-पल्वल[6]धिष्ण्यशल्याः ॥ ४—११८ ॥

सानसिः हिरण्यम् ॥ **सर्णसिः**[5] जलम् ॥ **वर्णसिः**[7] जलरुहः ॥ **तण्डुलः** ॥ अञ्च्यते अनेन गज इति **अङ्कुशः** ॥ **चषालः** यूपाङ्गम् ॥ **इल्वलः** असुरः ॥ पालयति मृगान् **पल्वलम्** ॥ [8]शुल्वलः मुनिः भोजोक्तः ॥ **धिष्ण्यं** स्थानम् ॥ शलति गच्छति देहे **शल्यम्** ॥

॥ ५५२ ॥ माच्छाससिभ्यो यः ॥ ४—११९ ॥

न मीयते न[9] ज्ञायते **माया** ॥ छिनत्त्यातपं **छाया**, छिनत्त्यन्धकारमिति

---

१. A omits स्यालः.
२. GD शबरः.
३. GD सुञो.
४. A -वर्णसिपर्णसि-
५. GD पर्णसि.
६. P omits -पल्वल.
७. GD पर्णसि.
८. P तुल्वलः.
९. G omits न.

शोभापि ॥ "सस स्वप्ने" सेकाभावे स्वप्नमिवालस्यं प्राप्नोतीति[1] सस्यम् ॥ गुणे "वैन्तो[2] यि" इत्यव् । "धौतोस्तन्निमित्तस्यैव"[3] इत्यपसव्यम् ॥

॥ ५५३ ॥ जनेर्यक् ॥ ४—१२० ॥

जन् य "ये विभाषा" इत्यात्वं वा । स्वयं पुत्ररूपेण जायते अस्यामिति जाया ॥

॥ ५५४ ॥ अघ्न्यादयश्च ॥ ४—१२१ ॥

न हन्तव्या इति अघ्न्या गौः ॥ अत्र भोजः । "कलिपलिकनिबन्धिभ्यश्च" यः स्यात् । क्षिपति[4] रोगान् कल्यः ॥ पल्यं कटकुसूलम्, करिणां भोजनं वा ॥ कान्तिमत्वात् कन्या ॥ बध्नाति प्रतिहन्ति फलं वन्ध्यः ॥ "सञ्जेर्धश्च" सजतोऽस्यां रात्र्यहनी सन्ध्या । संपूर्वस्य ध्यायतेः आलोपः इति वृत्तो । तत्र "हलो यमाम्" इति यलोपः । सम्यक् ध्यायन्त्यस्यामिति सन्ध्या ॥ " [illegible] वैयप्"॥ जन्यं युद्धम् ॥ "पुण कर्मणि शुभे" पुण्यम् ॥ कृन्तति[6] कृत्या पिशाचः ॥ "मैध्य[7]विन्ध्यान्यहर्म्यर्व[8]स्त्यागस्त्यपुलस्त्यापत्यसत्यकुड्यकुल्याहल्यादयः ।" विदधाति करोति भयं विन्ध्यः ॥ हरति चित्तं हर्म्यम् ॥ "वसेरादिवत्वं तुट् च" इति नाथः । वस्त्यं गृहम् । बस्त्यमिति स्वाम्याद्याः ॥ न पतन्त्यनेन अपत्यम् ॥ कोलति संस्त्यायति जलं मृत्तिका चात्र कुल्या ॥ कुड्यम् ॥ आद्युक्तेः सह्यः अद्रिः । मर्त्यः इति ॥

---

१. G omits इति.

२. A, G and P omit G "वान्तो यि" इति.

३. GD omits this sūtra.

४. P adds जहाति.

५. G क्यच्.

६. A कृन्तन्ति.

७. G वन्ध्व.

८. G वन्ध्य-
P and GD पस्त्य-

॥ ५५६ ॥ स्नामदिपद्यर्तिशकिभ्यो वनिप् ॥ ४—१२३ ॥

इपावितौ । स्नावा स्नायुः ॥ मद्वा तृप्तः ॥ पद्वा पादः ॥ गच्छति अर्वा अश्वः ॥ पूर्यते सिराभिः पर्व ॥ शक्वा तक्षकः ॥ स्त्रियाम् "वनो र च" इति ङीब्रौ । शक्वरी च्छन्दः ॥

॥ ५५७ ॥ शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप् ॥ ४—१२४ ॥

शीवा अजगरः । बाहुलकात् ह्रस्वेन शिवा क्रोष्टेति क्वचिद्वृत्तौ ॥ क्रुश्वा क्रोष्टा ॥ रुह्वा वृक्षः ॥ जित्वा शत्रुः ॥ क्षित्वा मृत्युः ॥ सृत्वा कालः ॥ धृत्वा विष्णुः ॥ ह्ववृभ्यां च भोजः । हृत्वा रुद्रः ॥ वृत्वा आकाशः ॥ "सृजेः कश्च" इति च । सृक्व ओष्ठप्रान्तः ॥

॥ ५५८ ॥ ध्याप्योः संप्रसारणं च ॥ ४—१२५ ॥

"हलः" इति दीर्घः । धीवा मनीषी ॥ पीवा स्थूलः ॥

॥ ५५९ ॥ अतेर्धश्च ॥ ४—१२६ ॥

अतन्त्यत्रेति अध्वा ॥

॥ ५६० ॥ प्र ईरसद्योस्तुट् च ॥ ४—१२७ ॥

प्रेत्वा सागरः ॥ प्रसत्वा धर्मः ॥

॥ ५६१ ॥ इन् सर्वधातुभ्यः ॥ ४—१२८ ॥

यतते मुक्त्यै यतिः ॥ यजिः यजमानः ॥ वन्दिः हठहृता स्त्री । पुनर्ङीपि[3] वन्दी ॥ "हल विलेखने" । हलिः महद्धलम् ॥ क्षिपन्त्यन्योऽन्यमत्रेति

---

१. G सृत्वा.

२. G शाद्वो.

३. G ङीषि.

कलिः ॥ "किल क्रीडने" केलिः ॥ आव्रियते कुटिः ॥ त्रुटेः ण्यर्थवृत्तेः त्रोटिः चञ्चुः ॥ कोटिः ॥ भूषयति मञ्जरीं अलिः ॥ वटिः गुलिका इत्यादि ॥

॥ ५६२ ॥ पचिपठिकाशिनन्दिभ्य इन् ॥ ४—१२९ ॥

सत्सूद्विषादित्वम् । पूर्वस्य प्रपञ्चोऽयम् । पचिः अग्निः ॥ पठिः विद्वान् ॥ प्रकाशते शिवोऽत्र काशी वाराणसी ॥ नन्दिः वृषः ॥

॥ ५६३ ॥ हृपिशिरुहिवृतिविदिकीर्तिभ्यश्च ॥ ४—१३० ॥

हरति पापं मृगान् वा हरिः ॥ पेशिः मांसभेदः ॥ रोहिः[1] वृक्षभेदः ॥ वृत्यते हस्तेन वर्तिः दशा ॥ वेदिः ॥ कीर्तिः ॥

॥ ५६४ ॥ इगुपधात् कित् ॥ ४—१३१ ॥

इन् कित् स्यात् । शुचिः ॥ "ऋष गतौ" जानाति ऋषिः ॥ 'वौ।रञ्चेर्नुं च" इति भोजः । विरिङ्क्ते सूते लोकान् विरिञ्चिः ब्रह्मा ॥

॥ ५६५ ॥ भ्रमेः संप्रसारणं च ॥ ४—१३२ ॥

भृमिः चलनम् ॥

॥ ५६६ ॥ क्रमितमिनमिस्तंभामत इच्च ॥ ४—१३३ ॥

इन् किच्च स्यात् । क्रामति क्रिमिः ॥ ताम्यन्त्यनेनान्ये तिमिः ॥ निमिः नृपः ॥ कित्त्वान्नलोपः । स्तिभिः केतकादिसूचिः ॥

॥ ५६७ ॥ मनेरुच्च ॥ ४—१३४ ॥

जानाति मुनिः ॥

1. G रोही.

॥ ५६८ ॥ वलेर्वल्लि चाहिरण्ये ॥ ४—१३५ ॥

वलेरिन् कित् स्यात् , अहिरण्ये वल्ल्यादेशश्च । **वल्लिः** लता ॥ **वलिः** हिरण्यम् ॥ अहिरण्य इत्युपलक्षणम् । तेन दानवादावपि वलिः वल्लिश्च ॥

॥ ५६९ ॥ वसिवपियजिराजि्[1]ध्रजिध्वजिसदिहनिकमिपाशिवदिवृङ्भ्य इञ् ॥ ४—१३६ ॥

वसन्त्यनेन तक्षका **वासिः** तक्षणसाधनम् ॥ उप्यते जलमस्मिन् **वापिः** सरः ॥ **याजिः** यजमानः ॥ एकरूपत्वात् राजते **राजिः** ॥ [2]**ध्राजिः** पद्धतिः ॥ **ध्वाजिः** पताका ॥ सीदत्यास्तेऽश्वे **सादिः** अश्वारोहः ॥ ञित्त्वात् तत्त्वघत्वे । **घातिः** अस्त्रभेदः ॥ **कामिः** कामुकः[3] ॥ **पाशिः** झिल्लिका ॥ **वादिः** वक्ता ॥ व्रियते सर्वैः **वारि** जलम् ॥ शृवमिफलिसंपतिभ्यश्च भोजः । शृणात्यन्योऽन्यं शारिः द्यूतोपकरणम् ॥ वामिः स्त्री ॥ फालिः दलम् ॥ संपातिः पक्षी ॥

॥ ५७० ॥ नहो भ च ॥ ४—१३७ ॥

नह्यन्तेऽत्र सिरामुखानि **नाभिः** ॥

॥ ५७१ ॥ कृषेर्वृद्धिश्छन्दसि ॥ ४—१३८ ॥

कार्षिः शशी समुद्रश्च ॥

॥ ५७२ ॥ शृः शकुनौ ॥ ४—१३९ ॥

शारिः शुकी । द्यूते तु शारिर्भोजोक्तः ॥

॥ ५७३ ॥ कृञ उदीचाम् ॥ ४—१४० ॥

---

1. G omits-ध्रजिध्वजि-
2. G omits ध्राजिः पद्धतिः.
3. A कामुकिः.

कारिः तक्षादिः । प्राचां मते तु "अच इः" इति वक्ष्यमाण इः । करिः विष्णुः ॥

॥ ५७४ ॥ जनिघसिभ्यामिण् ॥ ४—१४१ ॥

"जनिवध्योश्च" इति वृद्ध्यभावात् **जनिः** वधूः । इह णित्सुयोजनसामर्थ्यात् वृद्ध्या जानिः इति केचित् । **घासिः** भक्ष्यम् ॥ अलिशलिपलितलिजम्यणिभ्यश्च भोजः । अलति भूषयति आलिः सखी, जलं वारयतीति सेतुश्च, तत्तुल्यत्वात् पङ्क्तिश्च ॥ शल्यते [illegible] शालिः ॥ पाल्यते गम्यते बहुभिः पालिः समूहः ॥ तलति प्रतितिष्ठति वक्षसि[3] तालिः आभरणम् ॥ जमति भुङ्क्ते भ्रातुः स्वं जामिः स्वसा ॥ अणति ध्वनति निखननकाले आणिः कीलः ॥

॥ ५७५ ॥ [4]अज्यतिभ्यां च ॥ ४—१४२ ॥

इण् स्यात् । गच्छन्त्यत्र योद्धारः, मिथः [5]क्षिपन्ति वा **आजिः** ॥ **आतिः** पक्षी ॥

॥ ५७६ ॥ पादे च ॥ ४—१४३ ॥

आभ्यां पादे चोपपदे इण् । "पादस्य पत्" इति पद्भावः । **पदाजिः** **पदातिश्च** तुल्यार्थौ ॥

॥ ५७७ ॥ अशिपणाय्योरुड्लुकौ ॥ ४—१४४ ॥

आभ्यामिण् । अशेरुडागमः । पणायोरायस्य लुक् च स्यात् । वृ[6]द्धिः । समूहिषु व्याप्तत्वात् **राशिः** ॥ व्यवहरन्त्यनेन **पाणिः** ॥

---

1. G वद्यते.
2. G वाल्हिः.
3. G omits वक्षसि.
4. P अज.
5. G क्षिपन्ति वज्रीः.
6. G omits वृद्धिः........इण् स्यात्. in the commentary on 579.

॥ ५७८ ॥ वेञो डित् ॥ ४—१४५ ॥

वेञो गतिवृत्त्या **विः** पक्षी ॥

॥ ५७९ ॥ प्रे हरतेः कूपे ॥ ४—१४६ ॥

डित्, इण् स्यात्। प्रह्रियते जलमस्मात् **प्रहिः** ॥

॥ ५८० ॥ नौ[1] व्यो यलोपः पूर्वपदस्य च दीर्घः ॥ ४—१४७ ॥

डित्, इण् च स्यात्। नितरां वीयते बध्यते **नीविः**। संव्रियेत[2] इति निधिश्च ॥

॥ ५८१ ॥ समाने ख्यः स चोदात्तः ॥ ४—१४८ ॥

समान उपपदे ख्याधातोः डित् इण् यलोपश्च स्यात्। पूर्वपदस्य चोदात्तः सादेशः। समानं ख्यानं प्रतिभानमस्मिन् **सखा**। समानं ख्याति वदति वा ॥

॥ ५८२ ॥ आङि श्रिहनिभ्यां ह्रस्वश्च ॥ ४—१४९ ॥

पूर्वपदस्य ङो ह्रस्वः। डित्त्वाट्टिलोपः। **अश्रिः** ॥ आहन्ति **अहिः** ॥

॥ ५८३ ॥ अच इः ॥ ४—१५० ॥

अजन्तादिः स्यात्। "रु" रूयते स्तूयते रविः ॥ कवयति ग्रथ्नाति कविः ॥ पुनाति युद्धवधात् पविः वज्रम् ॥ तरिः नौः ॥

॥ ५८४ ॥ खनिकष्यज्यसिपुसिध्वनिसनिग्रन्थि-
चरिभ्यश्च ॥ ४—१५१ ॥

---

१. G omits नौ व्यो........नीविः २. G संप्रीयते

खनि: आकर: ॥ **कषि:** खनित्रम् ॥ **अग्नि:** आगन्तु: ॥ अस्यत इति **असि:** ॥ **वसि:** वसिता ॥ **ध्वनि:** ॥ **सनि:** याच्ञा ॥ **ग्रन्थि:** ॥ **चेरि:** दवाग्नि: ॥ मणेश्च भोज: । शब्दयते स्तूयते जनै: इति मणि: । मणतीति घण्टापि ॥ रविकविपविखनिध्वनिग्रन्थिमणय इण्प्रत्ययान्ता इत्येके ॥

॥ ५८५ ॥ उभे द्वि: ॥ ४—१५२ ॥

उभेरिप्रत्ययो द्व्यादेशश्च । इकार इत्यर्थ: । द्विशब्द: । "उभे च द्वित्रौ" इति भोज: । तेन त्रिशब्द: ॥

॥ ५८६ ॥ वृतेश्छन्दसि ॥ ४—१५३ ॥

वर्ति: इत्यन्तोदात्तम् । गृहनाम ॥

॥ ५८७ ॥ भुजे: कित् ॥ ४—१५४ ॥

भुजि: भोक्ता ॥

॥ ५८८ ॥ कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च ॥ ४—१५५ ॥

"ॠत इत्" विक्षिपति भुवनं **किरि:** सूकर: ॥ गिरत्यावृणोति गमनं **गिरि:** ॥ **शिरि:** हिंस्र: ॥ "उदोष्ठ्यपूर्वस्य" पूर्यते जनै: पाल्यते वा **पुरि:** नगरी ॥ **कुटि:** गृहम् ॥ **भिदि:** वज्रम् ॥ **छिदि:** छेत्ता ॥

॥ ५८९ ॥ कुण्ठिकम्प्यो: नलोपश्च ॥ ४—१५६ ॥

कुठि: पर्वत: ॥ कम्पते सर्वत्र चरति **कपि:** ॥ "तरते: संपत्तुक्चा-

---

१. G परि: दुधिविग्नि:.

२. G जनै: स्तूयते.

३. G भुवं.

GD omits विक्षिपति भुवनं

भ्यासस्य" इति भोजः। किञ्वात् "ऋृत इत्" तिर ई। तॄशब्दस्य द्वित्वमुरदत्वं च। संपदित्वं कि तृन् इ तुक्। तरति लङ्घयति तरून् तित्तिरिः पक्षी॥

॥ ५९० ॥ मनिन् ॥ ४—१५७ ॥

सर्वधातोः मनिन् स्यात्। शृणाति दुःखं शर्म॥ आवृणोत्यङ्गं वर्म॥ वर्ततेऽस्मिन् वर्त्मा॥ श्लिष्यति देहे [1]श्लेष्मा॥ भस्म॥ [3]कर्म॥ जन्म॥ [2]चर्म। "कर्मणां चिनुते शुभम्" इति प्रयोगात् कर्मा पुंस्यपि इति टीकासर्वस्वे॥ प्रीणाति प्रेम॥ छादनसाधनं छद्म। छादेर्णिलोपः। "इस्मन्त्र" इति ह्रस्वः॥

॥ ५९१ ॥ [4]बृंहेर्नोऽच्च ॥ ४—१५८ ॥

अमि यण्। बृंहति व्याप्नोति ब्रह्म।

॥ ५९२ ॥ उषिकुषिसृपिभ्यः कित् ॥ ४—१५९ ॥

उषति दहति उष्मा॥ कुष्मा जरायुः॥ सृप्मा गन्ता॥

॥ ५९३ ॥ अशिशकिभ्यां छन्दसि ॥ ४—१६० ॥

व्याप्नोति सुखमिति अश्मा। लोकेऽपि॥ शक्मा शक्तः॥

॥ ५९४ ॥ भृसृहृधृस्तृसूभ्य[5] ईमनिच् ॥ ४—१६१ ॥

भरीमा स्वामी॥ सरीमा कालः॥ हरीमा वायुः॥ धरीमा रूपम्॥ स्तरीमा स्तरणम्॥ सवीमा प्रसवः॥

---

१. G वर्त्म.

२. P चर्म.

३. P omits चर्म but adds कर्मा.

४. A and P बृंहेरच्चलोपश्च.

५. P-षूभ्यः ईमनिन्.

॥ ५९५ ॥ जनिहृभ्यामिमनिन् ॥ ४—१६२ ॥

जनिमा जन्म ॥ **हरिमा** मृत्युः ॥

॥ ५९६ ॥ वेञः सर्वत्र ॥ ४—१६३ ॥

लोके वेदेऽपि वेञ इमनिन् स्यात्[1] । आत्वम्, गुणः । **वेमा** वानदण्डः ॥

॥ ५९७ ॥ नामन् सोमन् सामन् होमन् हेमन् रोमन् लोमन् व्योमन् विधर्मन् ध्यामन् पाप्मन् ॥ ४—१६४ ॥

एते मनिनन्ताः । नीयते आनीयतेऽनेन **नाम** ॥ **सोमा** ॥ **साम** ॥ **होमा** अग्निः ॥ "हि गतौ वृद्धौ च" । **हेम** ॥ रुहेर्हिलोपः । रोहति **रोम** ॥ लूयते **लोम** ॥ व्ययते संवृणोति लोकं **व्योम**, अवकाशदानात् विशेषेणावति वा ॥ **विधर्मा** वायुः ॥ **ध्याम** प्रहरणम् ॥ **पाप्म** ॥ क्लोमन् ललामन् यक्ष्मन् पक्ष्मन् वैष्मन्निति[2] च भोजोक्ताः । क्लोमा [3]शरीरान्तरवयवः ॥ ललति विलसति ललाम भूषणम् ॥ वर्धते वर्ष्म ॥ नाथोक्तास्तु—तोक्मा अङ्कुरः । शुष्मा अग्निः । रुक्म स्वर्णम् ॥

॥ ५९८ ॥ मिथुने मनिन् ॥ ४—१६५ ॥

[4]मैथुने द्योत्ये मनिन् स्यात् । शृधातोः सुशर्मा मैथुनेच्छावती स्त्री । स्त्रीपुंसलिङ्गयोः । "सर्वधातोः मनिन् स्यात्" इत्यन्ये । तत्राद्यपक्षे सुशर्ममात्रार्थत्वे सामान्योक्त्यनुपपत्तिः । उत्तरत्र सर्वधातोः मनिनुक्त्यैव सिद्धेः वैयर्थ्यम् । स्वरार्थोऽनुबन्धान्तरपाठस्तु न दृष्टः ॥

---

१. G omits स्यात्.
२. G वर्मन्.
३. G शरीरावयवः.
४. G omits मैथुने........सर्वधातोर्मनिन्.

॥ ५९९ ॥ सातिभ्यां मनिन्मनिणौ ॥ ४—१६६ ॥

मनिनो ङित्त्वात् "घुमास्था" इति सोधातोः ईत्वम् । अन्तं करोतीति सीमा ॥ णित्त्वात् वृद्धिः । सातत्येन व्याप्नोति आत्मा ॥

॥ ६०० ॥ ष्ट्रन् ॥ ४—१६७ ॥

सर्वधातोः ष्ट्रन् स्यात् । पिबत्यनेन पाति संग्राह्यवस्तूनि वा पात्रम् । षित्त्वात् पात्री ॥ छादेः "तितुत्र" इतीडभावः । णिलोपः । "इस्मन्त्रन्" इति ह्रस्वः । छत्रम् ॥ राजेः व्रश्चादिषः । राष्ट्रम् ॥

॥ ६०१ ॥ भ्रस्जिगमिनमिहनिविष्यशां वृद्धिश्च ॥ ४—१६८ ॥

भ्रस्जेः "स्कोः" इति सलोपः । व्रश्चादिषः । भृज्यतेऽत्र भ्राष्ट्रः अम्बरीषः ॥ गान्त्रं मर्म ॥ नान्त्रं शिरः ॥ हान्त्रं रक्षः ॥ वैष्ट्रः विष्णुः ॥ आष्ट्रं आकाशम् ॥ नशेश्च भोजः । "छशां षः" । बाहुलकात् "मस्जिनशोः" इति नुमभावः । नाष्ट्रः राक्षसः ॥

॥ ६०२ ॥ दिवे द्यु च ॥ ४—१६९ ॥

वृद्धिश्च स्यात् । द्यौत्रं स्वर्गः ॥

॥ ६०३ ॥ उषिखनिभ्यां कित् ॥ ४—१७० ॥

ष्टुत्वम् । उष्यते आतपैः उष्ट्रः ॥ "जनसनखनाम्" इति झलि आत्वम् । खात्रम् खनित्रम् ॥

॥ ६०४ ॥ सिविमुचोष्टेरू च ॥ ४—१७१ ॥

सीव्यत्यनेन सूत्रम् ॥ मुच्यते मूत्रम् ॥

---

१. G omits सा........व्याप्नोति. ३. G -मुच्योः.
२. G घुष.

॥ ६०५ ॥ हुयामाश्रुवसिभसिभ्यस्त्रन् ॥ ४—१७२ ॥

होत्रम् आहुतिः ॥ षित्त्वाभावात् टाप् ॥ **यात्रा** ॥ **मात्रा** ॥ **श्रोत्रम्** ॥ **वस्त्रम्** ॥ **भस्त्रम्** ॥ लुपेश्च भोजः । लोप्त्रं मुषितद्रव्यम् ॥

॥ ६०६ ॥ गमेरा च ॥ ४—१७३ ॥

अन्त्यस्यात्वम् । गच्छति **गात्रम्** ॥

॥ ६०७ ॥ अमिचिमिदिशंसिभ्यः क्त्रि ॥ ४—१७४ ॥

कित्त्वात् "अनुनासिकस्य क्विझलोः" इति दीर्घः । व्याप्नोत्युदरं **आन्त्रम्** । क्विचिद्वृत्तौ अन्त्रमित्यदीर्घमुक्तम् । "कुक्ष्यन्त्रनाड्यः" इति श्रीभागवते मषीकोशेषु पाठश्च ॥ चीयते व्याप्यते भित्त्यादौ **चित्रम्** ॥ मेद्यति स्निह्यति **मित्रम्** ॥ कित्त्वान्नलोपः । **शस्त्रम्** स्तुतिभेदः ॥

॥ ६०८ ॥ पुवो ह्रस्वश्च ॥ ४—१७५ ॥

पुनाति ऋणापाकरणात् **पुत्रः** ॥

॥ ६०९ ॥ स्त्री ॥ ४—१७६ ॥

एष स्त्यायतेः ड्रट्प्रत्ययान्तो निपात्यते । डित्त्वाट्टिलोपः । "लोपो व्योः" इति यलोपः । **स्त्री** । टित्त्वात् ङीप् । "स्त्री । संस्त्याने स्त्यायतेः ड्रट्" इति भाष्यपाठः । संस्त्यान इति गर्भस्यास्यां संघातीभावे गम्यमान इत्यर्थः ॥

॥ ६१० ॥ गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ॥ ४—१७७ ॥

नायं नित् । "गुङ् शब्दे" आख्यायते **गोत्रम्** ॥ **धर्त्रं गृहम्** ॥ वियति गच्छन्त्यनेन प्रेरिताः **वेत्रम्** ॥ **पक्त्रः** गार्हपत्याग्निः ॥ वक्त्यनेन

वक्त्रम् ॥ यम्यते बध्यतेऽनेन यन्त्रम् ॥ सीदन्त्युपविशन्त्यत्र[1] जनाः सत्रम् ॥ क्षदिः सौत्रः । क्षत्त्रम् ॥ वृमनितनिक्षिभ्यश्च भोजः । वृत्रं चर्म ॥ ध्यायते मन्त्रम् ॥ विस्तीर्यते तन्त्रम्[2] ॥ निवसन्त्यत क्षेत्रम् ॥

॥ ६११ ॥ दादिभ्यः छन्दसि ॥ ४—१७८ ॥

दात्रम् ॥ योत्रम् ॥ पोत्रम् ॥

॥ ६१२ ॥ भूवदिगृभ्यो णित्रन् ॥ ४—१७९ ॥

भावित्रम् त्रैलोक्यम् ॥ वदति ध्वनति वादित्रम् ॥ गारित्रः आचार्यः ॥

॥ ६१३ ॥ चरेर्वृत्ते ह्रस्वश्च वा ॥ ४—१८० ॥

चरित्रम् ॥ चारित्रम् ॥

॥ ६१४ ॥ अशित्रादिभ्य इत्रोत्रौ ॥ ४—१८१ ॥

अश्यादिभ्य इत्रः, तृप्रभृतिभ्यः उत्रश्च स्यात् । अशित्रम् अन्नपानम्[3] ॥ कटित्रं श्रोणिः ॥ बन्धित्रः कार्मः[4] ॥ भ्रियते भरित्रम् शूल्यमांसम् ॥ वहित्रं वाहनम् ॥ उत्रः । तरुत्रः ॥ करुत्रम् अभिप्रेतम् ॥

॥ ६१५ ॥ अमेर्द्विषति चित् ॥ ४—१८२ ॥

इत्रः स्यात् । रुजति अमित्रः ॥

॥ ६१६ ॥ आः समिण् निकषिभ्याम् ॥ ४—१८३ ॥

आप्रत्ययोऽत्र संपूर्वस्येणस्यान्निकषेस्तथा ।
समया निकषा चेति समीपार्थेऽव्ययद्वयम् ॥

---

1. G omits अत्र.
2. G तन्त्रः.
3. G अनुपानम्.
4. G कायः.

आप्रत्ययोऽन्यतोऽपीष्टो मृषिसन्योः मृषा सना ।
मुधा स्वधा मुचिस्वद्योः कार्यं बाहुलतोऽखिलम् ॥

॥ ६१७ ॥ सूचेः स्मन् ॥ ४— १८४ ॥

झलि "चोः कुः" षत्वम् । सूच्यते सूक्ष्मम् ॥

॥ ६१८ ॥ पातेर्डुंसुन् ॥ ४—१८५ ॥

उकार उदित्त्वार्थः । डित्त्वाट्टिलोपः । पुंस्शब्दः । डुंसिजिति केचित् ॥

॥ ६१९ ॥ [1]रुचिभुजिभ्यां किष्यन् ॥ ४—१८६ ॥

रुचिष्यम् इष्टम् ॥ [2]भुङ्क्ते वेतनं भुजिष्यः दासः ॥

॥ ६२० ॥ वचेरुष्यन् ॥ ४—१८७ ॥

वचुष्यः नकुलः । "पचेरुष्यन्" इति क्वचित् पाठः ॥

॥ ६२१ ॥ वसेस्तिः ॥ ४—१८८ ॥

[3]वसत्यत्र मूत्रं वस्तिः ॥

॥ ६२२ ॥ वौ तसेः ॥ ४—१८९ ॥

"तितुत्र" इतीडभावः । वितस्तिः द्वादशाङ्गुलः । सपिपदिभ्यां च भोजः । वसति समवैति रथेन सप्तिः अश्वः ॥ पत्तिः ॥

॥ ६२३ ॥ प्रथेर्नित् ॥ ४—१९० ॥

प्रथेस्तिन् नित्स्यात् । [4]चर्त्वम् । प्रत्तिः ख्यातिः ॥

---

१. G रुजि-
२. G and A omit भु······तनं.
३. G वसन्त्यत्र.
४. G omits चार्त्वम्.

॥ ६२४ ॥ दृणातेः ह्रस्वश्च ॥ ४—१९१ ॥

विदार्यते निर्माणकाले **दृतिः** चर्मपात्रम् । भोजस्त्वाह "भसेर्गट् च" भसेस्तिप् धातोर्गडागमश्च । दीप्यते गभस्तिः ॥ "यजस्तिः" । व्रश्चादिषः । यष्टिः ॥ "[1]कुङो यसुट् च" [2]कुङस्तिः तस्य यसुट् च । कोयष्टिः ॥ "गिरष्षुक् ह्रस्वश्च" गृष्टिः ॥ "दृकृषिरिषिविषिमुषिशाशुच्यशिभ्यः कितन्" कृष्टिः विद्वान् ॥ रिष्टिः आयुधम् ॥ व्याप्नोति बहुतिथिषु विष्टिः ॥ खण्डयति परान् मुष्टिः ॥ "शाच्छोः" इतीत् । शिचिः कृष्णः श्वेतश्च ॥ दीप्यते शुक्तिः ॥ अष्टिः छन्दः ॥ "कुचिञोः चिन्नुक् च" आभ्यां चिन् क्तिन् नुक् च । कुन्तिः चिन्तिश्च नृपौ इति ॥

॥ ६२५ ॥ कृतृकृपिभ्यः कीटन् ॥ ४—१९२ ॥

"ॠत इत्" क्षिप्यते शिरसि **किरीटम्** ॥ **तिरीटम्** प्लवः ॥ कल्प्यते तृप्त्यै **कृपीटं** जलम् ॥

॥ ६२६ ॥ रुचिवचि[3]कुत्सिकुषिभ्यः कितच् ॥ ४—१९३ ॥

रुचितम् इष्टम् ॥ वचेर्यजादित्वात् अत्वम् । **उचितम्** ॥ **कुत्सितम्** ॥ निष्ठया सिद्धेऽपि चित्स्वरार्थमुक्तिः । **कुषितः** ऋषिः ॥

॥ ६२७ ॥ कुषिकुटिभ्यां क्मलन् ॥ ४—१९४ ॥

कुष्मलः श्लेष्मा ॥ कुटिलत्वात् **कुड्मलं** मुकुलम् ॥ डुकशिशालिभ्यश्च भोजः । **डुमलं** जलम् ॥ **कश्मलम्** ॥ **शाल्मलः** तरुः ॥

---

1. P omits this sūtra.
2. A omits कुङ........च.
3. G कुचिकुटिभ्यः.

॥ ६२८ ॥ कुशेर्लश्च ॥ ४—१९५ ॥

कुश्मलं देशः ॥

॥ ६२९ ॥ असुन् ॥ ४—१९६ ॥

सर्वधातोरसुन् स्यात् । इण् । अयः ॥ तिज् । तनूकरोत्यन्यान् तेजः ॥ रक्षन्त्यस्मात् रक्षः ॥ ज्ञायतेऽनेन मनः ॥ एवं चेतः । सरन्त्यनेन जनाः सरः । वचः ॥

॥ ६३० ॥ पिबतेरी च ॥ ४—१९७ ॥

गुणः । पीयते पयः ॥

॥ ६३१ ॥ [1]अशेर्युट् ॥ ४—१९८ ॥

अश्नुते व्याप्नोति यशः ॥

॥ ६३२ ॥ [2]अब्जेर्बलोपश्च ॥ ४—१९९ ॥

गुणः । उब्जति आर्जवेन गच्छति इति ओजः ॥

॥ ६३३ ॥ श्वेः संप्रसारणं च ॥ ४—२०० ॥

गुणः । शवः ॥

॥ ६३४ ॥ श्रयतेः स्वाङ्गे शिरः किच्च ॥ ४—२०१ ॥

स्वाङ्गेऽर्थे श्रयतेः किदसुन् शिरादेशश्च । प्रधानेन्द्रियाणि श्रयन्तेऽस्मिन् शिरः ॥

---

1. G omits this sūtra. २. G उब्जेर्बले बलो.

॥ ६३५ ॥ अर्तेरुच्च ॥ ४—२०२ ॥

रपरः । उत् । व्याप्नोति उरः ॥

॥ ६३६ ॥ व्याधौ शुट् च ॥ ४—२०३ ॥

अर्तेर्व्याधावसुन् शुट् च । निर्गच्छति अर्शः ॥

॥ ६३७ ॥ उदके नुट् च ॥ ४—२०४ ॥

अर्थ्यते पिपासुभिः अर्णः ॥

॥ ६३८ ॥ इण आगसि ॥ ४—२०५ ॥

असुन् नुट् च । निष्कृत्या गच्छति एनः ॥

॥ ६३९ ॥ रिचेर्धने घित्[1] ॥ ४—२०६ ॥

असुन् नुट् च । गुणः । घित्त्वात् "चजोः" इति कुः । रेक्णः धनम् ॥

॥ ६४० ॥ चायतेरन्ने ह्रस्वश्च ॥ ४—२०७ ॥

नुटि यलोपः । चनः ॥

॥ ६४१ ॥ वृङ्शीभ्यां रूपस्वाङ्गयोः पुट् च ॥ ४—२०८ ॥

वर्पः रूपम् ॥ शेते शेपः मेढ्रम् । अदन्तः प्रागुक्तः ॥

॥ ६४२ ॥ स्रुरीभ्यां तुट् च ॥ ४—२०९ ॥

स्रवति स्रोतः ॥ रीयते स्रवति रेतः ॥ "यातेर्दुक् च" इति भोजः । यादः जलजन्तुः ॥ "इन्धेर्नलोपश्च" इति च । एधः इन्धनम् ॥

1. G घिच.

॥ ६४३ ॥ पातेर्बले जुट् च ॥ ४—२१० ॥

पाजः बलम् ॥

॥ ६४४ ॥ उदके थुट् च ॥ ४—२११ ॥

पाति जन्तून् पाथः ॥

॥ ६४५ ॥ अन्ने च ॥ ४—२१२ ॥

पाथः अन्नम् ॥

॥ ६४६ ॥ [1]अदेर्नुं धश्च ॥ ४—२१३ ॥

अदेरन्नेऽर्थे नुम् धश्च । अद्यते अन्धः ॥ " अदेर्नुं धश्च वा " इति भोजः । अदस्शब्दः ॥

॥ ६४७ ॥ स्कन्देश्च स्वाङ्गे ॥ ४—२१४ ॥

असुन् धश्च । स्कन्धः भुजशिरः । अदन्तः स्कन्धः वक्ष्यते ॥

॥ ६४८ ॥ आपः कर्माख्यायां ह्रस्वश्च नुट् च वा ॥ ४—२१५ ॥

अप्नः अपश्च कर्म ॥

॥ ६४९ ॥ रूपे जुट् च ॥ ४—२१६ ॥

आपेः रूपेऽर्थेऽसुन् ह्रस्वो जुट् च । अब्जः रूपम् ॥

॥ ६५० ॥ उदके नुं भश्च ॥ ४—२१७ ॥

आपेः उदकेऽर्थेऽसुन् ह्रस्वो नुम्, पस्य भश्च । आप्यते सर्वैः अम्भः ॥

॥ ६५१ ॥ नहेर्दिवि भश्च ॥ ४—२१८ ॥

नह्यते संबध्यते सर्ववस्तुभिः नभः ॥

---

1. GD omits 646—648.

॥ ६५२ ॥ इण आगोऽपराधे ॥ ४—२१९ ॥

असुन्नागादेशश्च । गच्छति प्रसादनेन आगः ॥

॥ ६५३ ॥ अमेर्हुक् च ॥ ४—२२० ॥

अमति रुजति अंहः ॥

॥ ६५४ ॥ रमेश्च ॥ ४—२२१ ॥

असुन् हुक् च । रमन्तेऽनेन शूराः रंहः ॥

॥ ६५५ ॥ [1]देशे ह्रश्च ॥ ४—२२२ ॥

मस्य हः । रमन्तेऽत्र रहः ॥

॥ ६५६ ॥ अञ्च्यञ्जियुजिभ्रस्जां कुश्च ॥ ४—२२३ ॥

अञ्च्यते ज्ञायतेऽनेनेति अङ्कः चिह्नम् ॥ अङ्गः अशक्तः ॥ योगः मनः ॥ भृज्जति तपति भर्गः तेजः ॥

॥ ६५७ ॥ भूरञ्जिमिथितॄपॄभ्यः कित् ॥ ४—२२४ ॥

भुवः आकाशः ॥ रज्यति रूषयति रजः ॥ मिथः ॥ तिरः ॥ पुरः ॥ त्रीण्यव्ययानि ॥

॥ ६५८ ॥ वसेर्णित् ॥ ४—२२५ ॥

वस्तेऽनेन वासः ॥

॥ ६५९ ॥ चन्देरादेश्च छः ॥ ४—२२६ ॥

चन्दति आह्लादयति वैदिकान् छन्दः ॥

1. G omits this sūtra and the commentary thereon.

२. P -ह्रश्च.

॥ ६६० ॥ पचिवचिभ्यां सुट् च ॥ ४—२२७ ॥

कुत्वषत्वे । पक्षः मासार्धम् ॥ वक्षः ॥

॥ ६६१ ॥ वहिहाधाभ्यश्छन्दसि ॥ ४—२२८ ॥

एभ्योऽसुन् तस्य सुट् च । "हो ढः" "षढोः कः" वक्षाः अनड्वान् ॥ हासाः कालाः ॥ धासाः पुरुषः ॥

॥ ६६२ ॥ इण आसिः ॥ ४—२२९ ॥

आयाः उदकम् ॥

॥ ६६३ ॥ मिथुनेऽसिः पुर्ववच्च सर्वम् ॥ ४—२३० ॥

पुंस्त्रीलिङ्गयोः धात्वोः असिः स्यात् न त्वसुन् । असुन्वच्च युडादिकार्यं स्यात् । यशाः ओजाः ॥

एवं व्याख्या कचिद्वृत्तौ यश आयाश्च पुंस्त्रियोः ।
न दृष्टा इति भीतिर्नः को वा शब्दान्तमीक्षते ॥

॥ ६६४ ॥ नञ्याहन एह च ॥ ४—२३१ ॥

नञ्पूर्वस्याहनेरसिः सोपसर्गस्य धातोः एहादेशश्च स्यात् । न आहन्ति गतो न पुनरागच्छति ईति अनेहाः कालः ॥

॥ ६६५ ॥ विधाञो वेध च ॥ ४—२३२ ॥

विधाञोऽसिः वेधादेशश्च । विदधाति विश्वं वेधाः ॥

॥ ६६६ ॥ नुवो धुट् च ॥ ४—२३३ ॥

गुणः । नौति नोधा ऋषिः ॥

---

१. G and A omit. इति.

॥ ६६७ ॥ गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ॥ ४—२३४ ॥

गतिकारकपूर्वस्यापि धातोरसिः, पूर्वपदप्रकृतिस्वरत्वं च स्यात् । कृदुत्तरपदप्रकृतिस्वरापवादः । सुयशाः । देवयशाः ॥

॥ ६६८ ॥ चन्द्रे मो डिच्च ॥ ४—२३५ ॥

चन्द्रपूर्वस्य माधातोः असिः स्यात् डिच्च । **चन्द्रमाः** ॥

स्वरः पूर्वपदोक्तः स्यात् चन्द्रोऽन्तोदात्त एव हि ।
आह्लादकः सन्मिमीते कालं [तस्मात्][2] **चन्द्रमाः** ॥

॥ ६६९ ॥ वयसि धाञः ॥ ४—२३६ ॥

वयोधाः अन्नम् ॥

॥ ६७० ॥ पयसि च ॥ ४—२३७ ॥

पयोधाः मेघः ॥

॥ ६७१ ॥ पुरसि च ॥ ४—२३८ ॥

पुरो निधीयते कार्येषु **पुरोधाः** पुरोहितः ॥ रेतसि च भोजः । रेतोधाः पिता ॥

॥ ६७२ ॥ पुरूरवाः ॥ ४—२३९ ॥

पुरु प्रभूतं रूयते धीयते सर्वैरिति **पुरूरवाः** ।

॥ ६७३ ॥ चक्षेर्बहुलं शिच्च ॥ ४—२४० ॥

शित्त्वात् ख्याञभावः । **चक्षः** चक्षुः । नॄनन्तु सर्वत्र पश्यति नृचक्षाः राक्षसः । बहुलोक्तेः सर्वेषूपपदेषु न ॥

---

१. G डित्

२. The word within brackets is omitted in all the mss.

॥ ६७४ ॥ उषः कित् ॥ ४—२४१ ॥

ओषति दीप्यते उषः ॥

॥ ६७५ ॥ दमेरूनसिः ॥ ४—२४२ ॥

दमूनाः उपशान्तः । "दमेरुनसिः" इति भोजः । दमुनाः अग्निः ॥

॥ ६७६ ॥ अङ्गिरा अप्सराः ॥ ४—२४३ ॥

अस्यन्तावेतौ । अङ्गति जानाति धर्मं अङ्गिराः ॥ अद्भ्यो निस्सृतवत्यः अप्सरसः ॥

॥ ६७७ ॥ ऊधः ॥ ४—२४४ ॥

वहति क्षीरं ऊधः ॥ भोजोक्तास्तु—रीयते क्षीयते रेपः पापम् ॥ विजहीते व्याप्नोति विहायः, रूपस्पर्शादीन् विजहाति वा ॥ ओकः गृहम् ॥ सुतरां काङ्क्ष्यन्ते सुमनसः पुष्पाणि ॥ पुरुदंसा इन्द्रः ॥

॥ ६७८ ॥ विदिभुजिभ्यां विश्वे ॥ ४—२४५ ॥

आभ्यां विश्व उपपदेऽसिः स्यात् । विश्ववेदाः[1] अग्निः ॥ विश्वभोजाः लोकपालः ॥

॥ ६७९ ॥ वशेः कनसिः ॥ ४—२४६ ॥

किस्वात् ग्रहिज्यादिना प्रसारणम् । इच्छति दैत्यहितं उशना ॥

इत्युणादिवृत्तौ प्रक्रियासर्वस्वे

चतुर्थः पादः ।



1. G विश्वदेवाः

॥ अथ पञ्चमः पादः ॥

॥ ६८० ॥ अदि भुवो डुतच् ॥ ५—१ ॥

अदित्याश्चर्येऽर्थेऽव्ययम् । आश्चर्यं भवतीति अद्भुतम् ॥

॥ ६८१ ॥ गुधेरूमः ॥ ५—२ ॥

परिवेष्ट्यते[१] वृतिभिः गोधूमः[२] ॥

॥ ६८२ ॥ मसेरूरन् ॥ ५—३ ॥

पाकेऽन्यथा परिणमति मसूरः धान्यभेदः ॥

॥ ६८३ ॥ स्थः किच्च ॥ ५—४ ॥

कित्त्वादाल्लोपः । स्थूरः अश्वादिपृष्ठम्[३] ॥

॥ ६८४ ॥ पातेर्डतिः[४] ॥ ५—५ ॥

पतिः । इदं प्रागुक्तेः हेयम् ॥

॥ ६८५ ॥ वातेर्नित् ॥ ५—६ ॥

डतिः[५] नित् स्यात् । वतिः[६] वायुः ॥

॥ ६८६ ॥ तृहेः क्नो[७] हलोपश्च ॥ ५—७ ॥

कित्त्वादगुणः । तृह्यते हिंस्यते पशुभिः तृणम् ॥

---

१. G परिष्यते.

२. G -मम्.

३. G पृष्ठः

४. G पातेरतिः

५. G तर्नि स्यात्.

६. G वाति.

७. A क्नक् P क्नुन्.

॥ ६८७ ॥ वृञ्लु[1]टितनि[2]तडितण्डिभ्य[3] उलच् ॥ ५—८ ॥

वरुलं वरेण्यम् ॥ लोटुलं न ज्ञातम् ॥ तनुलं मृदु ॥ तँ[4]डुलमपि न ज्ञातम् ॥ तण्डुलं[5] पूर्वमुक्तत्वात् हेयम् ॥

॥ ६८८ ॥ हृषिमङ्गिशङ्कि[6]चटिवन्दिभ्यश्च ॥ ५—९ ॥

॥ ६८९ ॥ कुमुलतुमुलमुकुलमञ्जुलादयश्च ॥ ५—१० ॥

॥ ६९० ॥ उत्तुरुधादयश्च ॥ ५—११ ॥

॥ ६९१ ॥ [7]कटिपटिमदिलविललिकल्यनिरटिलटितृभ्यो हल्[9] च ॥ ५—१२ ॥

॥ ६९२ ॥ [10]पुंलेः किच्च ॥ ५—१३ ॥

॥ ६९३ ॥ [11]कुलादिभ्यः कित् ॥ ५—१४ ॥

एतानि षट्सूत्राणि व्याख्यासु न दृष्टानि ॥

॥ ६९४ ॥ दंसेष्टटनौ न आ च ॥ ५—१५ ॥

दंसेष्टटनौ स्तो नस्य आत्वं च । तत्तत्कुरु इति भाष्यते[12] दासः । टटनो स्वरभेदः । टित्त्वात् ङीप् । दासी ॥

---

१. G लुति.

२. G and GD omit तडि.

३. G adds तण्डश्च.

४. G तण्डुलं.

५. G, P and GD तण्डुलः

६. G कति.

७. G वदि.

८. G तटि.

९. G टहल्.

१०. G पुरेः

११. G and GD कुला-

१२. G भाष्ये.

॥ ६९५ ॥ दंशेश्च ॥ ५—१६ ॥

टटनौ नस्यात्वं च । दशति मत्स्यादीन् दाशः ॥

॥ ६९६ ॥ सौ रमेः क्तः ॥ ५—१७ ॥

कित्त्वादनुनासिकलोपः । सुरतम् । निष्ठया [1]सिद्धेऽपि नामत्वादुक्तिरिति मन्यते ॥

॥ ६९७ ॥ दमेः पूर्वपदस्य च दीर्घः ॥ ५—१८ ॥

दमे द्योत्ये सुपूर्वस्य रमेः क्तः, सोदीर्घश्च । सुतरां रमयति सूरतः शान्तः ॥

॥ ६९८ ॥ पूञो यत् णुड्ढ्रस्वश्च ॥ ५—१९ ॥

पूञो यँत् स्यात्, तस्य णुट्, धातोः ह्रस्वश्च । पुनाति पुण्यम् ॥

॥ ६९९ ॥ स्रंसेः शिः कुट् किच्च ॥ ५—२० ॥

स्रंसेः यत् कित् स्यात् । तस्य कुट्, धातोः श्यादेशश्च । लम्बते शिक्यम् ॥

॥ ७०० ॥ अर्तेः क्युनुच्च ॥ ५—२१ ॥

रपर उत् । तस्य पूर्वस्य योरनः । उरणः मेषः ॥

॥ ७०१ ॥ हिंसेरीरन्नीरचौ ॥ ५—२२ ॥

हिंसीरः व्याघ्रः । स्वरे भेदः ॥

---

१. GD omits सिद्धे.

२. G णुक.

३. G उत्.

४ G क्युरुच.

॥ ७०२ ॥ उदि दृणातेरलचौ[1] पूर्व[2]पदान्त्यलोपश्च ॥ ५—२३ ॥

उत्पूर्वस्य [3]दृधातोः अल् अच् इति स्तः। उदो दकारलोपश्च। गुणः। उदीर्यते सरन्ध्रं भवति इति उदरम्। अलचोः स्वरभेदः॥

॥ ७०३ ॥ डित् खनेर्मुट्[4] चोदात्तः ॥ ५—२४ ॥

खनेर्डितावलचौ स्तः। धातोः उदात्तो मुट् च। डित्त्वात् टिलोपः। मुखम्॥

॥ ७०४ ॥ हन्तेश्च द्वे ॥ ५—२५ ॥

हनेरलचौ द्वित्वं च। आहन्यते जघनम्॥

॥ ७०५ ॥ अमेरसच्[5] ॥ ५—२६ ॥

अमसः व्याधिः। स्वरभेदात् पुनरुक्तिः॥

॥ ७०६ ॥ मुहेः खो[6] मूर् च ॥ ५—२७ ॥

मुहेः खः स्यात्, मूर् इत्यादेशश्च। मुह्यति मूर्खः॥

॥ ७०७ ॥ नहेर्हलोपश्च ॥ ५—२८ ॥

नह्यतेऽङ्गुलिषु नखः॥

॥ ७०८ ॥ महेश्च[7] ॥ ५—२९ ॥

मह्यन्तेऽत्र देवाः मखः॥

---

१. G -जलौ.
२. A and GD -दान्त-
३. G omits the root.
४. G रुद् च स चोदात्तः
५. G अमेः सन्.
६. A and GD ख.
७. G महः

॥ ७०९ ॥ शीङो निद् ह्रस्वश्च ॥ ५—३० ॥

शिरसि शेते शिखा ॥

॥ ७१० ॥ शाखा ॥ ५—३१ ॥

श्यतेः निपात्यते । वृक्षांशत्वेन तनुत्वात् शाखा ॥

॥ ७११ ॥ माङ उखः ॥ ५—३२ ॥

माङो धातोः खान्त उखाशब्दः । [3]मित्याप्यतेऽस्मिन् पाक्यं उखा ॥

॥ ७१२ ॥ कलेः फगस्योच्च ॥ ५—३३ ॥

कलेः फक् अत उत्वं च । कुल्फः गुल्फः ॥

॥ ७१३ ॥ गलेश्च ॥ ५—३४ ॥

"गल अदने" अद्यते तिरोधीयते पादे गुल्फः, गूढगुल्फत्वस्य गुणत्वात् । "शिफाशफकफादयः" इति भोजः । श्यतेः इत्वमत्वं च । तनुत्वात् शिफा वृक्षजटा ॥ तनूकरोति भुवं शफः खुरः ॥ रुद्धकण्ठः कायन्त्यनेन कफः ॥

॥ ७१४ ॥ स्पृशेश्वण्शुनौ पृ च ॥ ५—३५ ॥

स्पृशेः [6]श्वण्शुनौ प्रत्ययौ, पृ इति सर्वादेशश्च । णित्त्वात्[7] वृद्धिः । पार्श्वं गुणः ॥ पर्शुः पार्श्वास्थि ॥

---

१. G ऊखो मयच्.
२ G पान्त.
३. G निखा.
४. G कुलि.लिभ्यां.
५. A omits शुनौ पृ च.
६. A शुन्.
G शुनौ.
७. G णित्वं.

॥ ७१५ ॥ श्मनि श्रयतेर्डुन् ॥ ५—३६ ॥

श्म[1]न्युपपदे श्रीञो डुन् । श्मश्रु ॥

॥ ७१६ ॥ अश्व्रादयश्च ॥ ५—३७ ॥

अश्नुते व्याप्नोति नेत्रम् अश्रु । अस्यते मृज्यते अस्रु तदेव ॥

॥ ७१७ ॥ जनेष्टन् नलोपश्च ॥ ५—३८ ॥

जन्यते जटा ॥

॥ ७१८ ॥ अ[2]च् तस्य च जङ्घ च ॥ ५—३९ ॥

तस्य जनेः जङ्घ इत्यादेशः, अप्रत्ययश्च स्यात्, जङ्घा ॥

॥ ७१९ ॥ लूञो मनिन् ॥ ५—४० ॥

लोम[3] । प्राङ्निपातितत्वात् इदं हेयम् ॥

॥ ७२० ॥ क्लिशेरन् [4]लोलोपश्च ॥ ५—४१ ॥

क्लिश्यतेऽनेन केशः ॥

॥ ७२१ ॥ हन्तेः शरीरावयवे द्वे च ॥ ५—४२ ॥

अ[5]प् च स्यात् । जघनम् । प्रागुक्तेः हेयम् ॥

॥ ७२२ ॥ फलेरितजादेश्च पः ॥ ५—४३ ॥

पलित[6]म् । एतच्च हेयम् ॥

---

१. G omits स्मनि........डुन्.
२. GD omits अच्.
३. A and G omit लोम.
४. A ल्लोप-
५. G अवच्.
६. G and GD पलितः

॥ ७२३ ॥ कृञादिभ्यः संज्ञायां वुन् ॥ ५—४४ ॥

क्रियते करकः ॥ दरकः सुवर्णकारः ॥ पिटकः पात्रभेदः । बदरपिटकेति[1] भाष्योक्तेः न गुणः । अत्र भोजः—“ कृसृभृवृस्तुकुक्षुचरिचटिचणितम्यविदेविकनिमनिपचिमचिमशिक्षारिकुरिवृतिवल्लिमल्लिसल्यलिभ्यो[2] वुन् ” । सरकः मद्यभेदः ॥ भरकः गोण्यादिः ॥ वरकः वाजसनेयभेदः ॥ स्तूयते स्तबकः ॥ स्थाधातोः प्रागुक्तः ॥ कवकः अभक्ष्यद्रव्यभेदः ॥ क्षपकः राजसर्षपः ॥ चरकः मुनिः ॥ चटकः पक्षी ॥ चणकः मुनिः ॥ तमकः व्याधिः[3] ॥ अवकः ॥ देवकः राजा ॥ दीप्यते कनकम् ॥ नशिमन्योरेत्वं वाच्यम् । मेनका । नशेस्त्वनेशदित्युक्तम् ॥ पेचकः हस्तिजघनम् ॥ मेचकः वर्णभेदः ॥ “ मनिपचिमचां नाम्नि ” इति भोजोक्तेरेत्वम् । मशशब्दे मशकः ॥ क्षारकः बालमुकुलम् ॥ “कुर शब्दे” ध्वनन्त्यत्र भृङ्गाः कोरकः प्रौढमुकुलम् ॥ वर्तिका प्रागुक्ता ॥ संव्रियते[4] भस्त्रया वल्लकी ॥ धारयन्त्यन्नादि मल्लकः शरावः ॥ सल्लकी वृक्षः ॥ भूषयति मुखं अलकः ॥ “कौरुरुण्डिरण्डिभ्यः” कुवन्त्यत्र[5] भृङ्गाः कुरवकः । कुरव इत्यपि दृष्टम् ॥ कुरुण्डकः[6] पर्णगुच्छः । कुरण्डकः[7] स एव ॥ “कुटेः नुं च वा ” आवृणोति वृक्षं प्रकोष्ठं च कण्टकः कटक इति ॥

॥ ७२४ ॥ जनेरष्ठश्च[8] ॥ ५—४५ ॥

ठोऽन्तादेशः । जायतेऽस्मात् जठरम् ॥

॥ ७२५ ॥ पचिर्वदिभ्यां[9] इञ्च ॥ ५—४६ ॥

---

१. G विटकेति.
२. G -किभ्यो.
३. G मुखव्याधिः
४. G संप्रीयते.
५. G कुप-
६. कुरुण्टकः
७. कुरण्टकः
८. A ठ च.
९. G मनि.

अत इत्वम्, अन्त्यस्य ठश्च । पचन्त्यस्मिन् पिठरः ॥ वदत्यबद्धं विठरः मूर्खः ॥

॥ ७२६ ॥ वचिमनिभ्यां चिद्वा ॥ ५—४७ ॥

आभ्यामरश्चिद्वा स्यात्, ठत्वं च । वठरः[1] मूर्खः । मठरः ज्ञानी ॥

॥ ७२७ ॥ ऊर्जिद्दणातेरलचौ पूर्वपदान्तलोपश्च ॥ ५—४८ ॥

ऊर्जशब्दपूर्वात् दृणातेः अल् अच् इति स्तः[2] । ऊर्जो[3] जलोपश्च । ऊर्दरः कुसूलः । अलचः स्वरे भेदः । आद्युदात्तस्तु दृष्टः ॥

॥ ७२८ ॥ कुदरादयश्च ॥ ५—४९ ॥

कुदरः हिंस्रः ॥ मृश्रोः[4] दुक् श्रोः ह्रस्वश्च । मृदरः[5] मृत्युः ॥ शदरः सर्पः ॥ श्रो गुणे रस्य बः । शृणाति शबरः ॥ "बद स्थैर्ये" बदरः ॥

॥ ७२९ ॥ हन्तेर्युजाद्यन्तयोः[6] घत्वतत्वे च ॥ ५—५० ॥

घतनः बह्वाशी ॥

॥ ७३० ॥ क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च ॥ ५—५१ ॥

क्रान्तुः प्रैषणिकः ॥ गान्तुः पथिकः ॥ क्षान्तुः पिता ॥

॥ ७३१ ॥ [7]गृहेः कन् ॥ ५—५२ ॥

कित्त्वादगुणः । गृहति स्वतेजसा शत्रून्[8] गृहः स्कन्दः ॥

---

१. G omits ठः
२. G adds स्यात्
३. G omits ऊर्जो.......कुसूलः
४. A मिश्रोः
५. G मुदरो
६. G आद्यन्त-
७. G गुहेः
८. GD omits शत्रून्.

॥ ७३२ ॥ करोतेः द्वे च ॥ ५—५३ ॥

[1]चक्रम् ॥

॥ ७३३ ॥ विषेर्व्याप्ति[2]क्रि[3]कर्मणि ॥ ५—५४ ॥

व्याप्तिक्रियार्थात् विषेः किन् । देहं व्याप्नोति विषम् ॥

॥ ७३४ ॥ हर्यतेः कन्यन् हिर् च ॥ ५—५५ ॥

"हर्य गतौ" सर्वत्र व्याप्नोति उपयाति द्रवति वा हिरण्यम् ॥

॥ ७३५ ॥ कृञः पासञ् ॥ ५—५६ ॥

कार्पासः । "कृञः पासः" इति कार्पासो वृक्ष इति केचित् ॥

॥ ७३६ ॥ [4]कठिचकिभ्यामोरः ॥ ५—५७ ॥

कठोरः[5] ॥ चकोरः । पूर्वं चिदुक्तः ॥

॥ ७३७ ॥ [6]जनेस्तो रश्च ॥ ५—५८ ॥

अन्त्यस्य रत्वम् । जर्तः योनिः । जीर्यतेः तनि प्रागुक्तः ॥

॥ ७३८ ॥ डोऽट् च ॥ ५—५९ ॥

जनेर्डःस्यात्, अडागमश्च । जायत इति अजः[7] छागः ॥

॥ ७३९ ॥ ऊर्णोतेः डः ॥ ५—६० ॥

ऊर्णा छागादिलोम ॥

१. G चक्रम्.
२. G व्याप्तिः
३. G क्रियत्वात्
४. G कचेकिभ्या-
५. G omits this word.
६. G जनेस्तु
७. A and G cmit अजः

॥ ७४० ॥ दधातेर्यन्नुट् च ॥ ५—६१ ॥

धार्यते पोष्यते वा धान्यम् ॥

॥ ७४१ ॥ जीर्यतेः क्रिन् रश्च वः ॥ ५—६२ ॥

जॄधातोः क्रिन्, ॠत इत्त्वे कृते [1]रस्य वत्वं च स्यात्। जिव्रिः कालः। अत्र वान्तस्य "हलि च" इति दीर्घो बाहुलकान्न[2] स्यात् ॥

॥ ७४२ ॥ ऋजेः कीकन् ॥ ५—६३ ॥

ऋजीकः ऋषिः ॥

॥ ७४३ ॥ अर्भकपृथुकपाका वयसि ॥ ५—६४ ॥

एते वयसि निपात्यन्ते। अर्हति लालनं अर्भकः[3] ॥ प्रथते वर्धते पृथुकः ॥ रक्ष्यते पाकः। पाकस्यार्थभेदादुक्तिः[4] ॥

॥ ७४४ ॥ अवद्यावमाधमार्वरेफाः कुत्सिते ॥ ५—६५ ॥

[[6]अवद्यम् ॥ अवमम् ॥ ऊर्वा ॥ रेफः ॥]

॥ ७४५ ॥ चतेरुरन् ॥ ५—६६ ॥

अकार उक्त्यर्थः। चैतुर्[7]श दः ॥

वाद्धाराविति रेफान्तौ भोजेनात्र निपातितौ।
सहेः क्विप् च षषादेशोऽप्युक्तः [8]षट्शब्दसिद्धये ॥

॥ ७४६ ॥ लीङ्रीङो ह्रस्वश्च[9] पुक्तरो श्लेष्मकुत्सनयोः ॥ ५—६७ ॥

---

१. G रस्वचत्वं
२. G -कं न
३. G मदकः
४. G दुक्तिः
५. G adds माद्य
६. The words within brackets are ommitted in all the mss.
७. GD शतुःशब्दः
८. G षन् छन्दसिद्धये
९. G omits ह्रस्वश्च

[1]लीङ्रीङोः क्रमादर्थद्वये तर इति प्रत्ययौ ह्रस्वः पुक् च स्युः । लिप्रं श्लेष्मा ॥ रिप्रं कुत्सितम् ॥

॥ ७४७ ॥ क्लिशेरीचोपधायाः कन् लोपश्च लो नाम् च[3] ॥ ५—६८ ॥

क्लिशेः कन्नुपधायाः स्यादीत्वम्[4] लस्य च लुप् ततः ।
नामागमश्च मध्ये स्यात् कीनाशः क्लेशनात् यमः ॥

॥ ७४८ ॥ अश्नोतेराशुकर्मणि वरट् च ॥ ५—६९ ॥

अश्नोतेराशुत्वे द्योत्ये वरट्, उपधाया ईत्वं च । आशु स्वचिन्तितार्थं [5]प्राप्नोति ईश्वरः । टित्त्वात् ईश्वरी ॥

॥ ७४९ ॥ आप्नोतेः क्विप्[6] ह्रस्वश्च ॥ ५—७० ॥

अप्शब्दः ॥

॥ ७५० ॥ अपिसर्तेरसिन् ॥ ५—७१ ॥

अप्सराः । [7]पूर्वं अस्यन्त इति भेद ॥

॥ ७५१ ॥ सिचेः संज्ञायां कन् नुंहौ च ॥ ५—७२ ॥

सिचेः नाम्नि कन् स्यात् नुमागमोऽन्त्यस्य हश्च । सिञ्चति रुधिरेणाङ्गं भुवं वा सिंहः ॥

॥ ७५२ ॥ व्याङि घ्रातेश्च जातौ ॥ ५—७३ ॥

कनः कित्त्वादालोपः । भक्ष्यान्वेषणार्थं व्याजिघ्रति व्याघ्रः ॥

---

१. A and GD add पुष्करौ श्लेष्मकुत्सनयोः । लीङ्रीङोः
२. G and GD रीचो-
३. A omits च.
४. G यस्य
५. G omits प्राप्नोति.
६. G क्विप्रसश्च.
७. G मूकमस्यते.
८. G अस्य ह्रस्वश्च

॥ ७५३ ॥ छापूखडिभ्यो गक् ॥ ५—७४ ॥

छिद्यते यज्ञे छागः ॥ पुनात्यास्यं पूगः ॥ "खड भेदने" खड्गः ॥

॥ ७५४ ॥ हन्तेरः घुर् च ॥ ५—७५ ॥

[1]हन्तेरप्रत्ययो घुर् इत्यादेशश्च स्यात् । घोरः ॥

॥ ७५५ ॥ गृहेरणिः ॥ ५—७६ ॥

न गृह्यते रसोऽनया ग्रहणिः व्याधिः ॥

॥ ७५६ ॥ तनोतेः डउः सन्वच्च ॥ ५—७७ ॥

सन्वत्वात् तितन् इति स्थिते टिलोपः । विस्तीर्णत्वात् तितउ शूर्पः । डउः इत्युक्तिसामर्थ्यात् न सन्धिः ॥

॥ ७५७ ॥ प्रथेरमच् ॥ ५—७८ ॥

अन्येभ्योऽधिकं [2]प्रख्यायते प्रथमः ॥

॥ ७५८ ॥ चरेश्च ॥ ५—७९ ॥

[3]अन्ते चरति चरमः ॥

॥ ७५९ ॥ पुरश्च ॥ ५—८० ॥

पॄधातोरप्यमच् । पालयत्यन्यान् पूरयति वाभीष्टं परमः ॥

॥ ७६० ॥ अर्तेर्भुक्षिनक् ॥ ५—८१ ॥

अलावितौ । ऋभुक्षिशब्दः इन्द्राख्यः ॥

---

१. A घुरश्चप्रत्ययो.

२. G प्रथते.

३. GD omits अन्ते.

॥ ७६१ ॥ मङ्घेरञ् लोपश्च ॥ ५—८२ ॥

मघा नक्षत्रम् ॥

॥ ७६२ ॥ खनेर्डलः ॥ ५—८३ ॥

खनति तुदति खलः ॥

॥ ७६३ ॥ गवि गन् धृञो[1] वः ॥ ५—८४ ॥

[2]गोपूर्वाद्धृञो वः स्यात्, गोश्च गन्भावः । गवि स्वर्गे [3]ध्रियतेऽवतिष्ठते गन्धर्वः । गवि गानरूपायां वाचि तिष्ठति वा । भुवि तिष्ठतीत्यश्वोऽपि ॥

॥ ७६४ ॥ दम्भेस्सिन् मक् च ॥ ५—८५ ॥

धातोर्मगादेशः । दभ्नाति हिनस्त्यङ्गं मक्षिका ॥

॥ ७६५ ॥ दमेरुभिदुगुश्चोपधायाः ॥ ५—८६ ॥

दमयति रिपून् दुन्दुभिः ॥

॥ ७६६ ॥ दिवेर्डिवः ॥ ५—८७ ॥

डित्त्वाट्टिलोपः । इकार इत् । दिव्शब्दः ॥

॥ ७६७ ॥ मङ्गेरलच् ॥ ५—८८ ॥

प्राप्यते सुखमनेन मङ्गलम् ॥

इत्युणादिवृत्तौ प्रक्रियासर्वस्वे

॥ पञ्चमः पादः ॥



---

१. A and G. गन्धृञो. ३. G ध्रियते.

१. G गोपूर्वस्य.

अथ वर्णानीतिः

अथ वर्णा आनीयन्ते—

अवतेर्विड्लोपो दीर्घश्च वा ॥ १ ॥

विटः सर्वलोपे[1] धातोर्वलोपे[2] च कृते दीर्घविकल्पात् अ आ इति सिद्धम् ॥ अवति विश्वं अः विष्णुः ॥

इष्युषिभ्यां क्विब्व्यञ्जनलोपश्च ॥ २ ॥

दीर्घश्च वा स्यात् । [illegible] । इ ई उ ऊ ॥ इच्छन्त्यनेन इः[3] कामः ॥ ओषति दहति विश्वं उः शिवः ॥

अर्तिकिरत्योः कलोपश्च ॥ ३ ॥

[4]अनेक्याः [5]क्विप् कॄधातोः कलोपश्च । ऋ ॠ ॥ क्विपः[6] पित्त्वेऽपि बाहुलकादृधातोः[7] न तुक् । अर्यते गम्यते देवैः ऋॠशब्दोदितौ ॥

तयोरेव ऌ ॥ ४ ॥

तयोः ऋ ॠ इत्यनयोः ऌत्वं च स्यात् । आन्तरतम्यादेकद्विमात्रौ । [8]ऌ ॡ । ऌवर्णस्य दीर्घाभावो लिपिपाठादन्यत्रेत्यत्रेदं प्रमाणम् ॥

इणो गुणवृद्धी ॥ ५ ॥

ए ऐ ॥

ऊहेर्व्यञ्जनलोपश्च ॥ ६ ॥

गुणवृद्धी च स्तः । ओ औ ॥

---

१. G लोपो.

२. G र्वा.

३. A omits इः.

४. A omits अनेक्याः........ पश्च.

५. G क्विक्कृधातोः.

६. P omits क्विपः.

७. G and A ददधातोः.

८. G ऌऌ् अवर्णादीर्घ.

[1]अमेर्मुनौ च ॥ ७ ॥

अमेर्व्यञ्जनलोपो मुसौ प्रत्ययौ च स्तः। मुस् इति शेषे सस्य रुत्वविसर्गौ। अं अः ॥

कनिखनिगमिघसिङुङ्[2]भ्यो डः[3] ॥ ८ ॥

डित्त्वात् टिलोपः। क ख ग घ ङ ॥ कनति दीप्यते कः ब्रह्मादिः ॥

चमिछमिजन्युज्झिमिदेरुजलोपो ञ च ॥ ९ ॥

एषां डः स्यात्। [4]उज्झेरुकारजकारलोपौ मिदेर्मकारस्य[5] आदेशश्च। च छ ज ॥ उज्झेर्झकारमात्रस्य शिष्टत्वात् अजभावाट्टिलोपाप्रसङ्गः[6]। झ ॥ मिदेर्मस्य ञत्वे टिलोपे च कृते ञ ॥

ट्वलिठ्वलिड्वलिढौकृपणिभ्यो वपलोपश्च ॥ १० ॥

एभ्यो डो वलोपश्च। पणेः पशब्दलोपश्च स्यात्। ट ठ ड ढ ण ॥

तनिथुडिदमिधनिमिभ्यश्च ॥ ११ ॥

डः स्यात्। त थ द ध न ॥

[8]पातिफक्कतिबृहिभमृङ्भ्यश्च ॥ १२ ॥

प फ ब भ म ॥

---

१. G अमेर्म्मुसौ.
२. G and A ङुङु.
३. G डः.
४. G उर्झेः.
५. G नकारस्य.
६. G प्रसङ्गः.
७. G ठ्लिव.
A टलिव-.
८. G and A फति.

यातिरातिलातिवातिभ्यश्च ॥ १३ ॥

य र ल व ॥

शमिमुषिसहाभ्यो मुलोपश्च ॥ १४ ॥

एभ्यो डो मुषेर्मुलोपश्च । श ष स ह ॥

कायतिपिबत्योः ᳵकᳶपौ च ॥ १५ ॥

अनयोर्डः । एतावादेशौ च स्तः । ᳵक[1] ᳶप ॥

॥ इति वर्णनीतिः ॥



---

1. G omits ᳵ क ᳶ प.

[1]उक्तेषु प्रत्ययेष्वेव[2] प्रकृत्याधिक्यगोचराः ।
भोजोक्तयः पुरा प्रोक्ताः अवशिष्टानथ ब्रुवे ॥

"कायः किः" काकिः स्वरदोषः ॥ "[3]वर्धेरेकिः" [4]छिनत्ति वर्धकिः तक्षा ॥ "कौतेर्डिखिः" किखिः शिशुः क्रोष्टा । दीर्घान्त इति हरः ॥ "श्रिञो ढिः[5]" गुणः । श्रेढिः गणितव्यवहारः ॥ "चमेरुच्चार्तः[6]" चुण्ढिः क्षुद्रवापी ॥ "मुषेः कित्[7] उनट् च" [8]मुषेः ढिः कित्स्यात् उनडागमश्च । "मुष खण्डने" मुषुण्ढिः आयुधम् ॥ "वस्यर्तिभ्यामातिः" वसातयः जनपदः ॥ अभिगच्छति अभिगम्यते वा युद्धेषु अरातिः ॥ "अभौ यामाभ्याम्" अभियातिः अभिमातिश्च शत्रुः ॥ मातेरपि । [9]गच्छति वृत्त्या । प्राग्वदर्थः ॥ "यजो यश्च" यजति देवान् ययातिः ॥ "तनेर्डिथिः" [10]प्रतिपक्षं तायते तिथिः ॥ "उषेरधिः" गुणः । उष्यते आतपैः ओषधिः ॥ "विदेः किद्रट् च" ज्ञायते विचार्यते वा वैद्यैः विद्रधिः व्याधिः[11] ॥ "वल्यर्तिकृतिभ्यो रिः" संवृणोति तरुं [12]वल्लरिः लता ॥ [13]अररिः कवाटम् ॥ कर्तरीः खण्डनी ॥ "धूञ्मूमाङ्शालिभ्यो लिग्लिणौकुलिञ्मलिच्" धूञो लिक् । धूयते वातेन धूलिः ॥ मूञो लिण् । बध्यते मौलीः ॥ माङ औकुलिच् । मौकुलिः काकः ॥ शालेर्मलिच् । शाल्मलिः वृक्षः ॥ "गोपादिष्वनेरसिः" गोपानसिः वलभी ॥ एकानसिः उज्जयिनी ॥ वाराणसिः काशिः ॥ अतः "पूर्वपदात्संज्ञायाम्" इति णः । अस्य णत्वस्यासिद्धत्वात् चित्तानसिः जलचरः ॥ "व्रियो हिक्" "व्री वरणे" आव्रियते वृतिभिः याच्यते व्रीहिः ॥ "शलेरङ्कुः" शलङ्कुः मुनिः ॥ "शलेराटुच्" शलाटुः कोमकफलम् ॥

---

१. G adds रूढः
२. G प्वयं
३. G कर्धतेरकिः.
४. G omits छिनत्ति.
५. A and P डिः.
६. G चाठः.
७. G नित्.
८. G omits मुषेः डिः कित्.
९. G गतिप्रीत्या.
१०. G omits the commentary.
११. G omits व्याधिः.
१२. G वल्लतिः.
१३. A अरतिः.

"तनिमनिकणिभ्यो डुः" तण्डुः नन्दीश्वरः ॥ मण्डुः मुनिः ॥ कण्डुः वेदना ॥ "पनेर्दीर्घश्च" स्तूयते पाण्डुः ॥ "मृपल्योः कनुगानुकौ च" आभ्यां डुः एतावागमौ च स्तः। मृकण्डुः मुनिः ॥ पलण्डुः लशुनम् ॥ "गमेः कित्" कित्त्वात् "अनुदात्तोपदेश" इति मलोपः। गच्छति चिकित्सया गडुः ॥ "यमेर्दुक्" प्राग्वन्मलोपः। यच्छति रिपून् यदुः ॥ "धुञो नुट् च" धुन्धुः असुरः ॥ "जीवेरदानुक्" अस्यादानुक्। जीरदानुः पर्जन्यः ॥ "अभ्रेरमुः" सम्यगभ्रति अभ्रमुः दिक्करिणी ॥ "कर्केरारुः" कर्कारुः कूश्माण्डः ॥ "ओर्वेरादेरुदेतौ च" उर्वारुः ऐर्वारुः द्वौ चिभिटीभेदौ ॥ "तुम्बेरुरुः" "तुम्बि अदर्शने" सञ्चारशीलत्वात् क्वापि न चिरं दृश्यते तुम्बुरुः ॥ "कन्देरत उच्च" कन्दुरुः सलकीनिर्यासः ॥ "चमेरूरुः" चमति तृणादि चमूरुः मृगः ॥ "शीङ्पीङ्शलिभ्यो लुलुगालुचः" एभ्यः क्रमात् लुः लुक् आलुच् इति स्युः। शेलुः पीलुश्च वृक्षभेदौ ॥ शलालुः गन्धद्रव्यम् ॥ "ग---------------" केन जलेन मण्डयते कमण्डलुः ॥ गृहलुः मुनिः ॥ "गुड रक्षणे" रक्षति वातात् गुलुगुलुः ॥ "तरतेरक्षुः" तरति लङ्घयति पैशुं तरक्षुः व्याघ्रः ॥ "प्रीकाभ्यां कैङ्गुजुगुक्तः" कित्त्वादियङाल्लोपश्च। प्रियङ्गुः कङ्गुश्च धान्यभेदौ ॥ "कशेश्चिपुगुक्तः[५]" प्राप्यते कशिपुः ॥ "तुवः किकन्" अनावितौ। "ि ----। उवङ् ॥ तुविक् पुत्रः। ककारान्तोऽयम् ॥ "ईडेरीबडिह्रस्वश्च" इडविड् विश्रवाः ॥ "भातेर्डवतुः" अनेन सर्वादिगतभवच्छब्दः[६] ॥ "उदके श्वयतेर्डितिः" संज्ञात्वादुदकस्योदादेशः। उदकेन वर्धते उदश्वित् तक्रम् ॥ "पातेः कृथिः" कित्त्वादालोपः। पृथिति थान्तः। पृथु नृपाख्या ॥ "ककुप्त्रिष्टुबनुष्टुभः" एते भान्ताः ॥ "अनसि वहेः क्विब् डश्चानसः" अनसोऽन्त्यस्य डित्त्वम्। क्विपः कित्त्वाद्वहेः प्रसारणम्। अनडुह्शब्दः ॥ "क्रोकोरो लैश्च वा" कृधातोरङ्कप्रत्ययो गुणे कृतेरस्यलत्वं च स्यात्। विक्षिप्यन्ते वस्तून्यस्मिन् करङ्कः ॥ समुद्गः कीर्यते वस्त्रादौ कलङ्कः ॥

---

१. G omits एवारुः.
२. G कनेस्त.
३. G तरं.
४. A कङ्गुजूक्तः.
५. A चिपूक्तः.
६. G च्छन्दः.
७. G लोश्च.
A लपश्च.

"शालपाकाभ्यः कित्" कित्त्वादाल्लोपः। रान्त्यस्मै दयालव इति रङ्कः अशक्तः ॥ आदीयते राक्षसैः लङ्कः ॥ पायति शुष्यत्यातपेन पङ्कः ॥ ध्वनति कङ्कः ॥ "कलेरविङ्कः" कलविङ्कः पक्षी ॥ "क्रमेरेलकः" क्रमेलकः[1] करभः ॥ "कनेरीनकः" शोभते कैनीनिका[2] तारका ॥ "हरुहिपिण्डिभ्य ईतकः" हरीतकः रोहीतकः पिण्डीतकश्च वृक्षाः ॥ "कुषेः कित्" कुषीतकः ऋषिः ॥ "चण्डिभल्लिभ्यामातकः" चण्डातकं नर्तक्यादिवासः ॥ भल्लातकः वृक्षः ॥ "श्लेष्मातकाम्रातकाम्लातकपिष्टातकादयः" पिष्टातकः पटवासः। अन्ये वृक्षाः। "पिष्टातकः" इत्येवामरः। आयुक्तेः कोशातक्यादि ॥ "जनेर्धः" इत्यधिकृत्य—"तृणातेः कित्" "ॠत इत्" "हलि च" इति दीर्घः। दीर्घः ॥ "सर्तेरघच्" सरघा मधुमक्षिका ॥ "उचेश्चक्" उच्चः ॥ "कवेरचच्" कव्यते [3]ग्रथ्यते कवचम् ॥ "कृमेः कच् मस्य कः[4]" क्रामति वृक्षोदरं क्रकचः ॥ "मृङ उचच्" म्रियते व्यथतेऽनेन मरिचम् ॥ "नमेर्डीचच्[5]" नीचः ॥ "लिषिलष्योरुचश्च[6]" षस्य कः। लिकुचः लकुचश्च वृक्षः ॥ "गुडेरूचच्" रक्षति रोगेभ्यो गुडूची अमृता ॥ "चिम्योर्डोचच्" चीयते वर्धते चोचः पनसः ॥ मीयते प्रक्षिप्यते भूमौ मोचा[7] रम्भा ॥ "डञ्चच" चिम्योः डञ्चच् स्यात्[8]। चञ्चा तृणपुरुषः ॥ मञ्चः ॥ "वियो जक्" जायतेऽस्मात् बीजम् ॥ "पुवो नुग्घ्रस्वश्च" पुञ्जः ॥ "कुवो बुक् च वा" कुधातोः जक्प्रत्ययः नुक् च बुक् च स्यात्। कुवन्ति पक्षिणोऽत्र कुञ्जः ॥ कूयते सर्वैः परिहस्य कथ्यते कुब्जः ॥ "कुलेरिजक्" सस्त्यायति व्रीह्यायत्र कुलिजम्[9] मानम् ॥ "कृञोऽञ्जक्" करञ्जः तरुः। रलयोरभेदात् कलञ्जः ॥ "मुर्वेरजग्लोपश्च" वस्य लोपः। बध्यते चर्मणा मुरजः ॥ "कुटजोटचवलजबल्बजादयः" कुटजः तरुः ॥ वटयते वेष्टयते पर्णैः उटजः ॥ गच्छन्त्यनेन वलजं द्वारम् ॥ बलेर्बुक्[10]। बल्बजाः काशाः ॥ "झमेर्झः" "झमु

---

१. G omits क्रमेलकः.
२. G कनीकिमी कान्दारका
३. G ग्राह्यते.
४ G मकः.
५. G डायचू.
६. G रुक्तश्च. P रुचश्च.
७. P मोचा चोररम्भा.
८. G and P omits स्यात्.
९. G कुलिजः.
१०. G adds च.

अदने" झमति उष्णं झञ्झः सशीकरो मेघवातः ॥ "किरतेराट[1]ग्लश्च वा" विक्रयति क्रय्याणि किराटः वणिक् ॥ किलाटः वृक्ष[2]भेदः ॥ "शृङ्गाटकवाट-ललाटविराटप्रपु[3]न्नाटादयः" शृङ्गाटः चतुष्पथः ॥ कपेर्वश्च । कवाटम् ॥ शोभते ललाटम् ॥ प्रपुन्नाटः उद्भिद्भेदः ॥ "चिरेरि[4]टच् भश्च" "चिरि हिंसायाम्" द्व्यज्धातुः । अ[5]न्त्यस्येकारस्य भत्वम् । चिर्भिटी लताभेदः ॥ "डिण्ट[6]न्" चिरेः डिण्ट[7]न्प्रत्ययः स्यात् । डित्त्वादन्त्येकारलोपः । हिनस्ति मृ[8]द्गाति युवानं चिरण्[9]टी प्रौढां[10] । "वयसि प्रथमे" इति ङीप् । चिर[11]ण्डीति तु दृश्यते ॥ "खञ्जेररीटः" खञ्जरीटः पक्षी ॥ "वृणातेरुटच्" वरुटः अन्त्यजातिः ॥ "नर्कुटमुकुटकुक्कुटादयः" नृत्यति नर्कुटः वन्दी ॥ आमुच्यते शिरसि मुकुट किरीटः ॥ आदत्ते भक्ष्यं कौति वा कुक्कुटः । आद्युक्तेः मकुटस्थपुटादिकम् ॥ "बन्धेः कूटन्" कित्त्वान्नलोपः । बध्नाति हृदयं व[12]धूटी युवतिः । प्राग्वत् ङीप् ॥ "दरिद्रो दुर् च" दुर्युपपदे दृणातेः कूटन् दुरादेशश्च स्यात्। दुर्दुरूटः दुर्मुखः । दुरि [13]दुलेः कुटनि रलयोरभेदात् रत्वे दुर्दुरुटः इति हरः ॥ "चपेरेटच्" चपेटः चपेटा वा हस्ततलम् ॥ "ग्रो णित्" गोरटः मुनिः ॥ "करोतेराटच्" करोटं भाजनभेदः ॥ "बकोटाक्षोट[14]कर्कोटादयः" क्रमात् बकवृक्षनागाः ॥ आद्युक्तेः शाकोटः तरु[15]ः ॥ "लगिग्रोरुडच्" लगति हस्ते लगुडः यष्टिः ॥ गिरति सर्पान् गरुडः ॥ "व्याडनीडक्रोडकहो-डादयः" व्ययति सुखं व्याडः दुश्शीलः ॥ नितरामीयते खगैः नीडम् ॥ कीर्यते हारायत्र क्रोडा बाहुमध्यम् । विक्षिपति भुवमिति वराहोऽपि ॥ अन्त्य ऋषिः ॥ "इण्शोवेणिभ्यो ण उक्तः" एति वनेषु एणः ॥ तनूकरोति शाणः ॥

---

१. G टग्लग्लोपश्च
२. G वक्ष्य-
   P भक्ष्यः
३. G. प्रयुन्नाट-
४. G निटच्.
५. G and A अन्त्यत्वात्
६. G डिण्डन्
७. G डिण्डन्.
८. G omits मृद्गाति
९. G चिरण्डी.
१०. P omits प्रौढा.
११. A, P and GD चिरण्टी.
१२. G वधूः तटी
१३. G कुलेः
१४. G omits -क्षोट... यष्टिः in the commentary on the next sūtra.
१५. A omits तरुः

कृष्णवेण्णा नदी ॥ "हूणभ्रूणक्षूणघृणादयश्च" ह्वयति हूणः म्लेच्छः ॥ भ्रियते भ्रूणः गर्भः ॥ क्षूयते उद्घोष्यते क्षूणः अपराधः ॥ क्षरत्यार्द्रीभवत्यनया हृदयं घृणा ॥ आयुक्तेः ———————ः ॥ "अङ्गितङ्गिकङ्किमङ्गिकृपिवृषिभ्यो णक्" अङ्गन्त्यत्र अङ्गणम् अजिरम् ॥ तङ्गणः जनपदः ॥ चलति हस्ते कङ्कणः ॥ मङ्गणः ऋषिः ॥ "कृप कृपायाम्" कृपाविषयः कृपणः ॥ वृषणः ॥ "कृकण-कुङ्कणत्रपणोल्बणवङ्क्षणादयश्च" कृकणः मुनिः ॥ कुङ्कणः जनपदः ॥ त्रपणः देशः ॥ वलेर्वस्योत्वं बुक् च । उल्बणमिति लकारमाह नाथः । "उत्पूर्वात् बणेरच्" इति तकारमाह माधवः ॥ वञ्च्यते छाद्यते वङ्क्षणः ऊरुमूलसन्धिः ॥ आयुक्तेः ज्योतिरिङ्गणः । खुङ्खुणः हरखट्वाङ्गः ॥ "कृपिविषिभ्यामाणक्" कल्पते शक्नोति[4] हन्तुं कृपाणः ॥ विषाणः ॥ "पर्याणकल्याणादयश्च" पर्येति पृष्ठं पर्याणः ———— ॥ कलयति सुखं कल्याणम् ॥ आयुक्तेः द्रेक्खा-णादि ॥ "गादाभ्यामेष्णक्" रौत्रिगेष्णः रङ्गोपजीवी ॥ सुगेष्णा किन्नरी ॥ चारुदेष्णः सात्यभामेयः ॥ सुदेष्णा विराटपत्नी ॥ "[6]ह्विञ ईतङ्" हारीतः पक्षी ॥ "शकेरुन्तः" इत्यधिकृत्य—"कषेर्डित्" कषति हिनस्ति कुन्तः ॥ "कलिमलिभ्यामूतक्" कुलूतः जनपदः ॥ मयूता वसतिः ॥ "कम्पेरोतो नलोपश्च" वनेषु चरति कपोतः ॥ "आङि स्फायेर्डित्" आस्फोता ओषधिः ॥ "ककिमकिभ्यामन्दन्" ककन्दः मकन्दश्च राजा ॥ "मुचेर्डैकुन्दकुकुन्दौ" मुञ्चन्ति संसारात् मुकुन्दः ॥ मुचुकुन्दः नृपः ॥ "यमेरुन्दन्" यमुन्दः क्षत्रियः ॥ "ककेरुन्दन् णिच्च वा" लोलति ककुदः स्कन्धपिण्डम् ॥ काकुदं तालु ॥ "अर्तिबुदोर्बुक् च" अर्बुदं संख्या ॥ बुद्बुदम् ॥ "स्कन्धमिभ्यां धः" स्कन्धः ॥ अन्धः । सान्तौ पूर्वमुक्तौ ॥ "कुञोऽन्धच्" कबन्धः नौः ॥ "नौ स्यतेरधक्" किस्वादाल्लोपः । "उपसर्गात् सुनोति" इति स्यतेः षः । निषधः ॥ "मङ्गेर्नलोपश्च" मगधः ॥

---

१. G omits कृष्ण
२. G omits अङ्गि......अजिरम्.
३. P घुङ्कणः
४. G हन्तुं शक्तः
५. G गतिगेष्णः
६. G हृतङ् हीतङ्.
७. G -मनि-
८. G मुचैर्डुकुन्द-
९. P कुञो.

"इषेरुधक्" इषुधः याच्ञा ॥ "खलेरीनः" संचीयते संकोच्य गृह्यते खलीनं प्रग्रहः ॥ "पठेर्णित्" पठ्यते यादः सुपाठीनः मत्स्यः ॥ "अडेरुप-गुधोपधायाः" उद्यच्छतेऽनेन तरितुम् उडुपः प्लवः ॥ "अशेरूपच्" अश्यते अपूपः ॥ नितरां कुरति शब्दायते निकुरुम्बः ॥ अनृजु भवत्यनेन मनः कुटुम्बः दारादिः ॥ "टिकेष्टः तुट् च ॥ कस्य टत्वं तुट् ष्टुत्वम् । टिट्टिभः पक्षी ॥ "ककेरुभः" ककुभः तरुः ॥ "कुकेः कक् च" कुक्कुभः पक्षी ॥ "दमेर्दो डुः डुक् च" दमेर्दस्य डुत्वमुभप्रत्ययः तस्य डुक् च स्यात् । डुण्डुभः ॥ "क उम्भक्" जलपूरणावस्थायां शब्दायते कुम्भः ॥ "कुथेरुमक्" "कुथ पूतीभावे" कुथुमं मृगाजिनम् ॥ "कुदकुकोर्नुं च" कुन्दुमः निचयः ॥ आदीयते कुङ्कुमः ॥ "कषिकुलिलुलिकलिभ्य आयक्" कषति पीडयति कषायः रसभेदः, वैपरीत्यात् सुगन्धश्च ॥ संस्त्यायन्ति पक्षिणोऽत्र कुलायः ॥ लुलति लुठति पङ्के लुलायः महिषः ॥ क्षिपन्त्यन्त्यवर्णान् कलायः ॥ "कौतेरियः" कवियं खलीनम् ॥ "क्रुञः कित्" कित्त्वादगुणे यण् । क्रियः मेषः ॥ "वियस्तुट् च" वियो आलीयर् तस्य तुट् च । वृद्धिः । वेतालीयं वृत्तम् ॥ "वचेरथ्यक् तश्च" कित्त्वादुत्वम् । चस्य तत्वम् । उतथ्यः ऋषिः । तत्वं विनैव दृश्यते ॥ "अनिकाभ्यः तरन्" अन्तरम् ॥ कायति रोदिति कातरः ॥ "इणपूभ्यां कित्" इतरः ॥ पूतरः जलजन्तुः ॥ "कलेबरः" कल्यते बध्यते सिराभिः कलेबरम् ॥ "मिञः खलच्च" मिञः खलच्प्रत्ययः कलश्च स्यात् । "मीनातिमिनोति" इत्यात्वबाधार्थं एत्वं च स्यात् । प्रक्षिप्यते जघने मेखलः नर्मदाप्रभवोऽद्रिः ॥ "श्रो नुं ह्रस्वश्च" शृणाति पीडयति बद्धं शृङ्खला ॥ "कुडिकितिपणिवेलृपलिवल्लिमालिभ्यो वक्" कुडवः मानम् ॥

---

१. A and P अटे-
२. G उद्यते नेन तेरितुं
३. G and A अश्ये.
४. G and A omit मनः
५. G मदेर्डो डुक् च
   A ददेर्डो दाडुर्कं च.
६. A क्षिपत्य-
७. A -यन्.
८. G नालीभर्
९. G गायति.
१०. G omits this word.
११. G omits this sūtra.
१२. G बन्धं.

निवसत्यत्र[1] च्छलं कितवः ॥ स्तुत्या शब्दमात्रलक्षणात् पणवः ॥ "पेलृ गतौ" हृदयङ्गमत्वात् पेलवः मृदुः ॥ पल्लवः ॥ "वल वल्ल संवरणे संचरणे च" गोरक्षणार्थं सञ्चरति वल्लवः ॥ मालवाः ॥ "कैरवभैरवकारण्डवादीनवादयः" बिभेत्यस्मात् भैरवः ॥ दीयते क्षीयते आदीनवः दोषः ॥ आद्युक्तेः कोद्रवबाडवादयः ॥ "शृणातेरावः" शीर्यते शरावः ॥ "कलेरशच्[2]" बध्यते मृदा कलशः ॥ "पलेराशच्" प्राप्यते समिदर्थैः पलाशः ॥ "कुणिकुलिवलिबन्धिभ्यः किशच्" ध्वनन्ति [3]शुकादयोऽत्र कणिशं सस्यमञ्जरी ॥ कुलति म[4]ज्जति रिपोरङ्गे कुलिशम् ॥ वलिशं मृगव्यापादनस्थानम् ॥ बलिशम् ॥ तिनिशः वृक्षः ॥ इतिशः ऋषिः ॥ बालिशः मूर्खः ॥ "[illegible]" अङ्कयति पदं करोति गजकर्णे अङ्कुशः ॥ मज्जति बिले मञ्जूशः नकुलः ॥ "[5]कलेर्मषक्" क्षिप्यते कल्मषम् ॥ "कुलेश्च माषक्" [6]कले: कुलेश्च माषक् । [7]संस्त्यायति कुल्माषः अर्धखिन्नमाषादिः ॥ बहुवर्णैः संबध्यते कल्माषः नानावर्णः ॥ "जलेरार्षः" जलाषः जलम् ॥ "पीङो नसक्" पीनसः श्लेष्मव्याधिः ॥ "कृपियुवलिभ्य आसः" कार्पासः पित्तप्रकृतिः ॥ युवासः दुरालभः ॥ वलासः श्लेष्मा ॥ "किलेः कित्" किलश्चेत्येके । किलासं सिध्मम् ॥ "कुरः पासः" "हलि च" इति दीर्घः । कूर्पासः ॥ "पटिवीभ्यां टित्डिसचौ[9]" पटति गच्छति रिपून् पट्टिसं आयुधम् ॥ वीयते खाद्यते हंसैः बिसम् ॥ "तालेरीसच्" तालीसं[10]: गन्धद्रव्यम् ॥ "त्रपेरुसः" कर्कटिका । उसेति विधानसामर्थ्यात् न षः ॥ "अलेरम्बुसः" अलम्बुसः राक्षसः ॥ "लुञो हः" खण्ड्यते लोहः ॥ "अनेरोके[11]हः" अनोकहः वृक्षः ॥ "कटेराहः" वृष्यते सिञ्च्यते जलमस्मिन् कटाहः ॥ "निरीण ऊहक्" निर्गच्छति बहिः निर्यूहः ॥

---

१. G वसन्त्यत्र.
२. G शरच्.
३. G मृगादयोऽत्र.
४. P निमज्जति
५. G omits this sūtra.
६. G omits कुलः......जलम्.
७. A omits this word.
८. A omits this sūtra.
९. G टिसन्धीसचौ,
A टिषण्डिसचौ
१०. G and P ता लीसम्.
११. A -हा.

“दस्यूहः” दत्यूहः पक्षी ॥ “वलेरक्षन्” संवृणोति वर्णान्तरं व्याप्नोति वा वलक्षः धवलः ॥ “लाक्षाद्राक्षामिक्षादयः” लान्त्येनां लाक्षा ॥ द्रवति मध्वस्मात् द्राक्षा ॥ आमिक्षा हविर्भेदः । आद्युक्तेः पीयुक्षः वृक्षः ॥

॥ इति भोजोक्ताः ॥

[1]नान्तं प्रापदुणादिशास्त्रमियता शब्दाननुक्तानतो
धातुप्रत्ययरूपतः प्रविभजेत् कार्यात् किदादीन् वदेत् ।
रूढाः साधव एव ते च शकटापत्यादिभिर्धातुजाः
सर्वेऽपीत्युदितं ततो बहुलमित्यूचे स्वयं पाणिनिः ॥

उणादिवृत्तित्रितयं दण्डनाथकृतिं तथा ।
दृष्ट्वैतत्कृतमस्माभिः देवनारायणाज्ञया ॥

इति श्रीमत्केरलभूवलयभूषणदेवनारायणधरणीपतिकरुणाशरणेन
नारायणचरणपरायणेन नारायणकविना
विरचिते प्रक्रियासर्वस्वे
उणादिखण्डः समाप्तः ॥



1. G omits this verse.

INDEX OF
WORKS & AUTHORS REFERRED TO

INDEX OF SŪTRAS

INDEX OF QUOTATIONS

अलिशालि	१०९	Cf. Bs.	II-i-168.
अलिशीङ्भ्यां	५८	Cf. Bs.	II-ii-207.
अलेरम्बुसः	१४८	Bs.	II-iii-182.
अविच्चिण्	९३		
अविदधि	९५	Cf. Bs.	II-i-177.
अवेश्च	६३	Cf. Bs.	II-i-198.
अते ह्रस्वश्च	३०	Bs.	II-ii-255.
अवोदै	२८	Pā.	VI-iv-29.
अशिकत्रोः	३९	Bs.	II-ii-23.
अशेरूपच्	१४७	Bs.	II-ii-216.
अश्नोतेः	१०३	Bs.	II-ii-51.
असेश्च	१६	Cf. Bs.	II-i-58.
आङि च	८५	Bs.	II-i-287.
आङि स्फायेः	१४६	Bs.	II-ii-150.
आतो युक्	१	Pā.	VIII-iii-33.
आद्गुणः	५७, १०३	Pā.	VI-i-87.
आपो ह्रस्वश्च	५०	Bs.	II-i-141.
आश्वासव्यः	११	Mahābhāṣya	I-250.
इणोदम्	२७	Bs.	II-i-298.
इण्पूभ्यां	१४७	Bs.	II-iii-67.
इण्शो	१४५	Cf. Bs.	II-ii-122.
इन्धेः	१२०	Bs.	II-i-340.
इषेरुधक्	१४७	Bs.	II-ii-177.
इस्मन्त्र	५२, ११२, ११४	Pā.	VI-iv-97.
ईडेः	१४३	Bs.	II-i-256.
ईरिव्या	२८	Cf. Bs.	II-ii-250.
उच्चेः	१४४	Bs.	II-ii-74.
उत्पूर्वात्	१४६	Mādhava	
उदोष्ठ्य	६, ४७, ८९, ९६, १११	Pā.	VII-i-102.
उदके	१४३	Bs.	II-i-263.
उपधायां	३२	Pā.	VIII-ii-78.
उपह्वर	५५	Cf. Bs.	II-iii-74.
उपधायां च	७०	Pā.	VIII-ii-78.
उपसर्गात्	१४६	Pā.	VIII-iii-65.

कलिपलि	१०५	Cf. Bs.	II-iii-1.
कलिस्फुलि	२५	Bs.	II-ii-63.
कलेरशच्	१४८	Bs.	II-iii-142.
कलेर	१४४	Bs.	II-ii-32.
कलेरेबरः	२४७	Bs.	II-iii-75.
कलेर्मेषक्	१४६	Bs.	II-iii-152.
कल्पि	९६	Cf. Bs.	II-iii-164.
कविरसरिर	१२	Cf. Bs.	II-iii-47.
कवेः	१४४	Bs.	II-ii-75.
कशेः	१४३	Cf. Bs.	II-i-84.
कषिकुलि	१४७	Bs.	II-iii-8.
कषेर्डित्	१४६	Bs.	II-ii-147.
कायः	१४२	Bs.	II-i-173.
कार्यं कारुः	१	Bhaṭṭi Kāvya	VII-28.
किणिबिलि	३०	Cf. Bs.	II-iii-129.
किरतेरा	१४५	Bs.	II-ii-99.
किरतेश्च	५९.	Cf. Bs.	II-ii-208.
किलेः कित्	१४८	Bs.	II-iii-177.
किसलय	१०१	Bs.	II-iii-7.
कीकट	९७	Bs.	II-ii-98.
कीचक	४१	Cf. Bs.	II-ii-11.
कीलाल	६८	Bs.	II-iii-105.
कुकूल	९९	Cf. Bs.	II-iii-112.
कुकेः कक	१४७	Bs.	II-ii-236.
कुक्ष्यन्त्र	११५	Bhāgavata	
कुगुग्घञ्चि	२३	Bs.	II-iii-98.
कुङो	११८	Bs.	II-i-187.
कुचिञोः	११८	Bs.	II-i-190.
कुञोऽन्घच्	१४६	Cf. Bs.	II-ii-174.
कुटज	१४४	Bs.	II-ii-92.
कुटेः नुं	१३२	Bs.	II-ii-9.
कुडिकिति	१४७	Bs.	II-iii-134.
कुडप इति	८०	Hara	
कुणेश्च	२१	Cf. Bs.	II-ii-120.
कुतपचातप	८१	Cf. Bs.	II-ii-212.

·क्ङिति इत्यनु	१५	Mādhavīya Dhv.	I-347.
क्रमेः	१४४	Bs.	II-ii-33.
क्षमेः	१४४	Bs.	II-ii-76.
क्रोकोः	१४३	Bs.	II-ii-30.
क्लोमन्	११३	Cf. Bs.	II-i-285.
क्षोश्च	९३	Cf. Bs.	II-i-208.
खञ्जेः	१४५	Bs.	II-ii-104.
खड्गखज्योः	१७	Bs.	II-i-110.
खर्जि	९९	Bs.	II-iii-57.
खलेरीनः	१४७	Bs.	II-ii-197.
खलेश्च	९४	Cf. Bs.	II-i-193.
गमहन	९०	Pā.	VI-iv-98.
गमेः	१४३	Bs.	II-i-54.
गाङ्कुटादि	७८	Pā.	I-ii-1.
गाद्राभ्यां	१४६	Bs.	II-ii-129.
गिरः	११८	Bs.	II-i-188.
गुगम्यमि	१०३	Bs.	II-ii-83.
गुडेः	१४४	Bs.	II-ii-80.
गुरेः	७८	Bs.	II-iii-37.
गुलिबिलि	३०	Cf. Bs.	II-ii-253.
गुवः क्वित्	१०१	Bs.	II-ii-165.
गोपादिषु	१४२	Bs.	II-i-239.
ग्रहिज्या	६	Pā.	VI-i-16.
ग्रावन्	३३	Cf. Bs.	II-i-278.
ग्रीष्म	३०	Bs.	II-ii-257.
ग्रो णित्	१४५	Bs.	II-ii-110.
घण्टा	१०४	Bs.	II-ii-96.
घुमास्था	१५, ३५, ११४	Pā.	VI-iv-66.
घुषिगलि	६०	Cf. Bs.	II-i-83.
चजोः	१२०	Pā.	VII-iii-52.
चण्डि	१४४	Bs.	II-ii-42.
चपेरेटच्	१४५	Bs.	II-ii-109.
चपेर्नु च	१९	Cf. Bs.	II-i-124.
चमेः	१४२	Bs.	II-i-181.
चमेः	१४३	Bs.	II-i-104.

चिम्योः	१४४	Bs.	II-ii-81.
चिरेरिटच्	१४५	Bs.	II-ii-101.
चुलुकोन्मुक	३९	Bs.	II-ii-26.
चेरुपन्योः	६८	Bs.	II-i-42.
चोः कुः	५८, ६१, ६५, ११७	Pā.	VIII-ii-30.
चौरादिकः	२०	S'veta-Uṇ. Vṛtti	I-96.
च्छ्वोः शूड्	२९	Pā.	II-iv-19.
छशां षः	३४, ४३, ५८, ६५, ८२ ११४	Pā.	VIII-ii-36.
जनिवध्योश्च	२, १०९	Pā.	VII-iii-35.
जनसनखनां	११४	Pā.	VI-iv-42.
जनिपुणि	१०९	Cf. Bs.	II-iii-3.
जनेर्घः	१४४	Bs.	II-ii-68.
जराजटा	२	Bs.	II-i-4.
जलेराषः	१४८	Bs.	II-iii-154.
जीवेः	१४३	Bs.	II-i-81.
जुकिजनि	१०४	Bs.	II-ii-95.
जृकमि	२१	Bs.	II-ii-114.
जृपृकृ	९७	Cf. Bs.	II-iii-166.
जेश्च	५५	Cf. Bs.	II-ii-189.
ज्वरत्वर	१५, २९, ५५, ९२	Pā.	VI-iv-20.
झमेः	१४४	Bs.	II-ii-93.
झरो झरि	९६	Pā.	VIII-iv-65.
झोऽन्तः	६३	Pā.	VII-i-3
टिकेष्टुः	१४७	Bs.	II-ii-234.
डञ्चच्	१४४	Cf. Bs.	II-ii-82.
ढिण्टन्	१४५	Bs.	II-ii-102.
डिण्डीर	९०	Cf. Bs.	II-iii-50.
डुकशि	११८	Cf. Bs.	II-iii-120.
ढ्रलोपे	३७	Pā.	VI-iii-111.
तनिमनि	१४३	Bs.	II-i-51.
तनेः	१४२	Bs.	II-i-203.
तमिबिडि	६७	Cf. Bs.	II-iii-101.
तमिलूभ्यां	२५	Cf. Bs.	II-ii-59.
तरतेः	१११	Bs	II-i-158.
तरतेः	१४३	Bs.	II-i-109.

तलिमलि	९९	Bs.	II-iii-58.
ताडेः	२०	Cf. Bs.	II-i-258.
ताभ्यामन्यत्र	२	Pā.	III-iv-75.
तालेरीसच्	१४८	Bs.	II-iii-180.
तितुत्र १५, ३४, ६१, ६५, ६६, ७०, ११४, ११७		Pā.	VII-ii-7.
तुम्बेः	१४३	Bs.	II-i-102.
तुवः	१४३	Bs.	II-i-246.
त्रपेरुसः	१४८	Bs.	II-iii-181.
त्रश्च	५७	Cf. Bs.	II-ii-182.
त्रश्च	७६	Cf. Bs.	II-ii-116.
त्रो तुक् च	१८	Cf. Bs.	II-i-112.
दमेः	१२५	Bs.	II-i-347.
दमेर्डुः	१४७	Cf. Bs.	II-ii-237.
दरिद्रो	१४५	Bs.	II-ii-108.
दस्त्यूहः	१४९	Bs.	II-iii-189.
दुषेः	७७	Cf. Bs.	II-ii-139.
दृकृषि	११८	Bs.	II-i-189.
दृणातेः	१४४	Bs.	II-ii-69.
दृशामि	७४	Cf. Bs.	II-ii-158.
द्युगमिभ्यां	४५	Bs.	II-i-150.
द्युतिस्वाप्योः	४४	Pā.	VII-iv-67.
द्युद्रुभ्यां	८	Bs.	II-i-34.
धातोस्तन्नि-	१०५	Pā.	VI-i-80.
धुञो	१४३	Bs.	II-i-70.
धूञ्मू	१४२	Bs.	II-i-233.
नञि भुवो	३१	Bs.	II-iii-133.
नञि सहेः	२१	Bs.	II-ii-121.
नदिवदि	६३	Cf. Bs.	II-i-79.
नमेः	१४४	Bs.	II-ii-78.
नर्कुट	१४५	Bs.	II-ii-106.
न लोक	१	Pā.	II-iii-69.
निचुल	२०	Bs.	II-iii-110.
नितमेः	१००	Cf. Bs.	II-ii-219.
निम्ब	१००	Bs.	II-ii-222.

भातेः	१४३	Bs.	II-i-257.
भियो	८१	Bs.	II-ii-39.
भिल्लाच्छ	१०४	Bs.	II-iii-92.
बिषेः	२८	Bs.	II-i-247.
भृञो भुल	२५	Bs.	II-ii-64.
भृवम्य	१०३	Cf. Bs.	II-iii-141.
भृस्त्रृ	२६	Cf. Bs.	II-ii-53.
मङ्केर्नलोपश्च	१४६	Bs.	II-ii-146.
मणेश्च	१११	Cf. Bs.	II-i-153.
मध्यविन्ध्य	१०५	Cf. Bs.	II-iii-4.
मद्दल इति कवयः	२२	Kṣīrasvāmi on Amara I-vi-8.	
मनस्तुट्	२५	Bs.	II-ii-62.
मनिपचि	१३२	Bs.	
मन्दिवादि	९	Mādhavīya Dhv.	II-278.
मयेरूक्	१०३	Bs.	II-ii-52.
मसेः	९९	Bs.	II-iii-55.
मञ्जिकुटि	८९	Cf. Bs.	II-iii-48.
मस्जिनशोः	१४४	Pā.	VII-i-60.
महेरेलच्	१३	Bs.	II-iii-113.
माङितुलेः	२५	Bs.	II-ii-65.
मिञः खलच्	१४७	Bs.	II-iii-117.
मीनातिमिनोति	१४७	Pā.	VI-i-50.
मुचेः डकुन्द	१४६	Bs.	II-ii-169.
मुदेः	७८	Bs.	II-iii-36.
मुरलोरल	२३	Bs.	II-iii-99.
मुर्मुर	१०	Bs.	II-iii-52.
मुर्वेः	१४५	Bs.	II-ii-91.
मुषेः	१४२	Bs.	II-i-182.
मृङ	१४४	Bs.	II-ii-77.
मृदिमण्ड	२२	Bs.	II-iii-93.
मृद्वीक	७२	Cf. Bs.	II-ii-20.
मृपल्यो	१४३	Bs.	II-i-53.
यजेः	९४	Bs.	II-i-267.
यजेस्तिः	११८	Bs.	II-i-186.
यजो	१४२	Bs.	II-i-197.

यमेरुन्दन्	१४६	Bs.	II-ii-170.
यमेः	३१४	Bs.	II-i-68.
यातेः प्रतौ	८५	Bs.	II-i-290.
यातेः	१२०	Bs.	II-i-133.
युमाभ्यां	६५	Bs.	II-iii-150.
यूषशूष	९७	Bs.	II-iii-167.
ये विभाषा	१०५	Pā.	VI-vi-43.
योः कित्	९४	Cf. Bs.	II-i-192.
रभेरिश-	५५	Pā.	VII-i-63.
रमेश्च	८	Cf. Bs.	II-ii-18.
रलोव्यु	४९	Pā.	I-ii-26.
राला	१४४	Bs.	II-ii-31.
राल्लोप	७०	Pā.	VI-iv-29.
रिवेश्च	७६	Cf. Bs.	II-ii-138.
रिषि	६६	Cf. Bs.	II-iii-170.
रुचितिलि	४०	Cf. Bs.	II-ii-10.
रुधीणभ्यां	३८	Cf. Bs.	II-iii-29.
रेतसि	१२४	Cf. Bs.	II-i-344.
रो रि	३७	Pā.	VIII-iii-94.
लगिग्रोः	१४१	Bs.	II-ii-118.
लङ्केर्दीर्घश्च	२२	Bs.	II-iii-94.
लाक्षाद्राक्षा	१४९	Bs.	II-iii-191.
लिषि	१४४	Bs.	II-ii-79.
लिष्वः लम्पटः	३१	Daṇḍanātha on Bs.	II-iii-128.
लुपेश्च	११५	Cf. Bs.	II-iii-81.
लूञो हः	१४८	Bs.	II-iii-183.
लूसू	७०	Cf. Bs.	II-ii-133.
लोपो व्यो	३६, ७०, ११५	Pā.	VI-i-66.
वचेरथ्यक्	१४७	Bs.	II-iii-17.
वटिचटि	३	Cf. Bs.	II-i-7.
वनोर च	१०६	Pā.	IV-i-7.
वन्दिवन्धि	७४	Cf. Bs.	II-ii-158.
वयसि	१४५	Pā.	IV-i-20.
वराहः	९३	Śveta. Uṇ. Vṛtti.	IV-58.



INDEX OF WORDS

1. Words marked with asterisks are found only in the commentary.

CORRIGENDA

PAGE	LINE	READ	FOR
X	3	IV. 245	IV. 246
	4	764	765
		11	12
XI	1	omit this sutra	
19	6	जम्बू	जभ्बू
20	2	-शङ्कथु-	शङ्कथ
	13	ताटेर्णि	ताटेणि
36	8	दह्रः	दहुः
38	8	वीध्रम्	विध्रम्
39	11	-तिम्योः	-तम्योः
	17	-नशोः	नषोः
41	4	व्रश्चि-	वृश्चि-
44	8	द्युति-	द्यत्ति
	9	-स्वाप्योः	स्वप्योः
62	6	वल्कः	वल्क
63	6	-नोन्तो-	-नोम्त्यो-
68		Nos. 350 and 351 have been dropped.	
76	15	जृविशि-	जविशि-
79	9	अगारः	अङ्गारः
81	14	एतशसुः	एतशसु
88	11	ईर्पेर्हस्व-	ईर्पेर्हस्व
95	19	-मुषन्	मूषन्
100	13	-र्बेन्	र्बुन्

PAGE	LINE	READ	FOR
100	18	अमे	अम
106	1	No. 555 has been dropped.	
107	11	वौ रि-	वौ र
111	6	उभेः	उभे
	18	सन्वत्तु	संपत्तु-
112	6	कर्मणा	कर्मणां
114	5	ष्टून्	ष्टन्
117	6	डुंसि	डुसि
119	11	उब्जे	भब्जे
	18	भब्जे	उब्जे
131	11	लो लो	लो लों
132	14	कटेः	कुटेः
133	15	गुहेः	गृहेः
137	2	खञ्जः	खञ्जः
140	12	-निनमि-	निमि-
143	6	जीवर-	जीर-
144	1	राला-	शाला-
	8	पिष्टातकः	पिष्टातः
	11	क्रमेः	कृमेः
146	15	कुलिमयि	कलिमलि
148	6	कणि	कुणि

ABBREVIATIONS.

Bs : Bhoja's Sarasvatīkaṇṭhābharaṇa, a work on grammar. The references are to my edition of the work with the Vṛtti of Daṇḍanātha, to be published shortly.

Mahābhāṣya : The references are to the edition of Keilhorn.

Madhavīya Dhv : The Dhātu Vṛtti of Mādhava, published in the Bibliotheca Orientalia in 4 parts.

Pā : Pāṇini's Aṣṭādhyāyī.

Śveta Uṇ. Vṛtti : The Uṇādisūtravṛtti of Śvetavanavāsin, edited by me.